CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

32

पं० मुरारी लाल

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३९४
बुलन्दशहर (उ०प्र०)

है

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऋजुपाठम्

श्रीईश्वरचन्द्रविद्यासागरप्रणीतम् ।

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३९४
बुलन्दशहर (उ०प्र०)

तृतीयो भागः ।

चतुर्दशं संस्करणम् ।

कलिकाताराजधान्याम्
संस्कृतयन्त्रे मुद्रितम् ।

संवत् १९४२ ।

PUBLISHED BY THE SANSKRIT PRESS DEPOSITORY,
No. 148, BARANASI GHOSH'S STREET, JORASANKO.
1885.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पं० प्रेम दत्त शास्त्री
जहाँगीराबाद २०२
बुलन्दशहर (उ०प्र०)

বিজ্ঞাপন

ঋজুপাঠের তৃতীয় ভাগ হিতোপদেশ, বিষ্ণুপুরাণ, মহাভারত, ভট্টিকাব্য, ঋতুসংহার ও বেণীসংহার এই কয়েক গ্রন্থ হইতে সংগৃহীত হইল। এই সকল গ্রন্থের যে যে স্থান উদ্ধৃত হইয়াছে, উহাদের কোন কোন ভাগ এক বারেই পরিত্যক্ত ও কোন কোন ভাগ কিয়দংশে পরিবর্ত্তিত হইয়াছে।

হিতোপদেশকর্ত্তা গ্রন্থারম্ভে প্রতিজ্ঞা করিয়াছেন, পঞ্চতন্ত্র ও অন্য এক গ্রন্থ হইতে আপন গ্রন্থ সংগ্রহ করিলেন। বাস্তবিক, হিতোপদেশ পঞ্চতন্ত্রের প্রতিরূপ স্বরূপ। পঞ্চতন্ত্রের গুণ ও দোষের অধিকাংশই হিতোপদেশে লক্ষিত হয়। বিশেষ এই, পঞ্চতন্ত্র অপেক্ষা হিতোপদেশের রচনা কিঞ্চিৎ গাঢ় এবং প্রস্তুত বিষয়ের বৈশদ্য অথবা দৃঢ়ীকরণ বাসনায়, নানা প্রামাণিক গ্রন্থ হইতে প্রমাণ, দৃষ্টান্ত ও উদাহরণ স্বরূপ উত্তম উত্তম শ্লোক উদ্ধৃত হইয়াছে। কিন্তু গ্রন্থকর্ত্তার সম্যক্ সহৃদয়তার অসদ্ভাব প্রযুক্ত, অনেক স্থলেই উদ্ধৃত শ্লোক সকল অসংলগ্ন হইয়া উঠিয়াছে। তত্তৎস্থলে প্রকৃত বিষয়ের সহিত ঐ সকল শ্লোকের কোন সম্বন্ধ দেখিতে পাওয়া যায় না। হিতোপদেশকর্ত্তা বালকদিগের নীতিশিক্ষার্থে এই পুস্তক রচনা করিয়াছেন (১)। কিন্তু মধ্যে মধ্যে এক একটি আদিরসঘটিত অতি অশ্লীল উপাখ্যান

(১) কথাচ্ছলেন বালানাং নীতিস্তদিহ কথ্যতে।

হিতোপদেশ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

আছে। অতএব আশ্চর্য্য বোধ হইতেছে যে বালকদিগের নিমিত্ত নীতিপুস্তক লিখিতে আরম্ভ করিয়া, কি প্রকারে গ্রন্থকর্ত্তার ঐরূপ অশ্লীল উপাখ্যান সঙ্কলন করিতে প্রবৃত্তি হইল। কোন্ ব্যক্তি হিতোপদেশ রচনা করিয়াছেন, আমরা তাহা অবগত নহি। অনেকে বিষ্ণুশর্ম্মাকে হিতোপদেশকর্ত্তা বলিয়া থাকেন; কিন্তু তাহার কোন প্রমাণ নাই। হিতোপদেশ চারি অংশে বিভক্ত; মিত্রলাভ, সুহৃদ্ভেদ, বিগ্রহ, সন্ধি। তন্মধ্যে মিত্রলাভ-প্রকরণমাত্র এই পুস্তকে পরিগৃহীত হইয়াছে।

বিষ্ণুপুরাণ অতি প্রাঞ্জল ও পরিষ্কৃত গ্রন্থ; পাঠমাত্রেই অর্থ-প্রতীতি হয়। পুরাণের যে পাঁচ লক্ষণ নির্দ্দিষ্ট আছে,(২) বিষ্ণু-পুরাণ সেই পঞ্চলক্ষণাক্রান্ত। এই পুরাণ অন্যান্য যাবতীয় পুরাণ অপেক্ষা সর্ব্বাংশে উৎকৃষ্ট। অন্যান্য পুরাণের ন্যায়, ইহাতে অপ্রাকরণিক কথা নাই। সকল পুরাণ অপেক্ষা বিষ্ণুপুরাণের রচনা প্রাচীন বোধ হয়। যাবতীয় পুরাণ বেদব্যাসপ্রণীত বলিয়া প্রসিদ্ধি আছে। কিন্তু পুরাণ সকলের রচনা পরস্পর এত বিভিন্ন যে এক ব্যক্তির রচিত বলিয়া বোধ হয় না। বিষ্ণুপুরাণ, ভাগবত ও ব্রহ্মবৈবর্ত্তপুরাণ পাঠ করিলে, এই তিন গ্রন্থ এক লেখনীর মুখ হইতে বিনির্গত বলিয়া প্রতীতি হওয়া দুষ্কর। বিষ্ণুপুরাণ সর্ব্বাংশে উৎকৃষ্ট বটে; কিন্তু ইহাতে বালকদিগের পাঠোপযোগী বিষয় অধিক নাই। যে কয়েক স্থান প্রকৃত বিষয়ের উপযোগী বোধ হইয়াছিল, তাহা পরিগৃহীত হইয়াছে।

মহাভারত বেদব্যাসবিরচিত বলিয়া কিংবদন্তী আছে, কিন্তু

(২) सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंश्यानुचरितं चैव पुराणं पञ्च लक्षणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

বিষ্ণুপুরাণ প্রভৃতির সহিত মহাভারতের রচনার এত বিভিন্নতা যে যিনি বিপুরাণ, কিংবা ভাগবত, অথবা ব্রহ্মবৈবর্ত্তপুরাণ রচনা করিয়াছেন, তাঁহার রচিত বোধ হয় না। মহাভারত পুরাণ মধ্যে পরিগণিত নহে। ইহাকে ইতিহাস কহে। ইহাতে পাণ্ডবদিগের বৃত্তান্ত সবিস্তর বর্ণিত হইয়াছে। পুরাণে সৃষ্টি, প্রলয়, মন্বন্তর, নানা রাজবংশ এবং নানাবংশীয় নরপতিগণের চরিত কীর্ত্তন থাকে। মহাভারতে এক নির্দ্দিষ্ট রাজবংশের চরিত বিশেষ রূপে বর্ণিত আছে। কিন্তু ইহাতে, আনুষঙ্গিক, নানা পৌরাণিক বিষয়ও সঙ্কলিত হইয়াছে। বিষ্ণুপুরাণের রচনা যেরূপ প্রাঞ্জল ও পরিষ্কৃত, মহাভারতের সেরূপ নয়! আবৃত্তিমাত্র সকল স্থলের অর্থ বুঝিতে পারা যায় না। অনেক স্থল এরূপ দুরূহ অথবা অস্পষ্ট যে কোন ক্রমেই অর্থপ্রতীতি হয় না। মহাভারতে নীতিগর্ভ ও হিতোপদেশঘটিত প্রস্তাব অনেক আছে। তন্মধ্যে আদি ও বন পর্ব্ব হইতে কয়েকটি পরিগৃহীত হইয়াছে। তদ্ব্যতিরিক্ত ইহাতে এত উৎকৃষ্ট প্রস্তাব আছে যে সমস্ত উদ্ধৃত করিলে, একখানি বৃহৎ পুস্তক হইতে পারে।

ভট্টিকাব্যে রামের চরিত বর্ণিত হইয়াছে। এই কাব্য দ্বাবিংশতি সর্গে বিভক্ত। গ্রন্থকর্ত্তা স্বরচিত কাব্যের শেষে আপনার একপ্রকার পরিচয় দিয়াছেন, কিন্তু নাম নির্দ্দেশ করেন নাই; প্রামাণিক টীকাকার জয়মঙ্গল কহেন, এই কাব্য বলভীনগরনিবাসী ভট্টিনামক কবির রচিত। এবং ভট্টিকাব্য নাম দ্বারাও, ইহাই সম্যক্ প্রতিপন্ন হয়। কিন্তু অধুনাতন টীকাকার ভরতমল্লিক, আপনমতের প্রতিপোষক প্রমাণপ্রদর্শন ব্যতিরেকেই, ভট্টিকাব্যকে ভর্ত্তৃহরিপ্রণীত বলিয়া নির্দ্দেশ করিয়াছেন। ভর্ত্তৃহরি, ও এই কাব্যের রচয়িতা, উভয়েই অদ্বিতীয় বৈয়াকরণ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ছিলেন; বোধ হয়, ঐ সাদৃশ্য দর্শনেই ভরতমল্লিকের এই ভ্রান্তি জন্মিয়াছিল। কিন্তু তাঁহার ইহা বিবেচনা করা উচিত ছিল যে যেরূপ জনশ্রুতি আছে, তদনুসারে ভর্ত্তৃহরি স্বয়ং রাজা ছিলেন। যে ব্যক্তি স্বয়ং রাজা হন তিনি, অমুক রাজার রাজধানীতে থাকিয়া আমি এই গ্রন্থ করিলাম, আপন গ্রন্থে কদাচ এরূপ নির্দেশ করেন না (৩)। ভট্টিকাব্যের রচনা স্থানে স্থানে অতি সুন্দর, বিশেষতঃ, দ্বিতীয় সর্গের প্রারম্ভে যে শরদ্বর্ণনা আছে তাহা এমন মনোহর যে তদ্দারা গ্রন্থকর্ত্তার অসামান্য কবিত্বশক্তির বিলক্ষণ প্রমাণ পাওয়া যাইতেছে। কিন্তু ব্যাকরণের উদাহরণপ্রদর্শন গ্রন্থকর্ত্তার যেরূপ উদ্দেশ্য, কবিত্বশক্তিপ্রদর্শন করা তাদৃশ উদ্দেশ্য ছিল না। এই নিমিত্ত ভট্টিকাব্যের অধিকাংশই অত্যন্ত নীরস ও অত্যন্ত কর্কশ। ফলতঃ, ভট্টিকাব্য কোন মতেই উৎকৃষ্ট কাব্যমধ্যে পরিগণিত হইতে পারে না। এই কাব্যের প্রথম, দ্বিতীয় ও তৃতীয় সর্গ মাত্র পরিগৃহীত হইয়াছে।

ঋতুসংহার অদ্বিতীয় কবি কালিদাসের রসময়ী লেখনীর মুখ হইতে বহির্গত। এই উৎকৃষ্ট কাব্য ছয় সর্গে বিভক্ত। এক এক সর্গে যথাক্রমে গ্রীষ্ম, বর্ষা, শরৎ, হিম, শিশির, বসন্ত ছয় ঋতু বর্ণিত হইয়াছে। যে স্বভাবোক্তি কাব্যের প্রধান অলঙ্কার, ঋতুসংহার প্রায় আদ্যোপান্ত তাহাতে অলঙ্কৃত। কিন্তু রূপক,

(৩) কাব্যমিদং বিহিতং ময়া বলভ্যাং
শ্রীধরসেননরেন্দ্রপালিতায়াম্।
কীর্ত্তিরতো ভবতাং নৃপস্য তস্য
ক্ষেমকরঃ ক্ষিতিপো যতঃ প্রজানাম্॥
২২ সর্গ ৩৫ শ্লোক।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

উৎপ্রেক্ষা প্রভৃতি কতিপয় অলঙ্কার এতদ্দেশীয় লোকের অধিক প্রিয়; স্বভাবোক্তির চমৎকারিত্ব তাঁহাদের তাদৃশ মনোরম বোধ হয় না। এই নিমিত্ত, অনেকেই ঋতুসংহারকে উৎকৃষ্ট কাব্য বলেন না। কেহ কেহ এই উৎকৃষ্ট কাব্যকে রঘুবংশ, কুমারসম্ভব, মেঘদূত, অভিজ্ঞানশকুন্তল, বিক্রমোর্ব্বশী এই সকল সর্ব্বোৎকৃষ্ট কাব্যের রচয়িতা কালিদাসের প্রণীত বলিয়া অঙ্গীকার করিতে সম্মত নহেন। ঋতুসংহার, রঘুবংশাদি হইতে অনেক অংশে ন্যূন বটে। কিন্তু যে সমস্ত গুণ থাকাতে রঘুবংশাদির এত আদর ও এত গৌরব, কুসংস্কার বিবর্জ্জিত ও সহৃদয়পদবীতে অধিরূঢ় হইয়া অভিনিবেশ পূর্ব্বক পাঠ করিলে, ঋতুসংহারে সেই সমস্ত গুণের সমুদয়লক্ষণ সুস্পষ্ট লক্ষিত হয়। ঋতুসংহারে যেমন অনেক অসাধারণ গুণ আছে, তেমনই এক অসাধারণ দোষও আছে। ঋতুসংহারের অধিকাংশই আদিরসঘটিত। বিশেষতঃ, হিম, শিশির, বসন্ত বর্ণনা আদিরসে এত পরিপূর্ণ, যে ঐ তিন সর্গ কোন ক্রমেই বালকদিগের পাঠযোগ্য নহে। এই নিমিত্ত, গ্রীষ্ম, বর্ষা, শরৎ বর্ণনা মাত্র এই পুস্তকে পরিগৃহীত হইল। এই তিন সর্গেরও আদিরসঘটিত শ্লোক সকল পরিত্যক্ত হইয়াছে।

বেণীসংহারনাটক ভট্টনারায়ণবিরচিত। এরূপ কিংবদন্তী আছে, আদিশূর রাজা কান্যকুব্জ হইতে গৌড়দেশে যে পঞ্চ ব্রাহ্মণ আনয়ন করেন ভট্টনারায়ণ তাঁহাদের এক জন। এই নাটক নাটকের সমুদয়লক্ষণাক্রান্ত। সাহিত্যদর্পণে নাটকপরিচ্ছেদে নাটকসংক্রান্ত বিষয়ের উদাহরণপ্রদর্শনার্থে বেণীসংহার হইতে যত উদ্ধৃত হইয়াছে, অন্য কোন নাটক হইতে তত নহে। কিন্তু এই নাটকের রচনা প্রাচীন কবিদিগের রচনার ন্যায় চমৎকারিণী ও

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

মনোহারিণী নহে। ভট্টনারায়ণ নাটকের নিয়ম যত প্রতিপালন করিয়াছেন, কবিত্বশক্তি তত প্রদর্শন করিতে পারেন নাই। বেণীসংহার, নাটকের সমুদায় লক্ষণাক্রান্ত হইয়াও, কাব্যাংশে শকুন্তলা, রত্নাবলী, উত্তরচরিত প্রভৃতি অপেক্ষা অনেক ন্যূন। নাটকে সংস্কৃত ভিন্ন প্রাকৃত, পৈশাচী, রাক্ষসী প্রভৃতি অনেক ভাষা থাকে। সংস্কৃত ভাষায় প্রবেশ না হইলে, সে সকল ভাষা অনায়াসে বুঝিতে পারা যায় না। এই নিমিত্ত, বেণীসংহারের যে অংশে ঐ সকল ভাষার সংস্রব নাই, তাহাই ঋজুপাঠের তৃতীয় ভাগে উদ্ধৃত করা গিয়াছে।

শ্রীঈশ্বরচন্দ্র শর্ম্মা

কলিকাতা। সংস্কৃত কালেজ।
১৬ই পৌষ, সংবৎ ১৯০৮।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

চতুর্থ সংস্করণের বিজ্ঞাপন

এই সংস্করণে, শিক্ষাকার্য্যের সৌকর্য্যার্থে অপেক্ষাকৃত দুরূহ অংশসমূহের সংক্ষিপ্ত ব্যাখ্যা নিম্ন দেশে সন্নিবেশিত, এবং গ্রন্থকলেবরের অতিবিস্তৃতিদোষপরিহারার্থে মূলের শেষ কিয়দংশ পরিত্যক্ত হইল।

শ্রীঈশ্বরচন্দ্র শর্ম্মা

কলিকাতা।
১লা বৈশাখ। সংবৎ ১৯২২।

पं० [illegible] शास्त्री
जहांगीराबाद २०२३९४
बुल[illegible]हर (उ०प्र०)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूची

	पृष्ठ
हितोपदेशः	११
विष्णुपुराणम्	३७
इन्द्रं प्रति दुर्वाससः कोपः	३७
ध्रुवोपाख्यानम्	४१
भरतोपाख्यानम्	४६
महाभारतम्	५०
परीक्षिदुपाख्यानम्	५०
ययात्युपाख्यानम्	५८
जतुगृहदाहः	६७
द्रौपदीयुधिष्ठिरसंवादः	८६
धृतराष्ट्रविलापः	११०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऋजुपाठम्

जहांगीराबाद बुलन्दशहर (उ०प्र०)

तृतीयो भागः ।

हितोपदेशः ।

अस्ति गोदावरीतीरे विशालः शाल्मलितरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः (१) कृतान्तमिव द्वितीयमटन्तं व्याधमपश्यत् । तमवलोक्याचिन्तयत् अद्य प्रातरेवानिष्टदर्शनं जातं न जाने किमनभिमतं (२) दर्शयिष्यति । इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः । अथ स व्याधस्तण्डुलकणान् विकीर्य्य जालं विस्तीर्य्य च प्रच्छन्नो भूत्वा स्थितः ।

---

(१) प्रबुद्धः जागरितः ।

(२) अनभिमतम् अप्रियम् अशुभमिति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डुलकणानवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः। तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि। प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम्।

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।
वृद्धव्याघ्रेण संप्राप्तः (१) पथिकः संमृतो यथा॥

कपोता ऊचुः कथमेतत्। सोऽब्रवीत्। अहमेकदा दक्षिणारण्ये चरन्नपश्यम् एको वृद्धो व्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते भो भोः पान्था इदं सुवर्णकङ्कणं गृह्यताम्। ततो लोभाकृष्टेन केनचित् पान्थेनालोचितं भाग्येनैतत् सम्भवति। किन्त्वस्मिन् आत्मसन्देहे (२) प्रवृत्तिर्न विधेया। तन्निरूपयामि तावत्। प्रकाशं ब्रूते कुत्र तव कङ्कणम्। व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत् कथं मारात्मके त्वयि विश्वासः।

व्याघ्र उवाच शृणु रे पान्थ प्रागेव यौवनदशायामतिदुर्वृत्तोऽभवम्। अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च। वंशहीनश्चाहम्। ततः केनचि-

---

(१) संप्राप्तः आक्रान्तः।

(२) आत्मसन्देहे आत्मविनाशशङ्कायुक्ते विषये इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धार्म्मिकेणाहमुपदिष्टः दानधर्म्मादिकञ्चरतु भवान् । तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलित-नखदन्तः न कथं विश्वासभूमिः । मम चैतावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि । तथापि व्याघ्रो मानुषं खाद-तीति लोकापवादो दुर्निवारः । मया च धर्म्मशास्त्रा-ण्यधीतानि । शृणु

प्राणा यथात्मनोऽभीष्टा भूतानामपि (१) ते तथा ।
आत्मौपम्येन (२) भूतानां दयां कुर्व्वन्ति साधवः ॥

त्वञ्चातीव दुर्गतस्तेन तत्तुभ्यं दातुं सयत्नोऽहम् । तथाचोक्तम्

दरिद्रान् भर कौन्तेय (३) मा प्रयच्छेश्वरे (४) धनम् ।
व्याधितस्यौषधं पथ्यं निरुजस्य किमौषधैः ॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण ।

ततो यावदसौ तद्वचःप्रतीतो (५) लोभात् सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः ।

---

(१) भूतानामपि आत्मभिन्नप्राणिनामपि ।
(२) आत्मौपम्येन आत्मतुलनया ।
(३) कौन्तेय कुन्तीतनय । युधिष्ठिरसम्बोधनमिदम् ।
(४) ईश्वरे धनशालिनि ।
(५) तद्वचःप्रतीतः व्याघ्रवचसि कृतविश्वासः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तं पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् अहह महापङ्के पतितोऽसि अतस्त्वामहमुत्थापयामि। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत्

न धर्म्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः (१) ॥

अपरञ्च

सर्व्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।
अतीत्य (२) हि गुणान् सर्व्वान् स्वभावो मूर्द्ध्नि वर्त्तते ॥

तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वासः कृतः। इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च। अतः सर्व्वथा अविचारितं कर्म्म न कर्त्तव्यमिति।

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह आः किमेवमुच्यते

---

(१) अयं धर्म्मशास्त्रं पठति इति इत्येतद् दुरात्मनो न कारणं न धर्म्मप्रवृत्तिकारणं नापि वेदाध्ययनं दुरात्मनो धर्म्म-प्रवृत्तिकारणमिति शेषः। अत्र संसारे स्वभाव एव तथा तद्वत् अतिरिच्यते प्रबलो भवति यथा गवां तृणभक्षिणी-नामपीति शेषः पयः प्रकृत्या स्वभावेन मधुरम्। यस्य हि यादृशः स्वभावः केनापि कारणेन न तद्वैपरीत्यं सम्भव-तीति भावः।

(२) अतीत्य अतिक्रम्य अभिभूयेति यावत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृद्धस्य वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्व्वत्रैवं विचारे तु भोजनेऽप्यप्रवर्त्तनम् ॥

यतः

शङ्काभिः सर्व्वमाक्रान्तमन्नं पानञ्च भूतले ।
प्रवृत्तिः कुत्र कर्त्तव्या जीवितव्यं कथं नु वा ॥
ईर्षी घृणी (१) त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ॥

अनन्तरं सर्व्वे तण्डुलकणलोभेन नभोमण्डलादवतीर्य्य जालनिबद्धा बभूवुः ।

ततो यस्य वचनात्तत्रावलम्बितास्तं सर्व्वे तिरस्कुर्व्वन्ति स्म । यतः

न गणस्याग्रतो (२) गच्छेत् सिद्धे कार्य्ये समं फलम् ।
यदि कार्य्यविपत्तिः (३) स्यान्मुखरस्तत्र (४) हन्यते ॥

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच नायमस्य दोषः ।

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने (५) ॥

---

(१) घृणी दयालुः सर्व्वदा सर्व्वत्र जुगुप्साशीलो वा ।
(२) गणस्य समूहस्य बहूनामिति यावत् ।
(३) कार्य्यविपत्तिः कार्य्यध्वंसः ।
(४) मुखरः अग्रयायी ।
(५) दोहनकाले धेनुजङ्घायां वत्सं बध्नाति यद्यन्यः कश्चित् वत्सरोधनोपायो न विद्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्य्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् । यतः

विपदि धैर्य्यमथाभ्युदये क्षमा (१)
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ (२)
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

अन्यञ्च

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा (३) भयं क्रोध आलस्यं दीर्घसूत्रता ॥

इदानीमेवं क्रियतां सर्व्वैरेकचित्तीभूय जालमादाय उड्डीयताम् । यतः

अल्पानामपि वस्तूनां संहतिः (४) कार्य्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥

इति श्रुत्वा पक्षिणः सर्व्वे जालमादाय उत्पतिताः । अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावितोऽचिन्तयत्

संहतास्तु हरन्तीमे जालं मम विहङ्गमाः ।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥

---

(१) अभ्युदये सम्पत्काले क्षमा औद्धत्यविरहः अहङ्काराहित्यमिति यावत् ।
(२) श्रुतौ शास्त्रे व्यसनम् आसक्तिः ।
(३) तन्द्रा अनुत्साहः कार्य्यवैमुख्यमिति यावत् ।
(४) संहतिः समवायः मिलनमिति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लतस्तेषु चक्षुर्विषयमतिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः ।

अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः किमिदानीं कर्त्तुमुचितम् । चित्रग्रीव उवाच अस्माकं मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने निवसति सोऽस्माकं पाशांश्छेत्स्यति । इत्यालोच्य सर्व्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च सर्व्वदा पापशङ्कया(१) शतद्वारं विवरं कृत्वा निवसति । ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः ।

चित्रग्रीव उवाच सखे हिरण्यक कथमस्मान् न सम्भाषसे । ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससम्भ्रमं वहिर्निःसृत्याब्रवीत् आः पुण्यवानस्मि प्रियसुहृन्मे चित्रग्रीवः समायातः ।

यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् (२) ॥

अथ पाशबद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा उवाच सखे किमेतत् । चित्रग्रीव उवाच सखे अस्माकमविमृश्यकारितायाः फलमेतत् ।

---

(१) पापशङ्कया अनिष्टसङ्घटनभयेन ।

(२) सम्भाषः आलापः । संस्थितिः सहावस्थितिः एकत्रावस्थानमिति यावत् । संलापो भाषणं मिथः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रोगशोकपरीतापबन्धनव्यसनानि (१) च ।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् ॥

मूषिकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति । चित्रग्रीव उवाच मित्र मैवं कुरु । पूर्व्वमस्मदाश्रितानामेषां तावत् पाशांश्छिन्धि मम पाशं पश्चात् छेत्स्यसि । हिरण्यकोऽप्याह अहमल्पशक्तिः दन्ताश्च मे कोमलाः तदेतेषां पाशांश्छेत्तुं कथं समर्थः । तत् यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशं छिनद्मि । अनन्तरमेतेषामपि बन्धनं यावच्छक्यं छेत्स्यामि । चित्रग्रीव उवाच अस्त्येवं तथापि यथाशक्ति बन्धनमेतेषां खण्डय ।

हिरण्यकेनोक्तम् आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिवेदिनां सम्मतम् । यतः

धर्म्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः (२) ।
तान्निघ्नता किन्न हतं रक्षता किन्न रक्षितम् ॥

चित्रग्रीव उवाच नीतिस्तावदीदृश्येव । किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्व्वथैवासमर्थस्तेनेदं ब्रवीमि । अयमपरश्चासाधारणो हेतुः

जातिद्रव्यबलानाञ्च (३) साम्यमेषां मया सह ।
मत्प्रभुत्वफलं ब्रूहि कदा किन्तद्भविष्यति ॥

---

(१) व्यसनं विपत् ।
(२) संस्थितिहेतवः रक्षाकारणानि ।
(३) द्रव्यं सम्पत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किञ्च

धनानि जीवितञ्चैव परार्थे प्राज्ञः उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥

यदि नित्यमनित्येन निर्म्मलं मलवाहिना ।
यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम् ॥

शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्न-ब्रवीत् साधु मित्र साधु अनेनाश्रितवात्सल्येन त्रैलोक्य-स्यापि प्रभुत्वं त्वयि युज्यते । एवमुक्त्वा तेन सर्व्वेषां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्व्वान् सादरं सम्पूज्याह सखे चित्रग्रीव सर्व्वथा अत्र जालबन्धनविधौ सति दोषमाशङ्क्य आत्मन्यवज्ञा न कर्त्तव्या । इति प्रबोध्यातिथ्यं कृत्वा आलिङ्ग्य च संप्रेषितश्चित्रग्रीवः सपरिवारो यथेष्टदेशान् ययौ । हिरण्यकोऽपि स्वविवरं प्रविष्टः ।

अथ लघुपतनकनामा वायसः सर्व्ववृत्तान्तदर्शी साश्चर्य्यमिदमाह अहो हिरण्यक श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीमिच्छामि । त्वं मां मैत्र्येणानुग्रहीतुमर्हसि । एतच्छ्रुत्वा हिरण्यको विवराभ्यन्तरादाह कस्त्वम् । स ब्रूते लघुपतनकनामा वायसो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽहम् । हिरण्यको विहस्याह भ्रातः का त्वया सह मैत्री । यतः

यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् ।
अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति ॥

अपरञ्च

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं मतम् ।
शृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥

वायसोऽब्रवीत् कथमेतत् । हिरण्यकः कथयति ।

अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेनावलोकितः । तं दृष्ट्वा शृगालोऽचिन्तयत् आः कथमेतन्मांसं सुललितं (१) भक्षयामि । भवतु विश्वासं तावदुत्पादयामि । इत्यालोच्य उपसृत्याब्रवीत् मित्र कुशलं ते । मृगेणोक्तं कस्त्वम् । स ब्रूते क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो मृतवन्निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि । अधुना तवानुचरेण मया सर्वथा भवितव्यमिति । मृगेणोक्तमेवमस्तु ।

ततः पश्चादस्तं गते सवितरि भगवति मरीचि-

(१) सुललितम् अतिमनोहरम् अत्यन्तमधुरमित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आलिनि तौ मृगस्य वासभूमिं गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काकोऽवदत् सखे कोऽयं द्वितीयः । मृगो ब्रूते जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः । काको ब्रूते मित्र अकस्मादागन्तुना (१) सह मैत्री न युक्ता । तथाचोक्तम्

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥

तावाहतुः कथमेतत् । काकः कथयति

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्व्वते महान् पर्क्कटी वृक्षः । तस्य कोटरे जरद्गवनामा वृद्धो गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चिदुद्धृत्य ददति तेनासौ जीवति ।

अथ कदाचिद्दीर्घकर्णनामा मार्ज्जारः पक्षिशावकान् भक्षयितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्त्तैः कोलाहलः कृतः । तं श्रुत्वा जरद्गवेनोक्तं कोऽयमायाति । दीर्घकर्णो गृध्रमवलोक्य सभयमाह हा हतोऽस्मि । अथवा

---

(१) आगन्तुना नवागतेन अज्ञातकुलशीलेन जनेनेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तावद्भयस्य (१) भेतव्यं यावद्भयमनागतम् ।
आगतन्तु भयं वीक्ष्य प्रतिकुर्य्याद्यथोचितम् ॥

अधुना सन्निधाने (२) पलायितुमक्षमः । भवतु तावत् विश्वासमुत्पाद्य अस्य समीपमुपगच्छामि । इत्यालोच्य उपसृत्याब्रवीत् आर्य्य त्वामभिवन्दे । गृध्रोऽवदत् कस्त्वम् । सोऽवदत् मार्ज्जारोऽहम् । गृध्रो ब्रूते दूरमपसर न चेद्धन्तव्योऽसि मया । मार्ज्जारोऽवदत् श्रूयतां तावत् मम वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यः ।

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥

गृध्रो ब्रूते ब्रूहि किमर्थमागतोऽसि ।

सोऽवदत् अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि । युष्मान् धर्म्मज्ञानरतान् विश्वासभूमय इति पक्षिणः सर्व्वे सर्व्वदा ममाग्रे प्रस्तुवन्ति (३)। अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्म्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्म्मज्ञाः यन्मामतिथिं हन्तुमुद्यताः । गृहस्थधर्म्मश्चैष

---

(१) भयस्य भयात् । सम्बन्धविवक्षया षष्ठी ।

(२) जरद्गवस्येति शेषः ।

(३) प्रस्तुवन्ति वर्णयन्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अरावप्युचितं कार्य्यमातिथ्यं गृहमागते।
छेत्तुः पार्श्वगताच्छायां (१) नोपसंहरति द्रुमः॥

यदि वा धनं नास्ति तदा प्रीतिवचसाप्यतिथिः पूज्यत एव। यतः

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता (२)।
एतान्यपि सतां गेहे नोच्छिद्यन्ते (३) कदाचन॥

अन्यच्च

उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः।
पूजनीयो यथायोग्यं सर्व्वदेवमयोऽतिथिः॥

गृध्रोऽवदत् मार्ज्जारा हि मांसरुचयः पक्षिशावकाश्चात्र निवसन्ति तेनाहमेवं ब्रवीमि। तच्छ्रुत्वा मार्ज्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च मया धर्म्मशास्त्रं श्रुत्वा वीतरागेणेदं (४) दुष्करं चान्द्रायणमध्यवसितम् (५)। यतः परस्परं विवदमानानामपि धर्म्मशास्त्राणां अहिंसा परमो धर्म्म इत्यत्रैकमत्यम्।

---

(१) पार्श्वगतात् पार्श्ववर्त्तिनः।

(२) तृणानि तृणनिर्म्मितमासनम् भूमिः विश्रामार्थं स्थानम् उदकं पादप्रक्षालनार्थं जलम् सूनृता वाक् मधुरसम्भाषणम्।

(३) न उच्छिद्यन्ते न प्रत्यादिश्यन्ते अन्नाभावे आसनादिचतुष्टयं अतिथयेऽवश्यदेयमिति भावः।

(४) वीतरागेण वीतस्पृहेण भोग्यवस्तुषु स्पृहाशून्येनेत्यर्थः।

(५) अध्यवसितम् अनुष्ठितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्व्वहिंसानिवृत्ता ये नराः सर्व्वसहाश्च ये ।
सर्व्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥
एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति ॥
योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम् ।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥
स्वच्छन्दवनजातेन शाकेनापि प्रपूर्य्यते (१) ।
अस्य दग्धोदरस्यार्थे कः कुर्य्यात् पातकं महत् ॥

एवं विश्वास्य स मार्ज्जारस्तरुकोटरे स्थितः ।

ततोऽसौ दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । येषामपत्यानि खादितानि तैः शोकार्त्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत् परिज्ञाय मार्ज्जारः कोटरान्निःसृत्य बहिः पलायितः । पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र (२) तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरम् अनेनैव जरद्गवेनास्माकं शावकाः खादिता इति सर्व्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः ।

इत्याकर्ण्य जम्बुकः सकोपमाह मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एवासीत् । तत् कथं

---

(१) उदरमिति शेषः ।
(२) निरूपयद्भिः अन्विष्यद्भिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवता सह एतस्य स्नेहानुवृत्तिरुत्तरोत्तरं (१) वर्द्धते।
अथवा

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते॥
अयं निजः परो वेति गणना लघुचेतसाम् (२)।
उदारचरितानान्तु वसुधैव कुटुम्बकम् (३)॥

यथायं मृगो मम बन्धुस्तथा भवानपि। मृगोऽब्रवीत् किमनेनोत्तरेण (४)। सर्व्वैरेकत्र विस्रम्भालापैः (५) सुखमनुभवद्भिः स्थीयताम्। यतः

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा॥

काकेनोक्तमेवमस्तु

एकदा निभृतं शृगालो ब्रूते सखे मृग अस्मिन् वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति। तदहं त्वां नीत्वा दर्शयामि। तथा कृते सति मृगः प्रत्यहं तत्र गत्वा शस्यं खादति। अथ क्षेत्रपतिना क्षेत्रं दृष्ट्वा पाशो

---

(१) स्नेहानुवृत्तिः प्रणयबन्धनम्।

(२) लघुचेतसाम् असारचित्तानाम्।

(३) उदारचरितानां महात्मनां पुनर्वसुधा पृथिव्येव कुटुम्बकं कुलम् तादृशाः पुरुषाः सर्व्वानेव वसुधावासिनो भ्रातॄन् मन्यन्त इत्यर्थः।

(४) किमनेनोत्तरेण उत्तरोत्तरवाक्प्रपञ्चेनालमित्यर्थः।

(५) विस्रम्भालापैः विश्वासपूर्णैः प्रणयगर्भैर्वा सम्भाषैः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

योजितः । अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत् को मामितः कालपाशादिव व्याधपाशात्त्रातुं समर्थो मित्रादन्यः । अनन्तरं जम्बुकस्तत्रागत्य उपस्थितोऽचिन्तयत् फलिता तावदस्माकं कपटप्रबन्धेन (१) मनोरथसिद्धिः । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तानि अस्थीनि मयावश्यं प्राप्तव्यानि । तानि च बाहुल्येन भोजनानि भविष्यन्ति । मृगस्तं दृष्ट्वोल्लासितो ब्रूते सखे छिन्धि तावन्मम बन्धनं सत्वरं त्रायस्व माम् । यतः

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥

जम्बुकः पाशं विलोक्याचिन्तयत् दृढस्तावदयं बन्धः । ब्रूते च सखे स्नायुनिर्म्मिताः (२) पाशाः तदद्य भट्टारकवारे (३) कथमेतान् दन्तैः स्पृशामि । मित्र यदि चित्ते नान्यथा मन्यसे तदा प्रभाते यत्त्वया वक्तव्यं तत् कर्त्तव्यमिति ।

अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततोऽन्विष्यन् तथाविधं दृष्ट्वोवाच सखे किमे-

---

(१) कपटप्रबन्धेन छलप्रयोगेण ।
(२) स्नायुभिः देहान्तर्वर्त्तिभिर्नाड़ीविशेषैः निर्मिताः घटिताः ।
(३) भट्टारकवारे रविवासरे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत् । मृगेणोक्तम् अवधीरितसुहृद्वाक्यस्य फलमेतत् । तथाचोक्तम्

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः (१) ॥

काको ब्रूते स वञ्चकः क्वास्ते । मृगेणोक्तं मन्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते उक्तमेव मया पूर्व्वम् ।

अपराधो न मेऽस्तीति नैतद्विश्वासकारणम् ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्ज्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् (२) ॥

ततः काको दीर्घं निश्वस्य प्राह अरे वञ्चक किं त्वया पापकर्म्मणा कृतम् ।

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसन्धं (३) भगवति वसुधे कथं वहसि ॥

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशं गच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तं सखे मृग त्वमात्मानं मृतवत् सन्दर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ । अहं तव चक्षुषी चञ्च्वा विलिखामि ।

---

(१) शत्रुनन्दनः शत्रूणामानन्दकरः ।
(२) अत्र इव इति पदमध्याहार्य्यम् । पयोमुखं विषकुम्भमिव तत्सदृशमित्यर्थः ।
(३) असत्ये वञ्चनायां सन्धा अभिसन्धिर्यस्य तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदाहं शब्दं करोमि त्वमुत्थाय सत्वरं पलायिष्यसे। मृगस्तथैव काकवचनेन स्थितः। ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः। अथासौ आः स्वयं मृतोऽसि इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान् ग्रहीतुं सत्वरो बभूव। ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः। तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो व्यापादितः।

एतत् श्रुत्वा लघुपतनकः पुनराह

भक्षितेनापि भवता नाहारो मम पुष्कलः (१)।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ (२)॥

हिरण्यको ब्रूते चपलस्त्वं चपलेन सह स्नेहः सर्व्वथा न कर्त्तव्यः। किञ्चान्यत् शत्रुपक्षो भवानस्माकम्। उक्तञ्चैतत्

शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि (३) सन्धिना।
सुतप्तमपि पानीयं शमयत्येव पावकम्॥
दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥

लघुपतनको ब्रूते श्रुतं मया सर्व्वम्। तथापि

---

(१) पुष्कलः प्रभूतः प्रचुर इति यावत्।

(२) अनघ निष्पाप विशुद्धचरित इति यावत्। हिरण्यकसम्बोधनमिदम्।

(३) सुश्लिष्टेन सुघटितेन दृढेनेति यावत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ममैतावानेव सङ्कल्पः यत् त्वया सह सौहृद्यमवश्यं करणीयमिति। नो चेदनाहारेणात्मानं तव द्वारि व्यापादयिष्यामि।

एतद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह आप्यायितोऽहं भवतामनेन वचनामृतेन। किञ्च

रहस्यभेदो (१) याच्ञा च नैष्ठुर्य्यं चलचित्तता (२)।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम्॥

एतद्वचनोक्तमेकमपि दूषणं त्वयि न लक्ष्यते। तद्भवतु भवतोऽभिमतमेव। इत्युक्त्वा हिरण्यको मैत्रं विधाय भोजनविशेषैर्वायसं सन्तोष्य विवरं प्रविष्टः। वायसोऽपि स्वस्थानं गतः। ततः प्रभृति तयोरन्योन्याहारप्रदानेन कुशलप्रश्नैर्विस्रम्भालापैश्च कालोऽतिवर्त्तते।

एकदा लघुपतनको हिरण्यकमाह सखे वायसस्य कष्टलभ्याहारमिदं स्थानम्। तदेतत् परित्यज्य स्थानान्तरं गन्तुमिच्छामि। हिरण्यको ब्रूते मित्र क्व गन्तव्यम्। वायसो ब्रूते अस्ति सुनिरूपितं स्थानम्। हिरण्यकोऽवदत् किन्तत्। वायसो ब्रूते अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः। तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कूर्म्मः सहज-

(१) रहस्यं गुप्तमन्त्रणं तस्य भेदः अन्यसन्निधौ प्रकाशनम्।
(२) चलचित्तता अव्यवस्थितचित्तता।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धार्म्मिकः(१)प्रतिवसति । स च भोजनविशेषैर्मां संवर्द्धयिष्यति । हिरण्यकोऽप्याह तत् किमत्रावस्थाय मया कर्त्तव्यं मामपि तत्र नय ।

अथ वायसस्तेन मित्रेण सह चित्रालापसुखेन तस्य सरसः समीपं ययौ । ततो मन्थरो दूरादेव लघुपतनकमालोक्य उत्थाय यथोचितमातिथ्यं विधाय मूषिकस्याप्यतिथिसत्कारं चकार । वायसोऽवदत् सखे मन्थर सविशेषपूजामस्मै विधेहि । यतोऽयं पुण्यकर्म्मणां धुरीणः (२) कारुण्यरत्नाकरो हिरण्यको नाम मूषिकराजः । एतस्य गुणस्तुतिं जिह्वासहस्रेण यदि सर्पराजः कदाचित् कर्त्तुं समर्थः स्यादित्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान् । ततो मन्थरः सादरं हिरण्यकं संपूज्याह भद्र आत्मनो निर्जनवनागमनकारणमाख्यातुमर्हसि । हिरण्यकोऽवदत् कथयामि श्रूयताम् ।

अस्ति चम्पकाभिधानायां नगर्य्यां परिव्राजकावसथः (३) । तत्र चूड़ाकर्णो नाम परिव्राजकः प्रतिवसति । स च भोजनावशिष्टभिक्षान्नसहितं भिक्षा-

---

(१) सहजधार्म्मिकः प्रकृत्यैव धर्म्मपरायणः ।

(२) धुरीणः धुरि अग्रे स्थितः अग्रगण्य इति यावत् ।

(३) आवसथः वासस्थानम् आश्रम इति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पात्रं नागदन्तकेऽवस्थाप्य (१) स्वपिति। अहञ्च तदन्न-मुत्प्लुत्य प्रत्यहं भक्षयामि। एकदा तस्य प्रियसुहृत् वीणाकर्णो नाम परिव्राजकः समायातः। तेन सह कथाप्रसङ्गावस्थितो मम त्रासार्थं जर्ज्जरवंशखण्डेन(२) चूड़ाकर्णो भूमिमताडयत्। वीणाकर्ण उवाच सखे किमिति मम कथाविरक्तोऽन्यासक्तो भवान्। चूडाकर्ण उवाच भद्र नाहं विरक्तः किन्तु पश्यायं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति। वीणाकर्णो नागदन्तकं विलोक्याह कथं मूषिकः स्वल्पबलोऽप्येतावद्दूरमुत्पतति। तदत्र केनापि कार-णेन भवितव्यम्। क्षणं विचिन्त्य परिव्राजकेनोक्तं कारणञ्चात्र धनबाहुल्यमेव प्रतिभाति। यतः

धनवान् बलवान् लोके सर्व्वः सर्व्वत्र सर्व्वदा।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते॥

ततः खनित्रमादाय तेन विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम्। ततः प्रत्यहं निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दं मन्दमुपसर्पन् चूडाकर्णेनावलोकितोऽहम्। तत-स्तेनोक्तम्

(१) नागदन्तः गृहभित्तौ प्रोतो दण्डविशेषः। स्वार्थे कन्।
(२) जर्ज्जरः विशीर्णः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्थेन बलवान् सर्वः अर्थाद्भवति पण्डितः ।
पश्यायं मूषिकः पापः स्वजातिसमतां गतः ॥

एतदाकर्ण्य मयालोचितं ममात्रावस्थानमयुक्तमिदानीम् । यच्चान्यस्मै एतद्वृत्तान्तकथनं तदप्यनुचितम् यच्च याच्ञया जीवनं तदप्यतीव गर्हितम् । तत् किमहं परपिण्डेनात्मानं पोषयामि कष्टं भोः तदपि द्वितीयं मृत्युद्वारम् । यतः

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥

इत्यालोच्यापि लोभात् पुनरपि तदीयमन्नं ग्रहीतुं ग्रहमकरवम् (१) ।

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् (२) ।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥

ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्ज्जरवंशखण्डेन ताडितोऽचिन्तयं लुब्धो ह्यसन्तुष्टो नियतमात्मद्रोही भवति ।

सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम् ।
सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ॥
सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥

---

(१) ग्रहम् उद्यमम् ।

(२) तृषाम् अत्युत्कटामिच्छाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

असेवितेश्वरद्वारमदृष्टविरहव्ययम्।
अनुक्तक्लीववचनं धन्यं कस्यापि जीवनम्॥
न योजनशतं दूरं बाध्यमानस्य तृष्णया।
सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः॥

तदत्रावस्थोचितकार्य्यपरिच्छेदः (१) श्रेयान्। दूत्यालोच्याहं निर्जनवनमागतः। ततोऽस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्या अनुगृहीतः। अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः।

एवं ते स्वेच्छाहारविहारं कुर्व्वाणाः सन्तुष्टाः सुखं निवसन्ति स्म।

अथ कदाचित् चित्राङ्गनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः। ततः पश्चादायान्तं भयहेतुं सम्भाव्य मन्थरो जलं प्रविष्टः मूषिकश्च विवरं गतः काकोऽपि उड्डीय वृक्षमारूढः। ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न कोऽप्यवलोकितः। पश्चात्तद्वचनादागत्य पुनः सर्व्वे मिलित्वा तत्रैवोपविष्टाः। मन्थरेणोक्तं भद्र मृग कुशलं ते। स्वेच्छया उदकाद्याहारोऽनुभूयताम्। अत्रावस्थानेन वनमिदं सनाथीक्रियताम् (२)।

---

(१) अवस्थोचितकार्य्यपरिच्छेदः अवस्थानुरूपकार्य्यनिर्णयः।

(२) वनमिदं त्वया विना अनाथमिवासीत् अधुना अत्रावस्थाय नाथयुक्तं कुर्व्विति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चित्राङ्गो ब्रूते लुब्धकत्रासितोऽहं भवतां शरणमागतः (१) भवद्भिः सह सख्यमिच्छामि । हिरण्यकोऽवदत् मित्रत्वं तावदस्माभिः सह अयत्नेनैव निष्पन्नं भवतः तदत्र भवता स्वगृहनिर्विशेषेण (२) स्थीयताम् । तच्छ्रुत्वा मृगः सानन्दः कृतस्वेच्छाहारः पानीयं पीत्वा जलासन्नतरुच्छायायामुपविष्टः ।

अथ मन्थरेणोक्तं सखे मृग केन त्रासितोऽसि । अस्मिन् विजने वने कदाचित् किं व्याधाः सञ्चरन्ति । मृगेणोक्तम् अस्ति कलिङ्गविषये (३) रुक्माङ्गदो नाम नृपतिः । स च दिग्विजयव्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावासितकटको (४) वर्त्तते । प्रातश्च तेनात्रागत्य कर्पूरसरःसमीपे भवितव्यमिति व्याधानां मुखात् किंवदन्ती श्रूयते । तदत्रापि प्रातरवस्थानं भयहेतुरित्यालोच्य यथाकार्य्यं तथारभ्यताम् । तच्छ्रुत्वा कूर्म्मः सभयमाह मित्र जलाशयान्तरं गच्छामि । काकमृगावपि उक्तवन्तौ मित्र एवमस्तु । ततो हिर-

---

(१) शरणं गृहम् आवासभूमिमिति यावत् ।

(२) स्वगृहे इव स्वगृहे यथा स्वच्छन्दं स्थीयते तद्वदित्यर्थः ।

(३) कलिङ्गविषये कलिङ्गाख्ये देशे ।

(४) समावासितकटकः सन्निवेशितशिबिरः कृतशिबिरसन्निवेश इति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ण्यको विश्वासाच्च पुनर्जलाशये प्राप्ते मन्थरस्य कुशलं स्थले गच्छतोऽस्य कः प्रकारः (१) ।

तद्धि तस्य वचनमाकर्ण्य महता भयेन विमुग्ध इव तं जलाशयमुत्सृज्य मन्थरश्चलितः। तेऽपि हिरण्यकादयः स्नेहादनिष्टं शङ्कमाना मन्थरमनुजग्मुः। ततः स्थले गच्छन् केनापि व्याधेन काननं पर्य्यटता मन्थरः प्राप्तः। तं च गृहीत्वा उत्थाप्य धनुषि बद्धा धन्योऽस्मीत्यभिधाय व्याधः स्वगृहाभिमुखं चलितः।

अथ ते मृगवायसमूषिकाः परं विषादमुपगतास्तमनुगच्छन्ति स्म। ततो हिरण्यको विलपति।

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति॥

स्वभावजन्तु यन्मित्रं भाग्येनैवाभिजायते।
तदकृत्रिमसौहार्द्दमापत्स्वपि न मुञ्चति (२)॥

न मातरि न दारेषु न सोदर्य्ये न चात्मजे।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे॥

इति मुहुर्विचिन्त्य प्राह अहो मे दुर्दैवम्। अथवा इत्थमेवैतत्।

कायः सन्निहितापायः सम्पदः पदमापदाम्।
समागमाः सापगमाः सर्व्वमुत्पादि भङ्गुरम्॥

---

(१) स्थले गमनसमयेऽस्य का गतिः।
(२) मित्रमिति शेषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम्। तावूचतुः सत्वरं कार्य्यमुपदिश। हिरण्यको ब्रूते चित्राङ्गो जलसमीपं गत्वा मृतमिव आत्मानं निश्चेष्टं दर्शयतु। लघुपतनकश्च तस्योपरि स्थित्वा चञ्च्वा किमपि विलिखतु। नूनमनेन लुब्धकेन मृगमांसार्थिना कच्छपं परित्यज्य सत्वरं तत्र गन्तव्यम्। ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि। सन्निहिते लुब्धके भवद्भ्यां पलायितव्यम्।

ततश्चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथा अनुष्ठिते सति स व्याधः श्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टस्तथाविधं मृगमवलोक्य कच्छपं जलसमीपे निधाय कर्त्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः। अत्रान्तरे हिरण्यकेनागत्य छिन्नबन्धनः स कूर्म्मः सत्वरं जलाशयं प्रविष्टः। स च मृग आसन्नं तं व्याधमालोक्योत्थाय द्रुतं पलायितः। उक्तञ्च

> यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते।
> ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि॥

ततोऽसौ निराशः कटकं प्रविष्टः। मन्थरादयश्च सर्व्वे मुक्तापदः (१) स्वस्थानं गत्वा यथासुखमास्थिताः।

---

(१) मुक्तापदः आपन्मुक्ताः। मुक्ता त्यक्ता अतिक्रान्ता इति यावत् आपत् यैः ते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विष्णुपुराणम् ।

इन्द्रं प्रति दुर्व्वाससः कोपः

पराशर उवाच ।

दुर्व्वासाः शङ्करस्यांशश्चचार (१) पृथिवीमिमाम् ।
स ददर्श स्रजं दिव्यामृषिर्विद्याधरीकरे ॥
सन्तानकानामखिलं (२) यस्या गन्धेन वासितम् ।
अतिसेव्यमभूद् ब्रह्मंस्तद्वनं (३) वनचारिणाम् ॥
उन्मत्तव्रतधृग्विप्रः (४) स दृष्ट्वा शोभनां स्रजम् ।
तां ययाचे वरारोहां (५) विद्याधरवधूं ततः ॥
याचिता तेन तन्वङ्गी मालां विद्याधराङ्गना ।

---

(१) शङ्करस्यांशः शङ्करांशेनोत्पन्नः ।

(२) सन्तानकाः देवतरुविशेषाः तेषामखिलं वनमित्यन्वयः ।

(३) ब्रह्मन्निति मैत्रेयस्याम्बोधनम् ।

(४) उन्मत्तव्रतधृक् उन्मत्तवेशधारी उन्मत्त इव लक्ष्यमाण इत्यर्थः ।

(५) वरारोहां रूपलावण्यसम्पन्नाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ददौ तस्मै विद्याधरी सादरं प्रणिपत्य तम् ॥
तामादायात्मनो मूर्ध्नि स्रजमुन्मत्तरूपधृत् ।
कृत्वा (१) स विप्रो मैत्रेय परिबभ्राम मेदिनीम् ॥

स ददर्श समायान्तमुन्मत्तैरावतस्थितम् ।
त्रैलोक्याधिपतिं देवं सह देवैः शचीपतिम् ॥
तामात्मनः स शिरसः स्रजमुन्मत्तषट्पदाम् ।
आदायामरराजाय चिक्षेपोन्मत्तवन्मुनिः ॥
गृहीत्वामरराजेन स्रगैरावतमूर्द्धनि ।
न्यस्ता रराज कैलासशिखरे जाह्नवी यथा ॥
मदान्धकारिताक्षोऽसौ (२) गन्धाकृष्टेन वारणः ।
करेणाकृष्य चिक्षेप तां स्रजं धरणीतले ॥
ततश्चुक्रोध भगवान् दुर्व्वासा मुनिपुङ्गवः ।
मैत्रेय देवराजं तं क्रुद्धश्चैतदुवाच ह ॥

ऐश्वर्य्यमत्त दुष्टात्मन्नतिस्तब्धोऽसि (३) वासव ।
श्रियो धाम (४) स्रजं यस्त्वं मद्दत्तां नाभिनन्दसि ॥
प्रसाद इति नोक्तं ते (५) प्रणिपातपुरःसरम् ।

---

(१) तां स्रजमादाय आत्मनो मूर्द्धि कृत्वेत्यन्वयः ।
(२) मदेन अन्धकारिते निमीलिते अक्षिणी यस्य सः ।
(३) अतिस्तब्धः अतिगर्व्वितः ।
(४) श्रियो धाम लक्ष्म्या निवासभूमिम् ।
(५) ते त्वया । आर्षः प्रयोगः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हर्षोत्फुल्लकपोलेन (१) न चापि शिरसा धृता ॥
मया दत्तामिमां मालां यस्मान्न बहु मन्यसे ।
त्रैलोक्यश्रीरतो (२) मूढ़ विनाशमुपयास्यति ॥
मां मन्यतेऽन्यैः सदृशं नूनं शक्र भवान् द्विजैः ।
अतोऽवमाननास्माकं मानिना (३) भवता कृता ॥
मद्दत्ता भवता यस्मात् क्षिप्ता माला महीतले ।
तस्मात् प्रनष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति ॥
यस्य सञ्जातकोपस्य (४) भयमेति चराचरम् ।
तं त्वं मामतिगर्व्वेण देवराजावमन्यसे ॥

महेन्द्रो वारणस्कन्धादवतीर्य्य त्वरान्वितः ।
प्रसादयामास तदा दुर्व्वाससमकल्मषम् ॥
प्रसाद्यमानः स तदा प्रणिपातपुरःसरम् ।
प्रत्युवाच सहस्राक्षं दुर्व्वासा मुनिसत्तमः ॥
नाहं कृपालुहृदयो न च मां भजते क्षमा ।

---

(१) हर्षेण उत्फुल्लौ विकसितौ कपोलौ गण्डौ यस्य तथाभूतेन सता ।

(२) त्रैलोक्यश्रीः त्रैलोक्यैश्वर्य्यम् । अतः अस्मात् मद्दत्तमालाया बहुमानाकरणदोषादित्यर्थः ।

(३) मानिना गर्व्वितेन ।

(४) यस्मात् सञ्जातकोपात् । अपादाने षष्ठीप्रयोग आर्षः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्ये ते मुनयः (१) शक्र दुर्व्वाससमवेहि माम् ॥
गोतमादिभिरन्यैस्त्वं गर्व्वमापादितो मुधा ।
अक्षान्तिसारसर्व्वस्वं (२) दुर्व्वाससमवेहि माम् ॥
वशिष्ठाद्यैर्दयासारैः (३) स्तोत्रं कुर्व्वद्भिरुच्चकैः ।
गर्व्वं गतोऽसि (४) येनैव मामप्यद्यावमन्यसे ॥
ज्वलज्जटाकलापस्य भ्रुकुटीकुटिलं मुखम् ।
निरीक्ष्य कस्त्रिभुवने मम यो न गतो भयम् (५) ॥
नाहं क्षमिष्ये बहुना किमुक्तेन शतक्रतो ।
विडम्बनामिमां भूयः करोष्यनुनयात्मिकाम् (६) ॥
इत्युक्त्वा प्रययौ विप्रो देवराजोऽपि तं पुनः ।
आरुह्यैरावतं ब्रह्मन् प्रययावमरावतीम् ॥

---

(१) ये कृपालवः क्षमाशीलाश्चेति शेषः ।

(२) अक्षान्तिः अक्षमा सैव सारो बलं तदेव सर्व्वस्वं यस्य स तम् ।

(३) दयासारैः अत्यर्थं दयाशीलैः ।

(४) गतोऽसि गमितोऽसि । अन्तर्भूतोऽण्यर्थः ।

(५) त्रिभुवने ईदृशः को विद्यते यो मम मुखं निरीक्ष्य भयं न गत इत्यन्वयः ।

(६) अनुनयात्मिकां विडम्बनाम् अनुनयरूपां विफलां चेष्टाम् तवानुनये फलं नास्तीति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ध्रुवोपाख्यानम्

पराशर उवाच।

प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य (१) तु ।
द्वौ पुत्रौ सुमहावीर्यौ धर्म्मज्ञौ कथितौ तव (२) ॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
अभीष्टायामभूद्ब्रह्मन् (३) पितुरत्यन्तवल्लभः ॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज ।
स नातिप्रीतिमांस्तस्यां तस्याश्चाभूद्ध्रुवः सुतः ॥
राजासनस्थितस्याङ्कं पितुर्भ्रातरमाश्रितम् (४) ।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥
प्रत्यक्षं भूपतिस्तस्याः सुरुच्या नाभ्यनन्दत (५) ।
प्रणयेनागतं पुत्रमुत्सङ्गारोहणोत्सुकम् ॥

---

(१) स्वयम्भूः ब्रह्मा तस्यापत्यस्य ।

(२) तव मैत्रेयस्य ।

(३) अभीष्टायां प्रेयस्याम् ।

(४) राजासनस्थितस्य पितुरङ्कमाश्रितं भ्रातरमुत्तमं दृष्ट्वेत्यन्वयः । राजासनस्थितस्य सिंहासनारूढस्य । आश्रितम् आरूढम् ।

(५) अभ्यनन्दत आत्मनेपदमार्षम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।
पितुः (१) पुत्त्रं तथारूढं (२) सुरुचिर्वाक्यमब्रवीत् ॥
क्रियते किं वृथा वत्स महानेष मनोरथः ।
अन्यस्त्रीगर्भजातेन ह्यसम्भूय ममोदरे ॥
उत्तमोत्तममप्राप्यमविवेकोऽभिवाञ्छसि (३) ।
सत्यं सुतस्त्वमप्यस्य किन्तु न त्वं मया धृतः ॥
उच्चैर्मनोरथस्तेऽयं (४) मत्पुत्त्रस्येव किं वृथा ।
सुनीत्यामात्मनो जन्म किं त्वया नावगम्यते ॥
उत्सृज्य पितरं बालस्तच्छ्रुत्वा मातृभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विज (५) मन्दिरम् ॥
तं दृष्ट्वा कुपितं पुत्त्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेयैतदभाषत ॥
वत्स कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
सोऽवजानाति पितरं तव यस्तेऽपराध्यति ॥

---

(१) पितुरङ्कारोहणोत्सुकमित्यन्वयः ।

(२) पुत्त्रं तथारूढं स्वपुत्त्रं च पितुरङ्कमारूढं दृष्ट्वा ।

(३) उत्तमोत्तमम् उत्तमेभ्योऽपि उत्तमं सर्व्वोत्तममिति यावत् अप्राप्यं त्वादृशैरल्पभाग्यैः प्राप्तुमशक्यं पितुरङ्कमिति शेषः ।

(४) उच्चैः उन्नतो महानिति यावत् ।

(५) द्विजेति मैत्रेयसम्बोधनम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तः सकलं मात्रे कथयामास (१) तद्यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमपि (२) गर्व्विता ॥
विनिश्वस्येति कथिते तस्मिन् पुत्रे(३)सुदुर्मनाः(४)।
श्वासक्षामेक्षणा (५) दीना सुनीतिर्वाक्यमब्रवीत् ॥
सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्रक ।
न हि पुण्यवतां वत्स सपत्नैरेवमुच्यते (६) ॥
नोद्वेगस्तात (७) कर्त्तव्यः कृतं यद्भवता पुरा (८) ।
तत् कोऽपहर्त्तुं शक्नोति दातुं कश्चाकृतं त्वया ॥
राजासनं तथा छत्रं वराश्वा वरवारणाः ।
यस्य पुण्यानि तस्यैते मत्वैतच्छाम्य (९) पुत्रक ॥

---

(१) ध्रुव इति शेषः ।
(२) भूपालप्रत्यक्षमपि राज्ञः समक्षमेव ।
(३) तस्मिन् पुत्रे विनिश्वस्य इति कथिते कथयति सति । कर्त्तरि निष्ठाप्रयोग आर्षः ।
(४) सुदुर्मनाः अत्यन्तदुःखितहृदया ।
(५) श्वासेन क्षामे क्षीणे म्लाने इति यावत् ईक्षणे नेत्रे यस्याः सा ।
(६) सपत्नैः शत्रुभिः ।
(७) उद्वेगः क्षोभः ।
(८) पुरा पूर्व्वस्मिन् जन्मनि ।
(९) मत्वैतच्छाम्य एतत् मत्वा बुद्ध्वा शाम्य शान्तिं व्रज क्षोभं परित्यजेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्यजन्मकृतैः पुण्यैः (१) सुरुच्यां सुरुचिर्नृपः (२) ।
भार्य्येति प्रोच्यते चान्या मद्विधा भाग्यवर्ज्जिता ॥
पुण्योपचयसम्पन्नस्तस्याः पुत्त्रस्तथोत्तमः ।
मम पुत्त्रस्तथा जातः स्वल्पपुण्यो ध्रुवो भवान् (३) ॥
तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्त्रक ।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान् ॥
यदि वा दुःखमत्यर्थं सुरुच्या वचसा तव ।
तत् पुण्योपचये (४) यत्नं कुरु सर्व्वफलप्रदे ॥
सुशीलो भव धर्म्मात्मा मैत्रः (५) प्राणिहिते रतः ।
निम्नं यथापः प्रवणाः पात्रमायान्ति सम्पदः (६) ॥

ध्रुव उवाच ।

अम्ब यत्त्वमिदं प्रात्थ प्रशमाय (७) वचो मम ।

---

(१) सुरुच्येति शेषः ।

(२) सुरुचिः अतिप्रीतिमान् अत्यन्तमनुरक्त इति यावत् ।

(३) तथा तादृशः मातृसदृश इत्यर्थः ।

(४) पुण्योपचये पुण्यसञ्चये ।

(५) मैत्रः सर्व्वत्र मित्रभावापन्नः ।

(६) आपः जलानि निम्नं प्रदेशमिव सम्पदः प्रवणाः नम्राः सत्यः गुणानुरागेण वशीभूता इति यावत् पात्रं गुणशालिनं नरमायान्ति ।

(७) प्रशमाय क्षोभशान्तये ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नैतद्दुर्वचसा (१) भिन्ने (२) हृदये मम तिष्ठति ॥
सोऽहं तथा यतिष्यामि (३) यथा सर्व्वोत्तमोत्तमम् ।
स्थानं प्राप्स्याम्यशेषाणां जगतामपि पूजितम् ॥
सुरुचिर्दयिता राज्ञस्तस्या जातोऽस्मि नोदरात् ।
प्रभावं पश्य मेऽम्ब त्वं वृद्धस्यापि (४) तवोदरे ॥
उत्तमः स मम भ्राता यो गर्भे न धृतस्त्वया ।
राजासनमवाप्नोतु पित्रा दत्तं तथास्तु तत् ॥
नान्यदत्तमभीप्स्यामि स्थानमम्ब स्वकर्म्मणा ।
इच्छामि तदहं स्थानं (५) यन्न प्राप पिता मम ॥
निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।
पुराच्च निष्क्रम्य ततस्तद्बाह्योपवनं ययौ ॥

---

(१) सपत्नीमातुः सुरुच्या इति शेषः ।

(२) भिन्ने विदारिते अत्यन्तं व्यथिते इत्यर्थः ।

(३) यतिष्यामि यतिष्ये । परस्मैपदमार्षम् ।

(४) वृद्धस्य वृद्धिं प्राप्तस्य जातस्येति यावत् ।

(५) अहं स्वकर्म्मणा तत् स्थानमिच्छामीत्यन्वयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भरतोपाख्यानम्

मैत्रेय उवाच ।

यदेतद्भगवन्नाख्य भरतस्य महीपतेः ।
कथयिष्यामि चरितं तन्ममाख्यातुमर्हसि ॥

पराशर उवाच ।

शालाग्रामे (१) महाभागो भगवन्न्यस्तमानसः (२) ।
स उवास चिरं कालं मैत्रेय पृथिवीपतिः ॥
अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः ।
अवाप परमां काष्ठां (३) मनसश्चापि संयमे ॥
समित्पुष्पकुशादानं चक्रे देवक्रियाकृते (४) ।
नान्यानि चक्रे कर्म्माणि निःसङ्गो योगतापसः (५) ॥
जगाम सोऽभिषेकार्थमेकदा तु महानदीम् ।
सस्नौ तत्र ततश्चक्रे स्नानस्यानन्तरक्रियाः ॥

---

(१) शालग्रामे तदाख्ये स्थाने ।

(२) भगवति विष्णौ न्यस्तम् अर्पितं मानसं चित्तं येन ।

(३) परमां काष्ठाम् अत्यन्तमुत्कर्षम् ।

(४) देवक्रियाकृते देवपूजार्थम् ।

(५) निःसङ्गः विषयासक्तिशून्यः । योगतापसः योगरत्तापसः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथाजगाम तत्तीर्थं (१) जलं पातुं पिपासिता ।
आसन्नप्रसवा ब्रह्मन्नेकैव हरिणी वनात् ॥
ततः समभवत्तत्र पीतप्राये जले तया ।
सिंहस्य नादः सुमहान् सर्व्वप्राणिभयङ्करः ॥
ततः सा सहसा त्रासादाप्लुता निम्नगातटम् (२) ।
अत्युच्चारोहणेनास्या नद्यां गर्भः पपात ह ॥
तमुह्यमानं वेगेन वीचिमालापरिप्लुतम् ।
जग्राह स नृपो गर्भात् पतितं मृगपोतकम् ॥
गर्भप्रच्युतिदोषेण प्रोत्तुङ्गाक्रमणेन (३) च ।
मैत्रेय सापि हरिणी पपात च ममार च ॥
हरिणीं तां विलोक्याथ विपन्नां (४) नृपतापसः ।
मृगपोतं समादाय निजमाश्रममागतः ॥
चकारानुदिनञ्चासौ मृगपोतस्य वै नृपः ।
पोषणं पुष्यमाणश्च स तेन ववृधे मुने ॥
चचाराश्रमपर्य्यन्ते तृणानि गहनेषु सः (५) ।

---

(१) तत्तीर्थं तस्याः महानद्याः तीर्थम् अवतरणस्थानम् ।

(२) निम्नगातटं नदीतीरम् आप्लुता उत्पतिता आरुरोहे-त्यर्थः ।

(३) प्रोत्तुङ्गाक्रमणेन अत्युच्चारोहणेन । (४) विपन्नां मृताम् ।

(५) स मृगः आश्रमपर्य्यन्ते आश्रमप्रान्ते स्थितेष्विति शेषः गहनेषु वनेषु तृणानि चचार भक्षयामास ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दूरं गत्वा च शार्दूलत्रासादभ्याययौ पुनः ॥
प्रातर्गत्वातिदूरञ्च सायमायात्यथाश्रमम् ।
पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे (१) ॥
तस्य तस्मिन् मृगे दूरसमीपपरिवर्त्तिनि ।
आसीच्चेतः समासक्तं न ययावन्यतो (२) द्विज ॥
विमुक्तराज्यतनयः प्रोज्झिताशेषबान्धवः ।
ममत्वं स चकारोच्चैस्तस्मिन् हरिणबालके ॥
किं वृकैर्भक्षितो व्याघ्रैः (३) किं सिंहेन निपातितः ।
चिरायमाणे (४) निष्क्रान्ते तस्यासीदिति मानसम् ॥
एषा वसुमती तस्य खुराग्रच्छतकर्वुरा (५) ।
प्रीतये मम जातोऽसौ क्व ममैणकबालकः (६) ।
विषाणाग्रेण मद्बाहुकण्डूयनपरो हि सः ।
क्षेमेणाभ्यागतोऽरण्यादपि मां सुखयिष्यति ॥
एते लूनशिखास्तस्य दशनैरचिरोद्गतैः ।

---

(१) उटजः पर्णशाला तस्य अजिरे अङ्गणे ।

(२) अन्यतः अन्यस्मिन् विषये ।

(३) व्याघ्रैः व्याघ्रैर्वा भक्षितः ।

(४) चिरायमाणे आश्रमप्रतिनिवृत्तौ कृतविलम्बे ।

(५) खुराणामग्रेण यानि क्षतानि तैः कर्वुरा विविधवर्णा ।

(६) एणकबालकः हरिणशावकः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुशाः काशा विराजन्ते वटवः सामगा इव (१) ॥
इत्थं चिरगते तस्मिन् स चक्रे मानसं मुनिः ।
प्रीतः प्रसन्नवदनः पार्श्वस्थे चाभवन्मृगे ॥
समाधिभङ्गस्तस्यासीत् (२) तन्ममत्वाहितात्मनः (३) ।
संत्यक्तराज्यभोगर्द्धिस्वजनस्यापि भूपतेः ॥
कालेन गच्छता (४) सोऽथ कालं चक्रे (५) महीपतिः ।
पितेव सास्रं (६) पुत्रेण मृगपोतेन वीक्षितः ॥
मृगमेव तदाद्राक्षीत् त्यजन् प्राणानसावपि ।
तन्मयत्वेन (७) मैत्रेय नान्यत् किञ्चिदचिन्तयत् ॥

---

(१) कुशाः काशाश्च तस्य हरिणशिशोः अचिरोद्गतैः अचिर-निर्गतैः दशनैः दन्तैः लूनशिखाः छिन्नाग्राः सन्तः सामगाः सामवेदाध्यायिनो वटवः कुमारा इव विराजन्ते सामगा वटवो मुण्डितशिरसो भवन्तीति साधर्म्यम् ।

(२) समाधिभङ्गः योगाभ्यासविच्छेदः ।

(३) तस्मिन् हरिणशिशौ ममत्वं स्नेहः तन्ममत्वं तस्मिन् आहितः अर्पितः आत्मा चित्तं येन तस्य ।

(४) कालेन गच्छता गच्छति काले ।

(५) कालं चक्रे मृत्युं प्राप ।

(६) सास्रं साश्रुनेत्रम् ।

(७) तन्मयत्वेन तदेकाग्रचित्ततया ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शौनक से सौति कहता है

महाभारतम् ।

परीक्षिदुपाख्यानम्

सौतिरुवाच ।

ततोऽपरस्मिन् सम्प्राप्ते काले कस्मिंश्चिदेव तु ।
परीक्षिन्नाम राजासीत् ब्रह्मन् (१) कौरववंशजः ॥
मृगान् विध्यन् वराहांश्च तरक्षून् (२) महिषांस्तथा ।
अन्यांश्च विविधान् वन्यांश्चचार (३) पृथिवीपतिः ॥
स कदाचिन्मृगं विद्ध्वा बाणेन निशितेन (४) वै ।
पृष्ठतो धनुरादाय ससार गहने वने ॥
परिश्रान्तः पिपासार्त्त आससाद मुनिं (५) वने ।
गवां प्रचारेष्वासीनं (६) वत्सानां मुखनिःसृतम् ।
भूयिष्ठमुपयुञ्जानं फेनमापिबतां पयः (७) ॥

---

(१) ब्रह्मन्निति शौनकसम्बोधनम् ।

(२) तरक्षुः क्षुद्रकायो व्याघ्रविशेषः ।

(३) वन्यान् वनचारिणो जन्तून् ।

(४) निशितेन तीक्ष्णाग्रेण ।

(५) मुनिं शमीकम् ।

(६) गवां प्रचारेषु गोचरणस्थानेषु यत्र गावश्चरन्तीत्यर्थः ।

(७) पय आपिबतां वत्सानां मुखनिःसृतं फेनं भूयिष्ठमुपयुञ्जानमित्यन्वयः । उपयुञ्जानं पिबन्तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तमभिद्रुत्य (१) वेगेन स राजा संशितव्रतम् (२) ।
अपृच्छद्धनुरुद्यम्य तं मुनिं क्षुच्छ्रमान्वितः (३) ॥
भो भो ब्रह्मन्नहं राजा परीक्षिदभिमन्युजः ।
मया विद्धो मृगो नष्टः कच्चित्त्वं दृष्टवानसि ॥
स मुनिस्तं तु नोवाच किञ्चिन्मौनव्रते स्थितः ।
तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासजत् (४) ।
समुत्क्षिप्य धनुष्कोट्या (५) स चैतत् समुपैक्षत (६) ॥
न च किञ्चिदुवाचैनं शुभं वा यदि वाशुभम् ।
स राजा क्रोधमुत्सृज्य व्यथितस्तं तथागतम् (७) ।
दृष्ट्वा जगाम नगरमृषिस्त्वासीत्तथैव सः ॥
न हि तं राजशार्दूलं क्षमाशीलो महामुनिः ।

---

(१) अभिद्रुत्य अभिगम्य तदभिमुखं गत्वेत्यर्थः ।

(२) संशितव्रतम् अवलम्बितमौनव्रतम् ।

(३) क्षुधा क्षुधया श्रमेण च अन्वितः ।

(४) समासजत् समासञ्जयत् योजयामास । अन्तर्भूतो ण्यर्थः ।

(५) धनुष्कोट्या धनुषोऽग्रभागेण ।

(६) स च मुनिः एतत् स्कन्धे सर्पयोजनं समुपैक्षत उपेक्षते स्म न तन्निमित्तं क्रोधवशो बभूवेति भावः ।

(७) तथागतम् तादृशीमवस्थामापन्नं स्कन्धे न्यस्तसर्पमिति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वधर्म्मनिरतं भूपं समाक्षिप्तोऽप्यधर्षयत् (१) ॥
न हि तं राजशार्दूलस्तथा धर्म्मपरायणम् ।
जानाति भरतश्रेष्ठस्तत एनमधर्षयत् ॥
तरुणस्तस्य पुत्त्रोऽभूत्तिग्मतेजा (२) महातपाः ।
शृङ्गी नाम महाक्रोधो दुष्प्रसादो (३) महाव्रतः ॥
सख्योक्तः क्रीडमानेन (४) स तत्र हसता किल ।
ऋषिपुत्त्रेण नर्म्मार्थे (५) कृशेन द्विजसत्तम ॥
तेजस्विनस्तव पिता तथैव च तपस्विनः ।
शवं स्कन्धेन वहति मा शृङ्गिन् गर्व्वितो भव ॥
क्व ते पुरुषमानित्वं (६) क्व ते वाचस्तथाविधाः ।
दर्पजाः पितरं दृष्टा यस्त्वं शवधरं तथा ॥

---

(१) समाक्षिप्तः स्कन्धे सर्पक्षेपेणावमानितः। न अधर्षयत् चक्षमे न शशापेत्यर्थः। स्वस्य क्षमाशीलत्वं राज्ञश्च स्वधर्म्मनिरतत्वमधर्षणे हेतुः।

(२) तिग्मतेजाः अतितेजस्वी अन्यकृतामवमाननां न सहते इत्यर्थः।

(३) दुष्प्रसादः प्रसादयितुमशक्यः कुपितो न प्रसीदतीत्यर्थः।

(४) क्रीडमानेन क्रीडता। आत्मनेपदमार्षम्।

(५) नर्म्म क्रीडा उपहास इति यावत्। तदर्थं शृङ्गिणमुपहसितुमित्यर्थः।

(६) पुरुषमानित्वं पुरुषाभिमानः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्तः स तेजस्वी शृङ्गी कोपसमन्वितः।
मृतधारं गुरुं श्रुत्वा पर्य्यतप्यत मन्युना॥
स तं कृशमभिप्रेक्ष्य सूनृतां वाचमुत्सृजन्।
अपृच्छत्तं कथं तातः स मेऽद्य मृतधारकः॥

कृश उवाच।

राज्ञा परीक्षिता तात मृगयां परिधावता (१)।
अवसक्तः (२) पितुस्तेऽद्य मृतः स्कन्धे भुजङ्गमः॥

शृङ्गी उवाच।

किं मे पिता कृतं तस्य राज्ञोऽनिष्टं दुरात्मनः।
ब्रूहि तत् कृश तत्त्वेन पश्य मे तपसो बलम्॥

कृश उवाच।

स राजा मृगयां (३) यातः परीक्षिदभिमन्युजः।
ससार मृगमेकाकी विद्ध्वा बाणेन शीघ्रगम्॥
न चापश्यन्मृगं राजा चरंस्तस्मिन् महावने।
पितरं ते स दृष्ट्वैव पप्रच्छानभिभाषिणम् (४)॥

---

(१) मृगयां परिधावता मृगयायै परिधावता मृगयार्थमरण्ये भ्राम्यता इत्यर्थः। आर्षः प्रयोगः।

(२) अवसक्तः अवसज्जितः निक्षिप्त इत्यर्थः। अन्तर्भूतो ण्यर्थः।

(३) मृगयां मृगयायै। आर्षः प्रयोगः।

(४) अनभिभाषिणम् अकथयन्तं मौनव्रतधारिणमिति यावत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तं स्थाणुभूतं तिष्ठन्तं (१) क्षुत्पिपासाश्रमातुरः ।
पुनः पुनर्मृगं नष्टं पप्रच्छ पितरं तव ॥
स च मौनव्रतोपेतो नैव तं प्रत्यभाषत ।
तस्य राजा धनुष्कोट्या सर्पं स्कन्धे समासजत् ॥
शृङ्गिंस्तव पिता सोऽपि तथैवास्ते धृतव्रतः ।
सोऽपि राजा स्वनगरं प्रस्थितो गजसाह्वयम् (२) ॥
श्रुत्वैवशृषिपुत्त्रस्तु शवं स्कन्धे प्रतिष्ठितम् (३) ।
कोपसंरक्तनयनः शशाप नृपतिं तदा ।
वार्य्युपस्पृश्य (४) तेजस्वी क्रोधवेगबलात्कृतः ॥
योऽसौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य (५) च ।
स्कन्धे मृतं समासाक्षीत् पन्नगं राजकिल्बिषी (६) ॥
तं पापमतिसंक्रुद्धस्तक्षकः पन्नगेश्वरः ।
द्विजानामवमन्तारं कुरूणामयशस्करम् ।

---

(१) स्थाणुभूतं स्थाणुवन्निष्पन्दभावेनावतिष्ठमानम् । छिन्नशाखस्य तरोः स्कन्धः स्थाणुः ।

(२) गजसाह्वयं गजेन हस्तिना साह्वयं नामयुक्तं हस्तिनापुरमित्यर्थः ।

(३) पितुरिति शेषः ।

(४) वारि जलम् उपस्पृश्य स्पृष्ट्वा आचम्येति यावत् ।

(५) कृच्छ्रगतस्य कठोरव्रते स्थितस्य ।

(६) राजकिल्बिषी राजसु पातकी दुर्वृत्तो राजेति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्तरात्रादितो (१) नेता यमस्य सदनं प्रति ॥

इति श्रुत्वातिसंक्रुद्धः शृङ्गी पितरमभ्यगात् ।
आसीनं गोव्रजे तस्मिन् वहन्तं शवपन्नगम् (२) ॥
स तमालक्ष्य पितरं शृङ्गी स्कन्धगतेन वै ।
शवेन भुजगेनासीद् भूयः क्रोधसमाकुलः ॥
दुःखाच्चाश्रूणि मुमुचे पितरञ्चेदमब्रवीत् ॥
श्रुत्वेमां धर्षणां (३) तात तव तेन दुरात्मना ।
राज्ञा परीक्षिता कोपादशपं तमहं नृपम् ॥
सप्तमेऽहनि तं पापं तक्षकः पन्नगोत्तमः ।
वैवस्वतस्य (४) सदनं नेता परमदारुणम् ॥

तमब्रवीत् पिता ब्रह्मंस्तथा कोपसमन्वितम् ।
न मे प्रियं कृतं तात नैष धर्मस्तपस्विनाम् ॥
वयं तस्य नरेन्द्रस्य विषये (५) निवसामहे (६) ।

---

(१) सप्तरात्रादितः इतः अस्मात् दिवसात् सप्तरात्रात् सप्तमीं रात्रिं प्राप्य सप्तमे दिने इति यावत् ।

(२) गोव्रजे गोप्रचारे । शवपन्नगं मृतं सर्पम् ।

(३) धर्षणाम् अभिमर्षम् अवमाननामिति यावत् ।

(४) विवस्वतः सूर्य्यस्य अपत्यं पुमान् वैवस्वतो यमः ।

(५) विषये देशे राज्ये इति यावत् ।

(६) निवसामहे निवसामः । आत्मनेपदमार्षम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्यायतो रक्षितास्तेन तस्य पापं न रोचये (१) ॥
यदि राजा न संरक्षेत् पीडा नः परमा भवेत् ।
न शक्नुयामश्चरितुं (२) धर्म्मं पुत्त्र यथासुखम् (३) ॥
रक्ष्यमाणा वयं तात राजभिर्धर्म्मदृष्टिभिः ।
चरामो विपुलं धर्म्मं तेषां भागोऽस्ति धर्म्मतः (४) ॥
अराजके जनपदे दोषा जायन्ति (५) वै सदा ।
उद्वृत्तं (६) सततं लोकं राजा दण्डेन शास्ति वै ॥
नोद्विग्नश्चरते (७) धर्म्मं नोद्विग्नश्चरते क्रियाम् ।
राज्ञा प्रतिष्ठितो धर्म्मो धर्म्मात् स्वर्गः प्रतिष्ठितः ॥
परीक्षित्तु विशेषेण यथास्य प्रपितामहः (८) ।
रक्षत्यस्मांस्तथा राज्ञा रक्षितव्याः प्रजा विभो (९) ॥
तेनेह क्षुधितेनाद्य श्रान्तेन च तपस्विना (१०) ।

---

(१) पापम् अनिष्टम् । न रोचये नेच्छामि ।

(२) चरितुम् अनुष्ठातुम् । (३) यथासुखम् इच्छानुरूपम् ।

(४) अस्माभिश्चरिते धर्म्मे इति शेषः । धर्म्मतः न्यायतः ।

(५) जायन्ति जायन्ते । परस्मैपदमार्षम् ।

(६) उद्वृत्तम् उच्छृङ्खलम् असत्पथप्रवृत्तमिति यावत् ।

(७) उद्विग्नः उपद्रुतः । चरते चरति । आत्मनेपदमार्षम् ।

(८) यथास्य प्रपितामहः अस्य प्रपितामहः पाण्डुरिव ।

(९) विभो निग्रहानुग्रहसमर्थः ।

(१०) तपस्विना तपस्विसदृशेन सर्व्वथा निरपराधेनेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अजानता कृतं मन्ये व्रतमेतदिदं मम (१) ॥
कस्मादिदं त्वया बाल्यात् सहसा दुष्कृतं कृतम्।
न सोऽर्हति नृपः शापमस्मत्तः पुत्त्र सर्व्वथा ॥

शृङ्गी उवाच।

यद्येतत् साहसं (२) तात यदि वा दुष्कृतं कृतम्।
प्रियं वाप्यप्रियं वा ते वागुक्ता (३) न मृषा भवेत् ॥
नैवान्यथेदं भविता पितरेष ब्रवीमि ते।
नाहं मृषा ब्रवीम्येव स्वैरेष्वपि (४) कुतः शपन् ॥

शमीक उवाच।

जानाम्युग्रप्रभावं त्वां तात सत्यगिरं तथा।
नानृतं नोक्तपूर्व्वं ते नैतन्मिथ्या भविष्यति ॥
पिता पुत्त्रो वयःस्थोऽपि सततं वाच्य (५) एव तु।
किं पुनर्बाल एव त्वं तपसा भावितः सदा (६) ॥

---

(१) मम इदं व्रतम् अजानता तेन एतत् कृतं मन्ये इत्यन्वयः।

(२) साहसम् असमीक्ष्यकारित्वम्।

(३) मयेति शेषः।

(४) स्वैरेषु परिहासजल्पितेषु।

(५) वाच्यः शिक्षणीयः।

(६) सदा तपसा भावितः तपस्येव निरतः लोकव्यवहारानभिज्ञ इति यावत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सोऽहं पश्यामि वक्तव्यं त्वयि धर्म्मभृतां वर ।
पुत्त्रत्वं बालतांश्चैव तवावेक्ष्य च साहसम् ॥
स त्वं शमपरो भूत्वा वन्यमाहारमाचरन् ।
चर क्रोधमिमं हित्वा नैवं धर्म्मं प्रहास्यसि (१) ॥
क्रोधो हि धर्म्मं हरति यतीनां दुःखसञ्चितम् ।
शम एव यतीनां हि क्षमिणां सिद्धिकारकः ॥
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
तस्माच्चरेथाः (२) सततं क्षमाशीलो जितेन्द्रियः ॥

ययात्युपाख्यानम् ।

क्रुद्धेनोशनसा (३) शप्तो ययातिर्नाहुषस्तदा (४) ।
पूर्व्वं वयः (५) परित्यज्य जरां सद्योऽन्वपद्यत ॥

---

(१) एवम् कृत्यमनुष्ठिते सति धर्म्मं न प्रहास्यसि न त्यक्ष्यसि धर्म्मेण परिहीणो न भविष्यसीत्यर्थः ।

(२) चरेथाः चरेः । आत्मनेपदमार्षम् ।

(३) उशनसा शुक्राचार्य्येण ।

(४) नहुषस्य अपत्यं पुमान् नाहुषः ।

(५) पूर्व्वं वयः यौवनम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ययातिरुवाच ।

अतृप्तो यौवनस्याहं प्रभुवं भृगुकुलोद्वह (१) ।
प्रसादं कुरु मे ब्रह्मन् जरा मां न विशेद्यथा ॥

शुक्र उवाच ।

नाहं मृषा ब्रवीम्येतज्जरां प्राप्तोऽसि भूमिप ।
जरां त्वेतां त्वमन्यस्मिन् संक्रामय यदीच्छसि ॥

ययातिरुवाच ।

राज्यभाक् स भवेद्ब्रह्मन् पुण्यभाक् कीर्त्तिभाक् तथा ।
यो मे दद्याद्वयः (२) पुत्त्रस्तद्भवाननुमन्यताम् ॥

शुक्र उवाच ।

संक्रामयिष्यसि जरां यथेष्टं नहुषात्मज ।
मामनुध्याय भावेन (३) न च पापमवाप्स्यसि (४) ॥
वयो दास्यति ते पुत्त्रो यः स राजा भविष्यति ।
आयुष्मान् कीर्त्तिमांश्चैव बह्वपत्यस्तथैव च ॥

जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ।
पुत्त्रं ज्येष्ठं वरिष्ठञ्च (५) यदुमित्यब्रवीद्वचः ॥

---

(१) उद्वहः श्रेष्ठः उत्पन्नो वा ।
(२) वयः स्वयौवनम् ।
(३) भावेन भक्त्या ।
(४) पापं भोगतृष्णया पुत्त्रे जरासंक्रामणनिबन्धनं दोषम् ।
(५) वरिष्ठं गुणैः श्रेष्ठम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जरा वली च मां तात पलितानि (१) च पर्य्यगुः (२) ।
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने (३) ॥
त्वं यदो प्रतिपद्यस्व पाप्मानं (४) जरया सह ।
यौवनेन त्वदीयेन चरेयं (५) विषयानहम् ॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा स्वं प्रतिपत्स्यामि (६) पाप्मानं जरया सह ॥

यदुरुवाच ।

जरायां बहवो दोषाः पानभोजनकारिताः ।
तस्माज्जरां न ते राजन् ग्रहीष्य इति मे मतिः ॥
सितश्मश्रुर्निरानन्दो जरया शिथिलीकृतः ।
वलीसङ्गतगात्रस्तु दुर्दर्शो दुर्बलः कृशः ॥
अशक्तः कार्य्यकरणे परिभूतः सयौवनैः ।
सहोपजीविभिश्चैव तां जरां नाभिकामये (७) ॥

---

(१) जरया केशानां शौक्ल्यं पलितम् ।

(२) पर्य्यगुः परिप्राप्तानि ।

(३) यौवने यौवनसाध्ये विषयभोगे ।

(४) पाप्मानं पापं जराजनितक्लेशप्रपञ्चरूपमशुभम् ।

(५) चरेयम् उपभुञ्जीय ।

(६) प्रतिपत्स्यामि प्रतिपत्स्ये । परस्मैपदमार्षम् ।

(७) दुर्दर्शः विकृतरूपः । परिभूतः अवज्ञातः । सयौवनैः युवभिः । सहोपजीविभिः अनुचरैः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सन्ति ते बहवः पुत्त्रा मत्तः प्रियतरा नृप ।
जरां ग्रहीतुं धर्म्मज्ञ तस्मादन्यं वृणीष्व (१) वै ।

ययातिरुवाच ।

यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मादराज्यभाक् तात प्रजा तव भविष्यति ॥
तुर्व्वसो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन चरेयं वै विषयांस्तव पुत्त्रक ॥
पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् ।
स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥

तुर्व्वसुरुवाच ।

न कामये जरां तात कामभोगप्रणाशिनीम् (२) ।
बलरूपान्तकरणीं बुद्धिप्राणप्रणाशिनीम् ॥

ययातिरुवाच ।

यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ॥
तस्मात् प्रजा समुच्छेदं तुर्व्वसो तव यास्यति ॥
एवं स तुर्व्वसुं शप्त्वा ययातिः सुतमात्मनः ।
शर्म्मिष्ठायाः सुतं द्रुह्युमिदं वचनमब्रवीत् ॥
द्रुह्यो त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीम् ।

---

(१) वृणीष्व प्रार्थयस्व ।

(२) काम्यन्ते इति कामाः विषयाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जरां वर्षसहस्रं मे यौवनं स्वं ददस्व च ॥
पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् ।
स्वं चादास्यामि (१) भूयोऽहं पाप्मानं जरया सह ॥

द्रुह्युरुवाच ।

न गजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम् ।
वाग्भङ्गश्चास्य भवति तां जरां नाभिकामये ॥

ययातिरुवाच ।

यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् द्रुह्यो प्रियः कामो न ते सम्पत्स्यते क्वचित् ॥
अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
एकं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥

अनुरुवाच ।

जीर्णः शिशुवदादत्ते कालेऽन्नमशुचिर्यथा ।
न जुहोति च कालेऽग्निं तां जरां नाभिकामये ॥

ययातिरुवाच ।

यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
जरादोषस्त्वया प्रोक्तस्तस्मात्त्वं (२) प्रतिलप्स्यसे ।
प्रजाश्च यौवनं प्राप्ता विनशिष्यन्त्यनो तव ॥

---

(१) आदास्यामि आदास्ये । परस्मैपदमार्षम् ।
(२) तं जरादोषम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूरो त्वं मे प्रियः पुत्रस्त्वं वरीयान् भविष्यसि ॥
जरा वली च मां तात पलितानि च पर्य्यगुः ।
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ।
पूरो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ॥
एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा (१) ।
यथात्थ मां महाराज तत् करिष्यामि ते वचः ॥
प्रतिपत्स्यामि ते राजन् पाप्मानं जरया सह ।
गृहाण यौवनं मत्तश्चर कामान् यथेप्सितान् ॥
जरसाहं प्रतिच्छन्नो (२) वयोरूपधरस्तव ।
यौवनं भवते दत्त्वा चरिष्यामि यथात्थ माम् ॥

ययातिरुवाच ।

पूरो प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते ।
सर्व्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥
एवमुक्त्वा ययातिस्तु स्मृत्वा काव्यं महातपाः ।
संक्रामयामास जरां तदा पूरौ महात्मनि ॥
पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
प्रीतियुक्तो नृपश्रेष्ठश्चचार विषयान् प्रियान् ।
यथाकामं यथोत्साहं यथाकालं यथासुखम् ॥

---

(१) अञ्जसा झटिति तत्क्षणमविलम्बमान इत्यर्थः ।
(२) प्रतिच्छन्नः आवृतः अभिभूत इति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धर्म्मेण च प्रजाः सर्व्वाः यथावदनुरञ्जयन् ।
ययातिः पालयामास साक्षादिन्द्र इवापरः ॥
स राजा सिंहविक्रान्तो युवा विषयगोचरः (१) ।
अविरोधेन धर्म्मस्य चचार सुखमुत्तमम् ॥
स सम्प्राप्य शुभान् कामांस्तृप्तः खिन्नश्च (२) पार्थिव ।
कालं वर्षसहस्रान्तं सस्मार मनुजाधिपः ॥
यदा स पश्यते (३) कालं धर्म्मात्मा तं महीपतिः ।
पूर्णं मत्वा ततः (४) कालं पूरुं पुत्त्रमुवाच ह ॥
यथाकामं यथोत्साहं यथाकालमरिन्दम ।
सेविता विषयाः पुत्त्र यौवनेन मया तव ॥
न जातु कामः कामानामुपभोगेन शाम्यति (५) ।
हविषा कृष्णवर्त्मेव भूय (६) एवाभिवर्द्धते ॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
एकस्यापि न पर्य्याप्तं तस्मात्तृष्णां परित्यजेत् ॥

---

(१) विषयगोचरः विषयासक्तः विषयभोगरत इति यावत् ।
(२) खिन्नः श्रान्तः भोगे निरुत्साह इति यावत् ।
(३) पश्यते अपश्यत् । आत्मनेपदवर्त्तमानप्रयोगावार्षौ ।
(४) ततः तदा ।
(५) कामः विषयाभिलाषः । कामानां विषयाणां भोग्यवस्तूनामिति यावत् ।
(६) भूयः अधिकतरम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

या दुस्त्यजा दुर्मतिभिर्या न जीर्य्यति जीर्य्यतः ।
यासौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः(१) सुखम् ॥
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते ॥
तस्मादेनामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो (२) भूत्वा चरिष्यामि मृगैः सह ॥
पूरो प्रीतोऽस्मि भद्रन्ते गृहाणेदं स्वयौवनम् ।
राज्यञ्चेदं गृहाण त्वं त्वं हि मे प्रियकृत् सुतः ॥
प्रतिपेदे जरां राजा ययातिर्नाहुषस्तदा ।
प्रत्यपद्यत पूरुश्च यौवनं पुनरात्मनः ॥
अभिषेक्तुकामं नृपतिं (३) पूरुं पुत्त्रं कनीयसम् (४) ।
ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो ।
ज्येष्ठं यदुमतिक्रम्य राज्यं यच्छसि पूरवे ॥
यदुर्ज्यैष्ठस्तव सुतो जातस्तमनु तुर्व्वसुः ।

---

(१) प्राणान्तिको रोगः प्राणान्तं यावत् तिष्ठतीत्यर्थः तथाच तृष्णा यावज्जीवमविच्छेदेन क्लेशकरीति भावः ।
(२) निर्द्वन्द्वः सुखदुःखरागद्वेषादिद्वन्द्वैरनभिभूतः । निर्ममः ममताशून्यः सांसारिकेषु विषयेषु वीतस्पृह इति यावत् ।
(३) पादेऽस्मिन् वर्णाधिक्यमार्षम् ।
(४) कनीयसम् । आर्षः प्रयोगः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शर्म्मिष्ठायाः सुतो द्रुह्युस्ततोऽनुः पूरुरेव च ॥
कथं ज्येष्ठानतिक्रम्य कनीयान् राज्यमर्हति ।
एतत् सम्बोधयामस्त्वां धर्म्मं त्वं प्रतिपालय ॥

ययातिरुवाच ।

ब्राह्मणप्रमुखा वर्णाः सर्व्वे शृण्वन्तु मे वचः ।
ज्येष्ठं प्रति यथा (१) राज्यं न देयं मे कथञ्चन ॥
मम ज्येष्ठेन यदुना नियोगो नानुपालितः ।
प्रतिकूलः पितुर्यश्च न स पुत्त्रः सतां मतः ॥
मातापित्रोर्वचनकृद्धितः पथ्यश्च (२) यः सुतः ।
स पुत्त्रः पुत्त्रवद्यश्च वर्त्तते पितृमातृषु (३) ॥
यदुनाहमवज्ञातस्तथा तुर्व्वसुनापि च ।
द्रुह्युना चानुना चैव मय्यवज्ञा कृता भृशम् ॥
पूरुणा तु कृतं वाक्यं मानितञ्च विशेषतः ।
कनीयान् मम दायादो धृता येन जरा मम ॥
शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयम् ।

---

(१) यथा येन हेतुना ।
(२) हितः हितकारी । पथ्यः अनुकूलकारी सत्पथप्रतिपन्नो वा ।
(३) पितृमातृषु पितृमातृस्थानीयेषु पितृस्थानीयाः पितृव्यादयः मातृस्थानीयाः मातृष्वस्रादयः तेषु यः पुत्त्रवद् वर्त्तते पुत्त्र इव आचरति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुत्त्रो यस्त्वानुवर्त्तेत स राजा पृथिवीपतिः ॥
भवतोऽनुनयाम्येवं पूरू राज्येऽभिषिच्यताम् ॥

प्रकृतय ऊचुः ।

यः पुत्त्रो गुणसम्पन्नो मातापित्रोर्हितः सदा ।
सर्व्वमर्हति कल्याणं कनीयानपि सत्तमः ॥
अर्हः पूरुरिदं राज्यं (१) यः सुतः प्रियकृत्तव ।
वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरम् (२) ॥
पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्तदा ।
अभ्यषिञ्चत्ततः पूरुं राज्ये स्वे सुतमात्मनः ॥
दत्त्वा च पूरवे राज्यं वनवासाय दीक्षितः (३) ।
पुरात् स निर्ययौ राजा ब्राह्मणैस्तापसैः सह ॥

जतुगृहदाहः ।

वैशम्पायन उवाच ।

शृणु विस्तरशो राजन् (४) वदतो मे परन्तप ।
दाहं जतुगृहस्याशात् पाण्डवानाञ्च मोक्षणम् ॥

---

(१) इदं राज्यम् अस्य राज्यस्य । चार्षः प्रयोगः ।

(२) भवद्वक्तस्येति शेषः ।

(३) दीक्षितः कृतसङ्कल्पः ।

(४) राजन्निति जनमेजयसम्बोधनम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राणाधिकं (१) भीमसेनं कृतविद्यं धनञ्जयम् ।
दुर्य्योधनो लक्षयित्वा पर्य्यतप्यत दुर्म्मनाः ॥
ततो वैकर्त्तनः (२) कर्णः शकुनिश्चापि सौबलः (३) ।
अनेकैरभ्युपायैस्ते (४) जिघांसन्ति स्म पाण्डवान् ॥
पाण्डवा अपि तत् सर्व्वं प्रतिचक्रुर्यथागतम् (५) ।
उद्भावनमकुर्व्वन्तो (६) विदुरस्य मते स्थिताः ॥
गुणैः समुदितान् (७) दृष्ट्वा पौराः पाण्डुसुतांस्तदा ।
कथयाञ्चक्रिरे तेषां गुणान् संसत्सु भारत ॥
प्रज्ञाचक्षुरचक्षुष्ट्वाद्धृतराष्ट्रो जनेश्वरः (८) ।
राज्यं न प्राप्तवान् पूर्व्वं स कथं नृपतिर्भवेत् ॥
तथा शान्तनवो भीष्मः सत्यसन्धो महाव्रतः ।
प्रत्याख्याय पुरा राज्यं न स जातु ग्रहीष्यति ॥
ते वयं पाण्डवज्येष्ठं तरुणं वृद्धशीलिनम् ।

---

(१) प्राणेन बलेन अधिकं महाबलमित्यर्थः ।
(२) विकर्त्तनः सूर्य्यः तस्य अपत्यं पुमान् वैकर्त्तनः ।
(३) सौबलः सुबलतनयः शकुनिविशेषणम् ।
(४) ते कर्णशकुनिदुर्य्योधनाः ।
(५) यथागतं यथोपस्थितम् ।
(६) केन प्रतिक्रियते इत्येतदप्रकाशयन्तः ।
(७) समुदितान् पूर्णान् अलङ्कृतानित्यर्थः ।
(८) प्रज्ञा बुद्धिरेव चक्षुर्यस्य सः । अचक्षुष्ट्वात् जन्मान्धत्वात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभिषिक्तास्म: साध्वद्य सत्यकारुण्यवेदिनम्॥
स हि भीष्मं शान्तनवं धृतराष्ट्रञ्च धर्म्मवित्।
सपुत्त्रं विविधैर्भोगैर्योजयिष्यति पूजयन्॥
तेषां दुर्य्योधनः श्रुत्वा तानि वाक्यानि जल्पताम्।
युधिष्ठिरानुरक्तानां पर्य्यतप्यत दुर्मतिः॥
स तप्यमानो दुष्टात्मा तेषां वाचो न चक्षमे।
ईर्ष्यया चापि सन्तप्तो धृतराष्ट्रमुपागमत्॥
ततो विरहितं (१) दृष्ट्वा पितरं परिपूज्य सः।
पौरानुरागसन्तप्तः पश्चादिदमभाषत॥
श्रुता मे जल्पतां तात पौराणामशिवा गिरः।
त्वामनादृत्य भीष्मञ्च पतिमिच्छन्ति पाण्डवम्॥
मतमेतच्च भीष्मस्य न स राज्यं बुभुक्षति।
अस्माकन्तु परां पीड़ां चिकीर्षन्ति पुरे जनाः॥
पितृतः प्राप्तवान् राज्यं पाण्डुरात्मगुणैः पुरा।
त्वमन्धगुणसंयोगात् (२) प्राप्तं राज्यं न लब्धवान्॥
स एष पाण्डोर्दायाद्यं (३) यदि प्राप्नोति पाण्डवः।

---

(१) विरहितम् अनुचरादिरहितम् एकाकिनमित्यर्थः।

(२) अन्धगुणः अन्धत्वरूपो धर्म्मः।

(३) दायादाः उत्तराधिकारिणः तैर्लब्धं दायाद्यम् पाण्डुना उत्तराधिकारितया लब्धं राज्यमिति यावत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्य पुत्रो ध्रुवं प्राप्तस्तस्य तस्यापि चात्मजः॥
ते वयं राजवंशेन हीनाः सह सुतैरपि।
अवज्ञाता भविष्यामो लोकस्य जगतीपते॥
सततं निरयं (१) प्राप्ताः परपिण्डोपजीविनः।
न भवेम यथा राजंस्तथा नीतिर्विधीयताम्॥
एवं श्रुत्वा तु पुत्रस्य प्रज्ञाचक्षुर्नराधिपः।
धृतराष्ट्रो द्विधाचित्तः (२) शोकार्त्तः समपद्यत॥
दुर्य्योधनश्च कर्णश्च शकुनिः सौबलस्तथा।
दुःशासनचतुर्थास्ते मन्त्रयामासुरेकतः (३)॥
ततो दुर्य्योधनो राजा धृतराष्ट्रमभाषत।
पाण्डवेभ्यो भयं न स्यात्तान् विवासयतां भवान्।
निपुणेनाभ्युपायेन नगरं वारणावतम्॥
धृतराष्ट्रस्तु पुत्रेण श्रुत्वा वचनमीरितम्।
मुहूर्त्तमिव सञ्चिन्त्य दुर्य्योधनमथाब्रवीत्॥
धर्म्मनित्यः सदा पाण्डुस्तथा धर्म्मपरायणः।
सर्व्वेषु ज्ञातिषु तथा मयि त्वासीद्विशेषतः (४)॥

---

(१) निरयम् अवमाननारूपं नरकम्।

(२) द्विधाचित्तः दोलायमानचित्तः किंकर्त्तव्यविमूढ इति यावत्।

(३) एकतः एकान्ते विजने इति यावत्।

(४) पाण्डुः सदा धर्म्मनित्यः तथा धर्म्मपरायणः सर्व्वेषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्य पुत्रो यथा पाण्डुस्तथा धर्म्मपरायणः ।
गुणवान् लोकविख्यातः पौरवाणां सुसम्मतः (१) ॥
स कथं शक्यतेऽस्माभिरपाकर्त्तुं (२) बलादितः ।
पितृपैतामहाद्राज्यात् ससहायो विशेषतः ॥
भृता (३) हि पाण्डुनामात्या बलञ्च (४) सततं भृतम् ।
भृताः पुत्राश्च पौत्राश्च तेषामपि (५) विशेषतः ॥
ते पुरा सत्कृतास्तात पाण्डुना नागरा जनाः ।
कथं युधिष्ठिरस्यार्थे न नो हन्युः सबान्धवान् ॥

दुर्य्योधन उवाच ।

तात प्रकृतयः सर्व्वा अर्थमानेन पूजिताः ।
ध्रुवमस्मत्सहायास्ता भविष्यन्ति प्रधानतः (६) ॥

ज्ञातिषु विशेषतो मयि तथा धर्म्मपरायण आसीदित्यन्वयः । धर्म्मनित्यः धर्म्मे नित्यः स्थिरः केनापि हेतुना धर्म्ममार्गान्न व्यचलदिति यावत् । धर्म्मपरायणः न्यायवान् सर्व्वत्र समदर्शीति यावत् ।

(१) सुसम्मतः बहुमतः सविशेषानुरागभाजनमिति यावत् ।

(२) अपाकर्त्तुं निराकर्त्तुं निर्वासयितुमिति यावत् ।

(३) भृताः धनमानादिना पुष्टाः ।

(४) बलं सेना सैनिकपुरुषाः सेनापतयश्चेति यावत् ।

(५) तेषाम् अमात्यानां सेनापतीनां सैनिकपुरुषाणाञ्च ।

(६) प्रधानतः प्रधानानि प्रधानानि प्रकृतयः प्रकृतिमुख्या इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स भवान् पाण्डवानाशु विवासयितुमर्हति ।
मृदुनैवाभ्युपायेन नगरं वारणावतम् ॥
यदा प्रतिष्ठितं राज्यं मयि राजन् भविष्यति ।
तदा कुन्ती सहापत्या पुनरैष्यति भारत ॥

धृतराष्ट्र उवाच ।

दुर्य्योधन ममाप्येतद्धृदि संपरिवर्त्तते ।
अभिप्रायस्य पापत्वान्नैवं (१) तु विवृणोम्यहम् ॥
न च भीष्मो न च द्रोणो न च क्षत्ता(२) न गौतमः(३)।
विवास्यमानान् कौन्तेयाननुमंस्यन्ति कर्हिचित् ॥
समा हि कौरवेयाणां (४) वयं ते चैव पुत्त्रक ।
नैते विषममिच्छेयुर्धर्म्मयुक्ता मनस्विनः ॥
ते वयं कौरवेयाणामेतेषाञ्च महात्मनाम् (५) ।
कथं न बध्यतां तात गच्छेम जगतस्तथा ॥

---

(१) पापत्वात् धर्म्मबहिर्भूतत्वात् ।
(२) क्षत्ता दासीपुत्त्रः विदुर इति यावत् तस्य दासीगर्भो-त्पन्नत्वात् ।
(३) गौतमः गोतमकुलोत्पन्नः कृपाचार्य्यः ।
(४) कौरवेयाणां भीष्मादीनाम् ।
(५) एतेषाञ्च महात्मनां द्रोणादीनाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुर्य्योधन उवाच।

मध्यस्थः (१) सततं भीष्मो द्रोणपुत्त्रो मयि स्थितः(२) ।
यतः पुत्त्रस्ततो द्रोणो भविता नात्र संशयः ॥
कृपः शारद्वतश्चैव (३) यत एतौ ततो भवेत् ।
द्रोणञ्च भागिनेयञ्च न स त्यक्ष्यति कर्हिचित् ॥
क्षत्तार्थबद्धस्त्वस्माकं (४) प्रच्छन्नं संयतः परैः (५) ।
न चैकः स समर्थोऽस्मान् पाण्डवार्थेऽभिबाधितुम् ॥
सुविस्रब्धं (६) पाण्डुपुत्त्रान् सह मात्रा विवासय ।
वारणावतमद्यैव यथा यान्ति (७) तथा कुरु ॥
विनिद्रकरणं (८) घोरं हृदि शल्यमिवार्पितम् ।
शोकपावकमुद्भूतं कर्म्मणैतेन नाशय ॥

---

(१) मध्यस्थः समदर्शी न कमपि पक्षं विशेषेणानुगृह्णातीत्यर्थः ।

(२) मयि स्थितः मत्पक्षे स्थितः मयि एकान्तमनुरक्त इत्यर्थः ।

(३) शरद्वतोऽपत्यं पुमान् शारद्वतः ।

(४) अर्थबद्धः अर्थेन धनेन बद्धः ग्रासाच्छादनार्थमस्माकमर्थ गृह्णाति अतस्तस्यास्मत्पक्षावलम्बनं दुष्परिहरमिति भावः ॥

(५) परैः विपक्षैः पाण्डवैरिति यावत् प्रच्छन्नम् अप्रकाशं संयतः बद्धः विदुरः प्रच्छन्नभावेन पाण्डवपक्षपातीत्यर्थः ।

(६) सुविस्रब्धम् अतिविश्वस्तं सर्व्वथा निःशङ्कमिति यावत् ।

(७) मात्रा सह पाण्डवा इति शेषः ।

(८) विनिद्रकरणं निद्राप्रतिरोधकम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ततो दुर्य्योधनो राजा सर्व्वाः प्रकृतयः (१) शनैः ।
अर्थमानप्रदानेन संजहार (२) सहानुजः ॥
धृतराष्ट्रप्रयुक्तास्ते केचित् कुशलमन्त्रिणः (३) ।
कथयाञ्चक्रिरे रम्यं नगरं वारणावतम् (४) ॥
कथ्यमाने तथा रम्ये नगरे वारणावते ।
गमने पाण्डुपुत्राणां जज्ञे तत्र मतिर्नृप ॥
यदा त्वमन्यत नृपो जातकौतूहला इति (५) ।
उवाच चैतानथ तान् पाण्डवानम्बिकासुतः ॥
ममैते पुरुषा नित्यं कथयन्ति पुनः पुनः ।
रमणीयतमं लोके नगरं वारणावतम् ॥
तत्ताता (६) यदि मन्यध्वमुत्सवं वारणावते ।
सगणाः सान्वयाश्चैव (७) विहरध्वं यथामराः ॥
कञ्चित् कालं विहृत्यैवमनुभूय परां मुदम् ।
इदं वै हास्तिनपुरं सुखिनः पुनरैष्यथ ॥

---

(१) प्रकृतयः प्रकृतीः । आर्षः प्रयोगः ।

(२) संजहार वशीचकार स्वपक्षं ग्राहयामासेत्यर्थः ।

(३) कुशलमन्त्रिणः कुशलाः चतुराः मन्त्रिणः कार्य्यसहायाः ।

(४) वारणावतं नगरमतिरम्यं स्थानमिति कथयामासुः ।

(५) जातकौतूहलाः गमने जातोत्सुक्याः पाण्डवा इति शेषः ।

(६) ताताः वत्साः ।

(७) सगणाः भृत्यवर्गसहिताः । सान्वयाः अनुचरवर्गसहिताः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धृतराष्ट्रस्य तं काममनुवुद्धा (१) युधिष्ठिरः ।
आत्मनश्चासहायत्वं तथेति (२) प्रत्युवाच तम् ॥
ततो भीष्मं शान्तनवं विदुरञ्च महामतिम् ।
द्रोणञ्च वाह्लिकञ्चैव सोमदत्तञ्च कौरवम् ।
कृपमाचार्य्यपुत्त्रञ्च भूरिश्रवसमेव च ।
आन्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान् ।
पुरोहितांश्च पौरांश्च गान्धारीञ्च यशस्विनीम् ।
युधिष्ठिरः शनैर्दीन उवाचेदं वचस्तदा ॥
रमणीये जनाकीर्णे नगरे वारणावते ।
सगणास्तत्र यास्यामो धृतराष्ट्रस्य शासनात् (३) ॥
प्रसन्नमनसः सर्व्वे पुण्या वाचो विमुञ्चत (४) ।
आशीर्भिर्वृंहितानस्मान्न पापं प्रसहिष्यते (५) ॥
एवमुक्तास्तु ते सर्व्वे पाण्डुपुत्त्रेण कौरवाः ।
प्रसन्नवदना भूत्वा अन्ववर्त्तन्त (६) पाण्डवान् ॥

---

(१) अनुवुद्धा अनुवुध्य । आर्षः प्रयोगः ।

(२) तथेति तथा करिष्यामीति ।

(३) शासनात् आदेशात् ।

(४) पुण्याः शुभाः वाचः आशीर्वचनानि विमुञ्चत प्रयुङ्क्ध्वम् ।

(५) भवताम् आशीर्भिः वृंहितान् वर्द्धितान् अस्मान् पापम् अशुभं न प्रसहिष्यते नाभिभविष्यति ।

(६) अन्ववर्त्तन्त अनुमोदितवन्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वस्त्यस्तु वः पथि सदा भूतेभ्यश्चैव सर्व्वशः (१) ।
मा च वोऽस्त्वशुभं किञ्चित् सर्व्वदा पाण्डुनन्दनाः ॥
ततः कृतस्वस्त्ययना राज्यलम्भाय पार्थिवाः ।
कृत्वा सर्व्वाणि कार्य्याणि प्रययुर्वारणावतम् (२) ॥
एवमुक्तेषु राज्ञा (३) तु पाण्डुपुत्त्रेषु भारत ।
दुर्य्योधनः परं हर्षमगच्छत् स दुरात्मवान् (४) ॥
स पुरोचनमेकान्तमानीय भरतर्षभ (५) ।
गृहीत्वा दक्षिणे पाणौ सचिवं वाक्यमब्रवीत् ॥
ममेयं वसुसम्पूर्णा पुरोचन वसुन्धरा ।
यथेयं मम तद्वत्ते स तां रक्षितुमर्हसि ॥
न हि मे कश्चिदन्योऽस्ति विश्वासिकतरस्त्वया ।
सहायो येन सन्धाय मन्त्रयेयं यथा त्वया ॥
स रक्ष तात मन्त्रञ्च सपत्नांश्च ममोद्धर (६) ।

---

(१) सर्व्वशः सर्व्वेभ्यः ।
(२) प्रययुः प्रयातुमुद्युक्ता बभूवुः ।
(३) राज्ञा धृतराष्ट्रेण ।
(४) दुरात्मवान् दुरात्मा ।
(५) भरतर्षभ भरतश्रेष्ठ जनमेजयसम्बोधनम् ।
(६) मन्त्रं मन्त्रणां रक्ष मा प्रकाशय मम सपत्नान् शत्रून् पाण्डवानिति यावत् निपुणेन अभ्युपायेन उद्धर उन्मूलय समूलघातं जहीत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निपुणेनाभ्युपायेन यद् ब्रवीमि तथा कुरु॥
पाण्डवा धृतराष्ट्रेण प्रेषिता वारणावतम्।
उत्सवे विहरिष्यन्ति धृतराष्ट्रस्य शासनात्॥
स त्वं रासभयुक्तेन (१) स्यन्दनेनाशुगामिना।
वारणावतमद्यैव यथा यासि तथा कुरु॥
तत्र गत्वा चतुःशालं गृहं (२) परमसंवृतम् (३)।
नगरोपान्तमाश्रित्य कारयेथा महाधनम् (४)॥
शणसर्ज्जरसादीनि (५) यानि द्रव्याणि कानिचित्।
आग्नेयान्यत्र (६) सन्तीह तानि तत्र प्रदापय॥
सर्पिस्तैलवसाभिश्च (७) लाक्षया चाप्यनल्पया।
मृत्तिकां मिश्रयित्वा त्वं लेपं कुड्येषु (८) दापय॥
शणं तैलं घृतञ्चैव जतु दारूणि चैव हि।
तस्मिन् वेश्मनि सर्व्वाणि निक्षिपेथाः समन्ततः॥

---

(१) रासभाः रासभेभ्यो वड़वासु जाता अश्वविशेषाः तैर्युक्तेन रासभैराकृष्टेनेति यावत्।

(२) चतुःशालं गृहं गृहचतुष्टयात्मकं भवनम्।

(३) परमसंवृतम् अतिगुप्तम्।

(४) महाधनं बहुधनं धनपूर्णमिति यावत्।

(५) सर्ज्जरसः सालनिर्य्यासः धुना इति भाषा।

(६) आग्नेयानि अग्न्युद्दीपकानि।

(७) वसा मेदः चर्व्वि इति भाषा।

(८) कुड्येषु भित्तिषु।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथा च तन्न पश्येरन्(१) परीक्षन्तोऽपि(२) पाण्डवाः ।
आग्नेयमिति तत् कार्य्यमपि चान्येऽपि मानवाः (३) ॥
वेश्मन्येवं कृते तत्र गत्वा तान् परमार्च्चितान् ।
वासयेथाः पाण्डवेयान् कुन्तीञ्च ससुहृज्जनाम् ॥
आसनानि च दिव्यानि यानानि शयनानि च ।
विधातव्यानि पाण्डूनां यथा तुष्येत (४) वै पिता ॥
ज्ञात्वा च तान् सुविश्वस्तान् शयानानकुतोभयान्(५) ॥
अग्निस्त्वया ततो देयो द्वारतस्तस्य (६) वेश्मनः ॥
स तथेति प्रतिज्ञाय कौरवाय (७) पुरोचनः ।
प्रायाद्रासभयुक्तेन स्यन्दनेनाशुगामिना ॥
स गत्वा त्वरितं राजन् (८) दुर्य्योधनमते स्थितः ।
यथोक्तं राजपुत्त्रेण सर्व्वं चक्रे पुरोचनः ॥

---

(१) पश्येरन् पश्येयुः । आत्मनेपदमार्षम् ।
(२) परीक्षन्तः परीक्षमाणाः । परस्मैपदमार्षम् ।
(३) यथा च पाण्डवाः अन्ये च मानवाः परीक्षन्तोऽपि तत् चतुःशालं भवनम् आग्नेयमिति न पश्येरन् नावबुध्येरन् तदपि कार्य्यमित्यन्वयः ।
(४) तुष्येत तुष्येत् । आत्मनेपदमार्षम् ।
(५) अकुतोभयान् भयमशङ्कमानान् ।
(६) द्वारदेशे द्वारमारभ्य वा ।
(७) कौरवाय कौरवः दुर्य्योधनः तस्मै इत्यर्थः ।
(८) राजन्निति जनमेजयसम्बोधनम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाण्डवास्तु रथान् युक्तान् सदश्वैरनिलोपमैः (१) ।
आरोहमाणा (२) भीष्मस्य पादौ जगृहुरार्त्तवत्(३) ॥
राज्ञश्च धृतराष्ट्रस्य द्रोणस्य च महात्मनः ।
अन्येषाञ्चैव वृद्धानां कृपस्य विदुरस्य च ॥
एवं सर्व्वान् कुरून् वृद्धानभिवाद्य यतव्रताः (४) ।
समालिङ्ग्य समानान् वै बालैश्चाप्यभिवादिताः ॥
सर्व्वा मातॄस्तथापृच्छ्य (५) कृत्वा चैव प्रदक्षिणम् ।
सर्व्वाः प्रकृतयश्चैव (६) प्रययुर्वारणावतम् ॥
विदुरश्च महाप्राज्ञस्तथान्ये कुरुपुङ्गवाः ।
पौराश्च पुरुषव्याघ्रानन्वयुः शोककर्षिताः (७) ॥
तत्र केचित् ब्रुवन्ति स्म ब्राह्मणा निर्भयास्तदा ।
दीनान् दृष्ट्वा पाण्डुसुतानतीव (८) भृशदुःखिताः ॥

---

(१) अनिलोपमैः वायुसदृशैः वायुसमवेगशालिभिरिति यावत् ।

(२) आरोहमाणाः आरोहन्तः । आत्मनेपदमार्षम् ।

(३) आर्त्तवत् आर्त्ताः । स्वार्थे वतिरार्षः ।

(४) यतव्रताः नियतव्रताः सदाचारपरिपालनरूपं व्रतमनुतिष्ठमाना इत्यर्थः ।

(५) आपृच्छ्य सम्भाष्य ।

(६) प्रकृतयः प्रकृतीः । आर्षः प्रयोगः ।

(७) शोककर्षिताः शोकेन कृशीकृताः शोकाकुला इति यावत् । अन्वयुः अनुयान्ति स्म ।

(८) अतीवेत्यस्य दीनानित्यनेनान्वयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषमं पश्यते (१) राजा सर्व्वथा च सुमन्दधीः ।
कौरव्यो धृतराष्ट्रस्तु न च धर्म्मं प्रपश्यति ॥
न हि पापमपापात्मा रोचयिष्यति (२) पाण्डवः ।
भीमो वा बलिनां श्रेष्ठः कौन्तेयो वा धनञ्जयः ॥
अधर्म्म्यमिदमत्यन्तं कथं भीष्मोऽनुमन्यते ।
विवास्यमानानस्थाने नगरे योऽभिमन्यते (३) ॥
पितेव हि नृपोऽस्माकमभूच्छान्तनवः पुरा ।
विचित्रवीर्य्यो राजर्षिः पाण्डुश्च कुरुनन्दनः ॥
तस्मिंस्तु (४) पुरुषव्याघ्रे देवभावं गते सति ।
राजपुत्रानिमान् बालान् धृतराष्ट्रो न मृष्यते ॥
वयमेतदनिच्छन्तः सर्व्वे एव पुरोत्तमात् ।
गृहान् विहाय गच्छामो यत्र गन्ता युधिष्ठिरः ॥
तांस्तथावादिनः पौरान् दुःखितान् दुःखकर्षितः ।
उवाच मनसा ध्यात्वा (५) धर्म्मराजो युधिष्ठिरः ॥

---

(१) विषमं पश्यते विरूपं पश्यति न सम्यक् विजानातीत्यर्थः । पश्यते इत्यात्मनेपदमार्षम् ।

(२) पापम् अनिष्टम् धृतराष्ट्रस्येति शेषः । अपापात्मा शुद्धस्वभावः । रोचयिष्यति अभिलषिष्यति ।

(३) अस्थाने अनुचितस्थानभूते नगरे वारणावते विवास्यमानान् अभिमन्यते अनुमोदते ।

(४) तस्मिन् पुरुषव्याघ्रे पाण्डौ ।

(५) मनसा ध्यात्वा मनसा विचिन्त्य वक्तव्यमवधार्य्येत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पिता मान्यो गुरुः श्रेष्ठो यदाह पृथिवीपतिः।
अशङ्कमानैस्तत् कार्य्यमस्माभिरिति नो व्रतम् (१)॥
भवन्तः सुहृदोऽस्माकमस्मान् कृत्वा प्रदक्षिणम् (२)।
प्रतिनन्द्य (३) तथाशीर्भिर्निवर्त्तध्वं(४) यथागृहम् (५)
यदा तु कार्य्यमस्माकं भवद्भिरुपपत्स्यते (६)।
तदा करिष्यथास्माकं प्रियाणि च हितानि च॥
एवमुक्तास्ततः पौराः कृत्वा चापि प्रदक्षिणम्।
आशीर्भिरभिनन्द्यैतान् जग्मुर्नगरमेव च॥
पौरेषु विनिवृत्तेषु विदुरः सर्व्वधर्म्मवित्॥
बोधयन् (७) पाण्डवश्रेष्ठमिदं वचनमब्रवीत्॥
यो जानाति परप्रज्ञां नीतिशास्त्रानुसारिणीम्।
विज्ञायेह तथा कुर्य्यादापदं निस्तरेद्यथा (८)॥

---

(१) अशङ्कमानैः हितमहितं वेति अतर्कयद्भिः। नो व्रतम् अस्माकं संकल्पः।

(२) प्रदक्षिणं कृत्वा प्रदक्षिणीकृत्य। आर्षः प्रयोगः।

(३) प्रतिनन्द्य प्रीणयित्वा वर्द्धयित्वेति यावत्।

(४) निवर्त्तध्वं निवर्त्तन्ताम्। आर्षः प्रयोगः।

(५) यथागृहम् गृहमनतिक्रम्य स्वं स्वं गृहं प्रतीत्यर्थः।

(६) यदा पुनः अस्माकं कार्य्यं भवद्भिः करणीयं उपपत्स्यते सम्पत्स्यते भवतां साहाय्यमपेक्षते इत्यर्थः।

(७) बोधयन् अज्ञातं दुर्य्योधनकृतं कपटं ज्ञापयन्।

(८) यः पुरुषः नीतिशास्त्रानुसारिणीं परप्रज्ञां परस्य शत्रोः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अलोहं निशितं शस्त्रं शरीरपरिकर्त्तनम् ।
यो वेत्ति न तु तं घ्नन्ति प्रतिघातविदं द्विषः (१) ॥
कक्षघ्नः शिशिरघ्नश्च महाकक्षे बिलौकसः ।
न दहेदिति चात्मानं यो रक्षति स जीवति (२) ॥
नाचक्षुर्वेत्ति पन्थानं नाचक्षुर्विन्दते दिशः ।

प्रज्ञां बुद्धिम् अभिप्रायमिति यावत् जानाति बुध्यते स विज्ञाय सम्यक् विविच्य इह जगति तथा कुर्य्यात् यथा आपदं निस्तरेत् अतिक्रामेत्। युष्माकं विनाशार्थं शत्रुभि-रुपायः कल्पितः तमुद्भाव्य सर्वाहितैः प्रतीकारः कर्त्तव्यः इति भावः ।

(१) यः पुरुषः शरीरपरिकर्त्तनं शरीरनाशकम् अलोहं लौह-व्यतिरिक्तं निशितं तीक्ष्णं दुर्निवारमिति यावत् शस्त्रं परप्रवर्त्तितं मारणोपायं वेत्ति बुध्यते द्विषः शत्रवः प्रति-घातविदं प्रतीकारसमर्थं तं न घ्नन्ति। अग्निदाहरूपो युष्माकं मारणोपायः शत्रुभिः प्रवर्त्तितस्तत्प्रतीकारसमर्थ-श्चेदात्मानं रक्षिष्यतीति भावः ।

(२) कक्षघ्नः तृणकाष्ठादिसंहारकोऽग्निः बिलौकसः बिल-वासिनो जीवान् न दहेत् शिशिरघ्नः सूर्य्यः महाकक्षे महावने स्थितानिति शेषः न दहेत् विनाशयेत् इति बुद्धा य आत्मानं रक्षति स जीवति। वारणावते युष्माक-मग्निभयमस्ति ।अतो वासगृहे बिलं कृत्वा रात्रौ तत्र स्थातव्यम् अग्नौ दत्ते सुरङ्गापथेन निष्क्रम्य पलायमानै-र्दिवा महावने स्थातव्यम् तथा कृते प्रकाशसम्भावनाविर-हात् शत्रवो न युष्माकं गतिं ज्ञास्यन्तीति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाधृतिर्भूतिमाप्नोति बुध्यस्वैवं प्रबोधितः (१) ॥
चरन् मार्गान् विजानाति नक्षत्रैर्विन्दते दिशः ।
आत्मना चात्मनः पञ्च पीड़यन्नानुपीड्यते (२) ॥
एवमुक्तः प्रत्युवाच धर्म्मराजो युधिष्ठिरः ।
विदुरं विदुषां श्रेष्ठं ज्ञातमित्येव (३) पाण्डवः ॥
अनुशिष्यानुगम्यैतान् कृत्वा चैव प्रदक्षिणम् ।
पाण्डवानभ्यनुज्ञाप्य (४) विदुरः प्रययौ गृहान् ॥

---

(१) अचक्षुः दृष्टिहीनः पन्थानं न वेत्ति अचक्षुः दृष्टिहीनः दिशो न विन्दते न जानाति। वारणावतं गत्वा निर्गम-प्रवेशादिपथज्ञानमवहितैः कर्त्तव्यम् अन्यथा पलायन-मशक्यं स्यादिति भावः। अधृतिः धैर्य्यहीनः भूतिं सम्पदं नाप्नोति अतो धैर्य्यमवलम्बनीयम्। एवम् उक्तप्रकारेण प्रबोधितो बुद्धस्व।

(२) चरन् इतस्ततो भ्राम्यन् मार्गान् पथः विजानाति मृग-यादिव्यापारप्रसङ्गेन वर्त्मज्ञानं करणीयमिति भावः। नक्षत्रैर्दिशो विन्दते नक्षत्रोदयस्थितिसञ्चारादिपरिज्ञानं रजन्यां दिङ्निर्णये प्रधानं साधनम् अतस्तस्मादनेऽव-हितैर्भवितव्यमिति भावः। आत्मना बुद्ध्या विवेकशक्त्या इति यावत् पञ्च आत्मनः इन्द्रियाणि पीडयन् निरुन्धन् न अनुपीड्यते न शत्रुभिरभिभूयते। अतः सर्व्वथा जिते-न्द्रियैर्भवितव्यमिति भावः।

(३) ज्ञातमित्येव ज्ञातं बुद्धम् एतावन्मात्रमेव।

(४) पाण्डवानामनुज्ञां लब्ध्वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निवृत्ते विदुरे चापि भीष्मे पौरजने तथा ।
अजातशत्रुमामन्त्र्य (१) कुन्ती वचनमब्रवीत् ॥
क्षत्ता यदब्रवीद्वाक्यं जनमध्येऽब्रुवन्निव (२) ।
त्वया च स तथेत्युक्तो जानीमो न च तद्वयम् (३) ॥
यदीदं शक्यमस्माभिर्ज्ञातुं नैव च दोषवत् (४) ॥
श्रोतुमिच्छामि तं सर्व्वं संवादं (५) तव तस्य च ॥

युधिष्ठिर उवाच ।

गृहादग्निश्च बोद्धव्य इति मां विदुरोऽब्रवीत् ।
पन्थाश्च वो नाविदितः कश्चित् स्यादिति धर्म्मधीः ॥
जितेन्द्रियश्च वसुधां प्राप्स्यतीति च मेऽब्रवीत् ।
विज्ञातमिति तत् सर्व्वं प्रत्युक्तो विदुरो मया ॥

वैशम्पायन उवाच ।

अष्टमेऽहनि रोहिण्यां प्रयाताः फाल्गुनस्य ते ।
वारणावतमासाद्य ददृशुर्नागरं जनम् ॥
ततः सर्व्वाः प्रकृतयो नगराद्वारणावतात् ।
अभिजग्मुर्नरश्रेष्ठान् श्रुत्वैव परया मुदा ॥

---

(१) अजातशत्रुं युधिष्ठिरम् आमन्त्र्य सम्बोध्य । युधिष्ठिरस्य न कोऽपि शत्रुरासीत् अतोऽस्याजातशत्रुरिति संज्ञा ।
(२) अन्येषां बोधाविषयत्वात् ।
(३) यद्वाक्यमब्रवीत् तद्वयं न जानीमः न बुध्यामहे ।
(४) नैव च दोषवत् अस्माभिर्ज्ञातं यदि दोषाय न भवति ।
(५) संवादम् मिथः सम्भाषम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ते समासाद्य कौन्तेयान् वारणावतका (१) जनाः।
कृत्वा जयाशिषः (२) सर्व्वे परिवार्य्यावतस्थिरे॥
तैर्वृतः पुरुषव्याघ्रो धर्म्मराजो युधिष्ठिरः।
विबभौ देवसङ्काशो (३) वज्रपाणिरिवामरैः॥
सत्कृतास्चैव पौरैस्ते पौरान् सत्कृत्य चानघाः (४)।
अलङ्कृतं जनाकीर्णं विविशुर्वारणावतम्॥
ते प्रविश्य पुरीं वीरास्तूर्णं जग्मुरथो गृहान्।
ब्राह्मणानां महीपाल रतानां स्वेषु कर्म्मसु॥
नगराधिकृतानाञ्च (५) गृहाणि रथिनां तथा (६)।
उपतस्थुर्नरश्रेष्ठा वैश्यशूद्रगृहाण्यपि॥
अर्च्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभ।
जग्मुरावसथं पश्चात् पुरोचनपुरःसराः॥
तेभ्यो भक्ष्याणि पानानि शयनानि शुभानि (७) च।
आसनानि च मुख्यानि (८) प्रददौ स पुरोचनः॥

---

(१) वारणावतकाः वारणावतवासिनः।
(२) जयाशिषः जयम् आशिषश्च।
(३) देवसङ्काशः देवसदृशः।
(४) अनघाः निष्पापाः विशुद्धचरिता इति यावत्।
(५) नगराधिकृतानां नगररक्षणे नियुक्तानां पुरुषाणाम्।
(६) रथिनां सेनापतीनाम्।
(७) शुभानि रमणीयानि शयनानि शय्याः।
(८) मुख्यानि प्रधानानि महामूल्यानीति यावत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्र ते सत्कृतास्तेन सुमहार्हपरिच्छदाः ।
उपास्यमानाः पुरुषैरूषुः पुरनिवासिभिः ॥
दशरात्रोषितानान्तु तत्र तेषां पुरोचनः ।
निवेदयामास गृहं शिवाख्यमशिवं (१) तदा ॥
तत्तु ते पुरुषव्याघ्रा विविशुः सपरिच्छदाः (२) ।
पुरोचनस्य वचनात् कैलासमिव गुह्यकाः (३) ॥
तच्चागारमभिप्रेक्ष्य सर्व्वधर्म्मभृतां वरः ।
उवाचाग्नेयमित्येवं भीमसेनं युधिष्ठिरः ।
जिघ्राणोऽस्य (४) वसागन्धं सर्पिर्जतुविमिश्रितम् ॥
विस्पष्टं मामयं पापो दग्धुकामः पुरोचनः ।
तथाहि वर्त्तते मन्दः सुयोधनवशे स्थितः (५) ॥
इमान्तु तां महाबुद्धिर्विदुरो दृष्टवांस्तदा (६) ।

---

(१) शिवाख्यमशिवम् आपाततः शिवमिव प्रतीयमानम् वस्तुतोऽशिवम् पाण्डवानां वासार्थं निर्मितमाग्नेयं गृहमित्यर्थः ।

(२) सपरिच्छदाः सानुचराः सपरिजनाश्च ।

(३) गुह्यकाः कुबेरानुचराः देवयोनिविशेषाः ।

(४) जिघ्राणः जिघ्रन् । आत्मनेपदमार्षम् ।

(५) मन्दः मूढः दुर्मतिरिति यावत् पुरोचनः सुयोधनवशे स्थितः दुर्य्योधनवशवर्त्ती सन् तथा वर्त्तते तथा प्रवर्त्तते अस्मन्मारणार्थं यतते इत्यर्थः ।

(६) दृष्टवान् बुद्धवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आपदं तेन मां पार्थं स सम्बोधितवान् (१) पुरा ॥
ते वयं बोधितास्तेन नित्यमस्मद्धितैषिणा ।
पिता कनीयसा स्नेहाद्बुद्धिमन्तोऽशिवं गृहम् ।
अनार्य्यैः सुकृतं मूढैर्दुर्य्योधनवशानुगैः ॥

भीमसेन उवाच ।

यदीदं गृहमाग्नेयं विहितं (२) मन्यते भवान् ।
तत्रैव साधु गच्छामो यत्र पूर्व्वोषिता (३) वयम् ॥

युधिष्ठिर उवाच ।

इह यत्तैर्निराकारैर्वस्तव्यमिति रोचये ।
अप्रमत्तैर्विचिन्वद्भिर्गतिमिष्टां ध्रुवामितः (४) ॥
यदि विन्देत (५) चाकारमस्माकं स पुरोचनः ।

---

(१) सम्बोधितवान् बोधयामास।

(२) विहितं निर्म्मितम् ।

(३) पूर्व्वोषिताः पूर्व्वं कृतवासाः ।

(४) यत्तैः यत्नवद्भिः । निराकारैः आकारहीनैः गूढाकारैरिति यावत् अस्माभिस्तथा वर्त्तितव्यं यथा मुखरागादिदर्शनेन न कोऽप्यस्माकमान्तरं भावमवबोद्धुं शक्नुयादिति भावः । अप्रमत्तैः अवहितैः । इष्टाम् अभिलषितां ध्रुवां स्थिरां परिणामे निरुपद्रवामिति यावत् इतः अस्मादाग्नेयात् गृहात् गतिं प्रस्थानं विचिन्वद्भिः अन्विष्यद्भिः चिन्तयद्भिरिति यावत् ।

(५) विन्देत लभेत जानीयादिति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्रकारी ततो भूत्वा प्रसह्यापि दहेत (१) नः ॥
नायं बिभेत्युपक्रोशादधर्म्माद्वा (२) पुरोचनः ।
तथाहि वर्त्तते मन्दः सुयोधनवशे स्थितः ॥
वयं तु यदि दाहस्य बिभ्यतः प्रद्रवेम (३) हि ।
स्पशैर्नो घातयेत् सर्व्वान् राज्यलुब्धः सुयोधनः (४) ॥
अपदस्थान् पदे तिष्ठन्नपक्षान् पक्षसंस्थितः ।
हीनकोषान् महाकोषः प्रयोगैर्घातयेद्ध्रुवम् (५) ॥
तदस्माभिरिमं पापं (६) तञ्च पापं सुयोधनम् ।
वञ्चयद्भिर्निवस्तव्यं (७) छन्नावासं (८) क्वचित् क्वचित् ॥
ते वयं मृगयाशीलाश्चराम वसुधामिमाम् ।

---

(१) दहेत दहेत्। आत्मनेपदमार्षम्। (२) उपक्रोशः निन्दा।

(३) दाहस्य बिभ्यतः दाहात् त्रस्यन्तः दाहभयेनेति भावः। दाहस्येति षष्ठीप्रयोग आर्षः। प्रद्रवेम पलायेमहि।

(४) स्पशैः चरैः। राज्यलुब्धः राज्यलोभाक्रान्तः।

(५) अपक्षान् असहायान्। पक्षसंस्थितः पक्षैः सहायैः संस्थितः परिवृतः बहुसहाय इति यावत्। हीनकोषान् निर्धनान्। महाकोषः बहुधनः। प्रयोगैः नीतिशास्त्रोक्तैः सामदानभेददण्डाख्यैश्चतुर्भिरुपायैः।

(६) इमं पुरोचनम्। पापं पापात्मानम्।

(७) वञ्चयद्भिः वञ्चयमानैः। परस्मैपदमार्षम्।

(८) छन्नावासम् छन्नः गूढः अन्यैरतर्कित इति यावत् आवासः अवस्थितिस्थानं यस्मिन् कर्म्मणि तत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथा नो विदिता मार्गा भविष्यन्ति पलायताम् (१) ॥
भौमञ्च (२) बिलमद्यैव करवाम सुसंवृतम्।
गूढोच्छ्वासान्न नस्तत्र (३) हुताशः संप्रधक्ष्यति ॥
वसतोऽत्र (४) यथा चास्मान्न बुध्येत पुरोचनः।
पौरो वापि जनः कश्चित्तथा कार्य्यमतन्द्रितैः (५) ॥

वैशम्पायन उवाच।

विदुरस्य सुहृत् कश्चित् खनकः कुशलः शुचिः।
विविक्ते पाण्डवान् राजन्निदं वचनमब्रवीत् (६) ॥
प्रहितो विदुरेणास्मि खनकः कुशलो ह्यहम्।
पाण्डवानां प्रियं कार्य्यमिति किं करवाणि वः (७) ॥

---

(१) पलायताम् पलायनानाम्। परस्मैपदमार्षम्।

(२) भौमं भूमेरन्तर्वर्त्ति।

(३) तत्र बिले गूढोच्छ्वासान् गूढमवस्थितान्। गूढः गुप्तः अन्यैरतर्कित इति यावत्। उच्छ्वासः जीवनम् अवस्थितिरिति यावत्।

(४) अत्र बिले।

(५) अतन्द्रितैः अनलसैः अवहितैर्वा अस्माभिरिति शेषः।

(६) खनकः यो भूमिं खनति कुशल कार्य्यनिपुणः। शुचिः अन्तःशुद्धः अर्थप्रदानादिना भेदयितुमशक्य इति यावत्। विविक्ते विजने। राजन्निति जनमेजयसम्बोधनम्।

(७) पाण्डवानां प्रियं कार्य्यमित्युपदिश्य विदुरेण प्रहितः प्रेरितोऽस्मि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कृष्णपक्षे चतुर्दश्यां रात्रावस्य पुरोचनः ।
भवनस्य तव द्वारि प्रदास्यति हुताशनम् ॥
माता सह प्रदग्धव्याः पाण्डवाः पुरुषर्षभ ।
इति व्यवसितं (१) तस्य धार्त्तराष्ट्रस्य दुर्मतेः ॥
किञ्चिच्च विदुरेणोक्तो म्लेच्छवाचासि (२) पाण्डव ।
त्वया च तत्तथेत्युक्तमेतद्विश्वासकारणम् (३) ॥
उवाच तं सत्यधृतिः (४) कुन्तीपुत्त्रो युधिष्ठिरः ।
अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै (५) ॥
शुचिमाप्तं (६) प्रियञ्चैव सदा च दृढभक्तिकम् ।
न विद्यते कवेः किञ्चिदभिज्ञानप्रयोजनम् (७) ॥
यथा तस्य तथा नस्त्वं निर्विशेषा वयं त्वयि ।

---

(१) व्यवसितं चेष्टितं सङ्कल्पो वा ।

(२) म्लेच्छवाचा म्लेच्छभाषया ।

(३) विश्वासकारणम् अहं तव श्रेयःसम्पादनार्थं विदुरेण प्रेरितः न तु विपक्षप्रणिधिरिति विश्वासजनकम् ।

(४) सत्यधृतिः सत्ये धृतिः अनुरागो यस्य सः सत्यव्रतपरायण इत्यर्थः ।

(५) त्वं विदुरस्य सुहृदिति प्रत्यभिजानामि ।

(६) आप्तं प्रत्ययितं विश्वस्तमिति यावत् ।

(७) कवेः सर्वज्ञस्य विदुरस्येत्यर्थः । त्वं विदुरस्य सुहृदिति विश्वासोत्पादनार्थमभिज्ञानापेक्षा नास्तीति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवतश्च यथा तस्य पालयास्मान् यथा कविः (१) ॥
इदं शरणमाग्नेयं मदर्थमिति मे मतिः।
पुरोचनेन विहितं धार्त्तराष्ट्रस्य शासनात् (२) ॥
स पापः कोषवांश्चैव ससहायश्च दुर्मतिः।
अस्मानपि च पापात्मा नित्यकालं प्रबाधते (३) ॥
स भवान् मोचयत्वस्मान् यत्नेनास्माद्धुताशनात्।
अस्मास्विह हि दग्धेषु सकामः (४) स्यात् सुयोधनः ॥
इदं तदशुभं नूनं तस्य कर्म्म चिकीर्षितम्।
प्रागेव विदुरो वेद (५) तेनास्मानन्वबोधयत् ॥
सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान् पुरा।

---

(१) यथा त्वं तस्य विदुरस्य सुहृदिति शेषः नः अस्माकमपि तथा सुहृदित्यर्थः। वयं त्वयि निर्विशेषा विदुरादविशेषाः विदुरो यथा त्वयि वर्त्तते वयमपि तथा त्वयि वर्त्तामहे इति भावः। वयं तस्य विदुरस्य यथा रक्षणीया इति शेषः भवतश्च भवतोऽपि तथा। अतः कविर्यथा विदुर इव त्वमस्मान् पालय रक्ष।

(२) शरणं गृहम्। मदर्थं मद्विनाशार्थम्। शासनात् आदेशात्।

(३) सः दुर्य्योधनः। पापः दुष्टाशयः। पापात्मा दुरात्मा। प्रबाधते पीड़यति।

(४) सकामः पूर्णमनोरथः।

(५) वेद विवेद। वर्त्तमानप्रयोग आर्षः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुरोचनस्याविदितानस्मांस्त्वं प्रतिमोचय ॥
स तथेति प्रतिश्रुत्य खनको यत्नमास्थितः ।
मृत्तिकामुत्किरन् नाम चकार सुमहद्बिलम् (१) ॥
चक्रे च वेश्मनस्तस्य मध्ये नातिमहद्बिलम् ।
कपाटयुक्तमज्ञातं समं भूम्याश्च भारत (२) ॥
तत्र ते सायुधाः सर्व्वे वसन्ति स्म क्षपां नृप ।
दिवा चरन्ति मृगयां पाण्डवेया वनाद्वनम् (३) ॥
विश्वस्तवदविश्वस्ता वञ्चयन्तः (४) पुरोचनम् ।
अतुष्टास्तुष्टवद्राजन्नूषुः परमविस्मिताः (५) ॥
न चैतानन्वबुध्यन्त (६) नरा नगरवासिनः ।
अन्यत्र (७) विदुरामात्यात् तस्मात् खनकसत्तमात् ॥
तांस्तु दृष्ट्वा सुमनसः (८) परिसंवत्सरोषितान् ।
विश्वस्तांश्चैव संलक्ष्य हर्षञ्चक्रे पुरोचनः ॥

---

(१) मृत्तिकाम् उत्किरन् बहिः क्षिपन्। सुमहत् बिलम् अतिमहान्तं गर्त्तं सुरङ्गामिति यावत्।

(२) भारत भरतकुलप्रसूत। जनमेजयसम्बोधनम्।

(३) वनाद्वनम् वनान्तरं गत्वेत्यर्थः।

(४) वञ्चयन्तः वञ्चयमानाः। परस्मैपदमार्षम्।

(५) परमविस्मिताः अत्यन्तं विस्मयाविष्टाः।

(६) ते किमाचरन्ति कुत्र वा तिष्ठन्तीति न बुबुधिरे इत्यर्थः।

(७) अन्यत्र विना।

(८) सुमनसः प्रसन्नचित्तान्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः ।
भीमसेनार्ज्जुनौ चैव यमौ (१) प्रोवाच धर्म्मवित् ॥
अस्मानयं सुविश्वस्तान् वेत्ति (२) पापः पुरोचनः ।
वञ्चितोऽयं नृशंसात्मा कालं मन्ये पलायने (३) ॥
आयुधागारमादीप्य (४) दग्ध्वा चैव पुरोचनम् ।
षट् प्राणिनो निधायेह(५) द्रवामोऽनभिलक्षिताः(६) ॥
अथ दानापदेशेन (७) कुन्ती ब्राह्मणभोजनम् ।
चक्रे निशि महाराज (८) आजग्मुस्तत्र योषितः ॥
ता विहृत्य यथाकामं भुक्त्वा पीत्वा च भारत ।

---

(१) यमौ युग्मजातौ नकुलसहदेवौ ।

(२) वेत्ति मन्यते ।

(३) पलायनस्यायं समय इति मन्ये।

(४) आदीप्य दग्ध्वा ।

(५) इह अस्मिन् गृहे षट् प्राणिनः एकां स्त्रीं पञ्च पुरुषांश्च निधाय स्थापयित्वा । षट्सु प्राणिषु दग्धेषु दृष्टेषु पाण्डवा दग्धा इति दुर्य्योधनादयो मंस्यन्ते तद्दर्शने च पाण्डवान् पलायितान् मत्वा पुनस्तेषां पाण्डवानामन्वेषणे प्रवृत्तिः स्यात् तद्वारणार्थं षट्प्राणिस्थापनम् ।

(६) द्रवामः पलायामहे । अनभिलक्षिताः अन्यैरपरिज्ञाताः ।

(७) दानापदेशेन दानव्याजेन दानक्रियामुपलक्ष्येत्यर्थः ।

(८) महाराजेति जनमेजयसम्बोधनम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जग्मुर्निशि गृहानेव समनुज्ञाप्य माधवीम् (१) ॥
निषादी पञ्चपुत्त्रा तु तस्मिन् भोज्ये (२) यदृच्छया ।
अन्नार्थिनी समभ्यागात् सपुत्त्रा कालनोदिता (३) ॥
सा पीत्वा मदिरां मत्ता सपुत्त्रा मदविह्वला ।
सह सर्व्वैः सुतै राजंस्तस्मिन्नेव निवेशने ।
सुष्वाप विगतज्ञाना मृतकल्पा नराधिप ॥
अथ प्रवाते तुमुले (४) निशि सुप्ते जने तथा ।
तदुपादीपयद्भीमः शेते (५) यत्र पुरोचनः (६) ॥
ततो जतुगृहद्वारं दीपयामास पाण्डवः ।
समन्ततो ददौ पश्चादग्निं तत्र निवेशने ॥
ज्ञात्वा तु तद्गृहं सर्व्वमादीप्तं पाण्डुनन्दनाः ।
सुरङ्गां विविशुस्तूर्णं मात्रा सार्द्धमरिन्दमाः ॥
ततः प्रतापः सुमहान् शब्दश्चैव विभावसोः ।

---

(१) माधवीं कुन्तीम् ।

(२) भोज्ये ब्राह्मणभोजनव्यापारे ।

(३) कालनोदिता नियतिप्रेरिता ।

(४) तुमुले महति प्रवाते वायौ वाति सतीति शेषः ।

(५) शेते अशेत । वर्त्तमानप्रयोग आर्षः ।

(६) यत्र यस्मिन् गृहे पुरोचनः शेते तत् उपादीपयत् तत्र अग्निं ददौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रादुरासीत्तदा तेन बुबुधे (१) स जनव्रजः (२) ॥
तदवेक्ष्य गृहं दीप्तमाहुः (३) पौराः कृशानुना ॥
दुर्य्योधनप्रयुक्तेन पापेनाकृतबुद्धिना (४) ।
गृहमात्मविनाशाय(५) कारितं दाहितञ्च तत् ॥
अहो धिक् धृतराष्ट्रस्य बुद्धिर्नाति समञ्जसी (६) ।
यः शुचीन् पाण्डुदायादान्(७) दाहयामास शत्रुवत् ॥
दिष्ट्या त्विदानीं पापात्मा दग्धोऽयमतिदुर्मतिः ।
अनागसः(८) सुविश्वस्तान् यो(९) ददाह नरोत्तमान् ॥
एवं ते विलपन्ति स्म वारणावतका जनाः ।
परिवार्य्य (१०) गृहं तच्च तस्थू रात्रौ समन्ततः ॥

---

(१) बुबुधे जागरितवान् ।
(२) जनव्रजः वारणावतवासी लोकसमूहः ।
(३) दीप्तं प्रज्वलितम् ।
(४) अकृतबुद्धिना अपरिणतबुद्धिना अपरिणामदर्शिनेति यावत् ।
(५) आत्मविनाशाय स्वजनध्वंसाय ।
(६) धृतराष्ट्रस्य बुद्धिः समञ्जसी न्यायमार्गानुसारिणी नास्ति न भवति ।
(७) शुचीन् विशुद्धचरितान् पाण्डुदायादान् पाण्डुतनयान् ।
(८) अनागसः निरपराधान् ।
(९) यः पुरोचनः ।
(१०) परिवार्य्य वेष्टयित्वा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाण्डवाश्चापि ते सर्व्वे सह मात्रा सुदुःखिताः ।
विलेन तेन निर्गत्य जग्मुर्द्रुतमलक्षिताः ॥

द्रौपदीयुधिष्ठिरसंवादः ।

ततो वनगताः पार्थाः सायाह्ने सह कृष्णया (१) ।
उपविष्टाः कथाश्चक्रुर्दुःखशोकपरायणाः ॥
प्रिया च दर्शनीया च पण्डिता च पतिव्रता (२) ।
अथ कृष्णा धर्म्मराजमिदं वचनमब्रवीत् ॥
न नूनं तस्य पापस्य दुःखमस्मासु (३) किञ्चन ।
विद्यते धार्त्तराष्ट्रस्य नृशंसस्य दुरात्मनः ॥
यस्त्वां राजन् मया सार्द्धमजिनैः प्रतिवासितम् (४) ।
वनं प्रस्थाप्य दुष्टात्मा नान्वतप्यत (५) दुर्मतिः ॥

---

(१) कृष्णया द्रौपद्या ।

(२) प्रिया प्रीतिप्रदा पतीनामिति शेषः । दर्शनीया दर्शनयोग्या रूपलावण्यवतीति यावत् । पण्डिता हिताहितविवेकसमर्था ।

(३) अस्मासु दुःखितेष्विति शेषः ।

(४) अजिनैः प्रतिवासितम् अजिनैः पशुचर्म्मभिः प्रतिवासितम् आच्छादितं पशुचर्म्माणि परिदधानमित्यर्थः ।

(५) न अन्वतप्यत नानुतापमभजत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आयसं (१) हृदयं नूनं तस्य दुष्कृतकर्म्मणः ।
यस्त्वां धर्म्मपरं ज्येष्ठं रूक्षाण्यश्रावयत्तदा (२) ॥
सुखोचितमदुःखार्हं (३) दुरात्मा ससुहृज्जनः ।
ईदृशं दुःखमानीय (४) मोदते पापपूरुषः ॥
चतुर्णामेव पापानामस्रं न पतितं तदा ।
त्वयि भारत निष्क्रान्ते वनायाजिनवाससि ॥
दुर्य्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः ।
दुर्भ्रातुस्तस्य चोग्रस्य राजन् दुःशासनस्य च (५) ॥
इतरेषान्तु सर्व्वेषां कुरूणां कुरुसत्तम ।
दुःखेनाभिपरीतानां (६) नेत्रेभ्यः प्रापतज्जलम् ॥
इदञ्च शयनं दृष्ट्वा यच्चासीत्ते पुरातनम् (७) ।

---

(१) आयसम् अयः लौहः तेनैव निर्म्मितम् अतिकठिनमिति यावत् ।

(२) रूक्षाणि परुषवचनानि ।

(३) सुखोचितं सुखाभ्यस्तं सुखेन कालमतिवाहितवन्तमिति यावत् अदुःखार्हं दुःखभोगानर्हं त्वामिति शेषः ।

(४) ईदृशं दुःसहं दुःखम् आनीय प्रापय्य दुस्तरे दुःखसागरे निक्षिप्येत्यर्थः ।

(५) दुर्भ्रातुः असद्भ्रातुः उल्लङ्घितभ्रातृधर्म्मस्येत्यर्थः । उग्रस्य क्रूरप्रकृतेः ।

(६) अभिपरीतानाम् अभिभूतानाम् ।

(७) इदम् इदानीन्तनं शयनं शय्यां दृष्ट्वा यच्च ते तव पुरातनं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शोचामि त्वां महाराज दुःखानर्हं सुखोचितम् ॥
दान्तं तच्च सभामध्ये आसनं (१) रत्नभूषितम् ।
दृष्ट्वा कुशवृषीं (२) चेमां शोको मां रुन्धयत्यलम् (३) ॥
यदपश्यं सभायां त्वां राजभिः परिवारितम् ।
तच्च राजन्नपश्यन्त्याः का शान्तिर्हृदयस्य मे ॥
या त्वाहं (४) चन्दनादिग्धमपश्यं सूर्य्यवर्च्चसम् ।
सा त्वां पङ्कमलादिग्धं दृष्ट्वा मुह्यामि भारत (५) ॥
या त्वाहं कौषिकैर्वस्त्रैः (६) शुभ्रैराच्छादितं पुरा ।
दृष्टवत्यस्मि राजेन्द्र सा त्वां पश्यामि चीरिणम् (७) ॥
यांस्ते भ्रातॄन् महाराज युवानो मृष्टकुण्डलाः (८) ।

राज्याधिकारकालिकमिति यावत् शयनमासीत् तत् संस्तृत्येति शेषः उभयोरन्तरं समालोच्येत्यर्थः ।

(१) दान्तं गजदन्तविनिर्मितम् आसनं सिंहासनम् संस्तृत्येति शेषः ।

(२) कुशवृषीं कुशासनम् ।

(३) रुन्धयति आवृणोति मोहयतीत्यर्थः । रुन्धयतीत्यार्षः प्रयोगः रुणद्धीति साधुः ।

(४) त्वा त्वाम् ।

(५) पङ्कमलादिग्धम् पङ्करूपेण मलेन प्रलिप्तम् । मुह्यामि मोहमाप्नोमि विचेतना भवामीति यावत् ।

(६) कौषिकैः कृमिकोषसम्भूतैः पट्टसूत्रनिर्मितैरिति यावत् ।

(७) चीरिणम् चीरधारिणम् । चीरं छिन्नवस्त्रम् ।

(८) मृष्टकुण्डलाः उज्ज्वलकुण्डलधारिणः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभोजयन्त मिष्टान्नैः सूदाः परमसंस्कृतैः (१) ॥
सर्व्वांस्तानद्य संप्रेक्ष्य वने वन्येन जीविनः (२)।
अदुःखार्हान् मनुष्येन्द्र नोपशाम्यति मे मनः ॥
भीमसेनमिमञ्चापि दुःखितं वनवासिनम्।
ध्यायतः किं न मन्युस्ते प्राप्ते काले विवर्द्धते (३) ॥
अयं कुरून् रणे सर्व्वान् हन्तुमुत्सहते (४) प्रभुः (५)।
त्वत्प्रतिज्ञां (६) प्रतीक्षंस्तु (७) सहतेऽयं वृकोदरः ॥
योऽर्ज्जुनेनार्ज्जुनस्तुल्यो द्विबाहुर्बहुबाहुना।
शरावमर्द्दे शीघ्रत्वात् (८) कालान्तकयमोपमः (९) ॥

---

(१) परमसंस्कृतैः अतिमहता यत्नेन पक्वैः।

(२) वन्येन वनोद्भवेन फलमूलादिना।

(३) ध्यायतः चिन्तयतः भीमसेनस्येदृशीं दशां पर्य्यालोचयत इत्यर्थः। मन्युः क्रोधः। प्राप्ते काले क्रोधप्रदर्शनस्योचिते काले उपस्थिते तादृशः कालः प्राप्तः इति भावः।

(४) उत्सहते प्रभवति।

(५) प्रभुः समर्थः प्रभूतबलविक्रमसम्पन्न इति यावत्।

(६) त्वत्प्रतिज्ञां त्वया कृतां द्वादशवार्षिकवनवासप्रतिज्ञाम्।

(७) प्रतीक्षन् प्रतीक्षमाणः। परस्मैपदमार्षम्।

(८) योऽर्ज्जुनः शरावमर्द्दे शरैर्विपक्षदलने विपक्षेषु शरक्षेपे इति यावत् शीघ्रत्वात् लघुहस्तत्वात् अतिद्रुतकारित्वादिति यावत् द्विबाहुरपि बहुबाहुना सहस्रबाहुना अर्ज्जुनेन कार्त्तवीर्य्येण तुल्यः।

(९) कालान्तकयमोपमः प्रलयकालिकयमतुल्यः। कालः कृ[illegible]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्य शस्त्रप्रतापेन प्रणताः सर्व्वपार्थिवाः ।
यज्ञे तव महाराज ब्राह्मणानुपतस्थिरे (१) ॥
तमिमं पुरुषव्याघ्रं पूजितं देवदानवैः ।
ध्यायन्तमर्ज्जुनं (२) दृष्ट्वा कस्माद्राजन्न कुप्यसि ॥
दृष्ट्वा वनगतं पार्थमदुःखार्ह सुखोचितम् ।
न च ते वर्द्धते मन्युस्तेन मुह्यामि भारत ॥
यो देवांश्च मनुष्यांश्च सर्पांश्चैकरथोऽजयत् (३) ।
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
यो यानैरद्भुताकारैर्हयैर्नागैश्च संवृतः ।
प्रसह्य वित्तान्यादत्त पार्थिवेभ्यः परन्तपः ॥
क्षिपत्येकेन वेगेन (४) पञ्च वाणशतानि यः ।
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
श्यामं बृहन्तं तरुणं चर्म्मिणामुत्तमं रणे (५) ।

तस्य अन्तः कालान्तः प्रलयः । कल्पान्ते हि यमः संहारमूर्त्तिं परिगृह्य क्षणेनैव प्रजाक्षयं करोति संग्रामकालेऽर्ज्जुनोऽपि तद्वद्भवतीति भावः ।

(१) यज्ञे राजसूये । उपतस्थिरे परिचरन्ति स्म ।

(२) ध्यायन्तं चिन्तयन्तं शोकमग्नमिति यावत् ।

(३) एकरथः एकमात्ररथसमेतः एकाकीति यावत् ।

(४) एकेन वेगेन एकेन उद्यमेन युगपदिति यावत् ।

(५) श्यामं श्यामकलेवरम् । बृहन्तं दीर्घकायम् । चर्म्मिणां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नकुलं ते वने दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
दर्शनीयञ्च शूरञ्च माद्रीपुत्त्रं युधिष्ठिर।
सहदेवं वने दृष्ट्वा कस्मात् क्षमसि (१) पार्थिव ॥
नकुलं सहदेवञ्च दृष्ट्वा ते दुःखितावुभौ।
अदुःखार्हौ मनुष्येन्द्र कस्मान्मन्युर्न वर्द्धते ॥
द्रुपदस्य कुले जातां स्नुषां पाण्डोर्महात्मनः।
मां ते वनगतां दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
धृष्टद्युम्नस्य भगिनीं वीरपत्नीमनुव्रताम् (२)।
मां वै वनगतां दृष्ट्वा कस्मात् क्षमसि पार्थिव ॥
नूनञ्च तव वै नास्ति मन्युर्भरतसत्तम।
यत्ते भ्रातॄंश्च माञ्चैव दृष्ट्वा न व्यथते मनः ॥
न निर्मन्युः क्षत्त्रियोऽस्ति लोके निर्वचनं स्मृतम् (३)।
तदद्य त्वयि पश्यामि क्षत्त्रिये विपरीतवत् (४) ॥

फलकधारिणाम् उत्तमं श्रेष्ठम् खड्गयुद्धे अतिनिपुणमिति यावत्।

(१) क्षमसि क्षमसे। परस्मैपदमार्षम्।

(२) वीरपत्नीम् वीराः पतयोऽस्यास्ताम् नासहायामित्यर्थः। अनुव्रताम् पतिपरायणाम् नापि तेषां विरागभाजनमित्यर्थः। सर्व्वथा ईदृशस्य परिभवस्य क्लेशभोगस्य चाहमयोग्येति भावः।

(३) क्षत्त्रियः क्रोधहीनो न भवतीति लोके प्रसिद्धिरस्ति।

(४) विपरीतवत् विपरीतमिव।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यो न दर्शयते तेजः क्षत्रियः काल आगते (१)।
सर्व्वभूतानि तं पार्थ सदा परिभवन्त्युत॥
तत्त्वया न क्षमा कार्य्या शत्रून् प्रति कथञ्चन।
तेजसैव हि ते शक्या निहन्तुं नात्र संशयः॥
तथैव यः क्षमाकाले क्षत्रियो नोपशाम्यति (२)।
अप्रियः सर्व्वभूतानां सोऽमुत्रेह च (३) नश्यति॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
प्रह्लादस्य च संवादं (४) बलेर्वैरोचनस्य (५) च॥
असुरेन्द्रं महात्मानं धर्म्माणामागतागमम् (६)।
बलिः पप्रच्छ दैत्येन्द्रं प्रह्लादं पितरं पितुः॥
क्षमा स्वित् (७) श्रेयसी तात उताहो तेज इत्युत।
एष मे संशयस्तात यथावद्ब्रूहि पृच्छते (८)॥

---

(१) तेजः क्रोधम्। काले आगते तेजोदर्शनस्यावसरे प्राप्ते।
(२) नोपशाम्यति न शममवलम्बते।
(३) अमुत्र परस्मिन् लोके इह अस्मिन् लोके।
(४) प्रह्लादबलिसम्वादरूपमितिहासम्।
(५) प्रह्लादतनयस्य विरोचनस्यापत्यं पुमान् वैरोचनः।
(६) धर्म्माणामागतागमम् धर्म्माणां ज्ञातरहस्यम् सर्व्वधर्म्मतत्त्वज्ञमित्यर्थः।
(७) स्वित् प्रश्ने।
(८) पृच्छते संशयनिरासार्थं जिज्ञासमानाय।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रेयो यदत्र (१) धर्म्मज्ञ ब्रूहि मे तदसंशयम्।
करिष्यामि हि तत् सर्व्वं यथावदनुशासनम् (२) ॥
तस्मै प्रोवाच तत् सर्व्वमेवं पृष्टः पितामहः।
सर्व्वनिश्चयवित् (३) प्राज्ञः संशयं (४) परिपृच्छते ॥
न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा।
इति तात विजानीहि द्वयमेतदसंशयम् ॥
यो नित्यं क्षमते तात बहून् दोषान् स पश्यति।
भृत्याः परिभवन्त्येनमुदासीनास्तथारयः (५) ॥
सर्व्वभूतानि चाप्यस्य न नमन्ते (६) कदाचन।
तस्मान्नित्यं क्षमा तात पण्डितैरपवादिता (७) ॥
अवज्ञाय हि तं भृत्या भजन्ते बहुदोषताम्।
आदातुञ्चास्य वित्तानि प्रार्थयन्तेऽल्पचेतसः (८) ॥

---

(१) श्रेयो यदत्र अत्र अनयोः क्षमातेजसोर्मध्ये यत् श्रेयः प्रशस्ततरम्।
(२) तत् सर्व्वमनुशासनं यथावत् करिष्यामि अनुसरिष्यामि।
(३) सर्व्वेषां पदार्थानां निश्चयं सिद्धान्तं वेत्तीति सः।
(४) संशयं संशयनिरासार्थम्।
(५) परिभवन्ति अवमन्यन्ते।
(६) अस्य न नमन्ते नैनमाद्रियन्ते इत्यर्थः। नमन्ते इति कर्म्म-कर्त्तरि प्रयोगः।
(७) अपवादिता निन्दिता।
(८) प्रार्थयन्ते अभिलषन्ति। अल्पचेतसः लघुचित्ताः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यानं वस्त्राण्यलङ्कारान् शयनान्यासनानि च ।
भोजनान्यथ पानानि सर्व्वोपकरणानि च ॥
आददीरन्नधिकृता (१) यथाकाममचेतसः (२) ।
प्रदिष्टानि (३) च देयानि न दद्युर्भर्त्तृशासनात् (४) ॥
न चैनं भर्त्तृपूजाभिः (५) पूजयन्ति कथञ्चन ।
अवज्ञानं हि लोकेऽस्मिन् मरणादपि गर्हितम् ॥
एते चान्ये च बहवो नित्यं दोषाः क्षमावताम् ।
अथ वैरोचने दोषानिमान् विद्ध्यक्षमावताम् ॥
अस्थाने यदिवा (६) स्थाने सततं रजसावृतः ।
क्रुद्धो दण्डान् प्रणयति विविधान् स्वेन तेजसा (७) ॥

---

(१) अधिकृताः यानादिरक्षणे नियुक्ताः पुरुषाः ।

(२) अचेतसः शून्यहृदयस्य ।

(३) प्रदिष्टानि इमान्येभ्यो दीयन्तामित्यनुज्ञातानि ।

(४) भर्त्तृशासनात् भर्त्तृशासनमनुसृत्य ।

(५) भर्त्तृपूजाभिः प्रभुयोग्यसत्कारैः ।

(६) यदिवा अथवा ।

(७) क्रुद्धः क्रोधशीलः पुरुषः रजसावृतः रजोगुणेनाभिभूतः सन् स्वेन तेजसा स्वक्रोधेन हेतुभूतेन क्रोधवशो भूत्वेत्यर्थः स्थाने अस्थाने वा सततं विविधान् दण्डान् प्रणयति प्रयुङ्क्ते । तादृशः पुरुषो दण्डप्रणयनस्य स्थानास्थान-विवेके समर्थो न भवतीति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मित्रैः सह विरोधञ्च लभते तेजसावृतः (१)।
आप्नोति द्वेष्यताञ्चैव लोकात् स्वजनतस्तथा (२)॥
क्रोधाद्दण्डान् मनुष्येषु विविधान् पुरुषो नयन् (३)।
भ्रश्यते (४) शीघ्रमैश्वर्य्यात् प्राणेभ्यः स्वजनादपि॥
योपकर्त्तॄंश्च (५) हन्तॄंश्च तेजसैवोपगच्छति (६)।
तस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव (७)॥
यस्मादुद्विजते लोकः कथं तस्य भवो (८) भवेत्।
अन्तरं तस्य दृष्ट्वैव लोको विकुरुते ध्रुवम् (९)॥
तस्मान्नात्युत्सृजेत्तेजो (१०) न च नित्यं मृदुर्भवेत्।
काले काले तु संप्राप्ते मृदुस्तीक्ष्णोऽपि वा भवेत्॥
काले मृदुर्यो भवति काले भवति दारुणः।

---

(१) तेजसावृतः क्रोधाभिभूतः।
(२) द्वेष्यताम् द्वेषास्पदत्वम् सर्व्वे लोकाः स्वजनाश्च तं द्विषन्तीत्यर्थः।
(३) नयन् प्रापयन् प्रयुञ्जान इत्यर्थः।
(४) भ्रश्यते भ्रश्यति। आत्मनेपदमार्षम्।
(५) योपकर्त्तॄन् य उपकर्त्तॄन्। सन्धिरार्षः।
(६) शत्रुषु मित्रेषु चाविशेषेण क्रोधं प्रदर्शयतीत्यर्थः।
(७) वेश्मगतात् गृहस्थितात्। (८) भवः कुशलं सम्पत् वा।
(९) अन्तरं छिद्रम्। विकुरुते प्रतिकूलो भवति।
(१०) तेजः क्रोधम् अति अतिशयेन न उत्सृजेत् न प्रयुञ्जीत नात्यर्थं क्रोधवशो भवेदित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स वै सुखमवाप्नोति लोकेऽमुष्मिन्निहैव च ॥
क्षमाकालांस्तु वक्ष्यामि शृणु मे विस्तरेण तान् ।
ये हि नित्यमसंत्यज्याः (१) यथा प्राहुर्मनीषिणः ॥
पूर्व्वोपकारी (२) यस्ते स्यादपराधे गरीयसि (३) ।
उपकारेण (४) तत् तस्य (५) क्षन्तव्यमपराधिनः ॥
अबुद्धिमाश्रितानान्तु क्षन्तव्यमपराधिनाम् (६) ।
न हि सर्व्वत्र पाण्डित्यं (७) सुलभं पुरुषेण वै ॥
अथ ये बुद्धिजं कृत्वा ब्रूयुर्वै तदबुद्धिजम् ।
पापान् स्वल्पेऽपि तान् हन्यादपराधे तथानृजून् (८) ॥
सर्व्वस्यैकोऽपराधस्ते क्षन्तव्यः प्राणिनो भवेत् ।
द्वितीये सति दण्डस्तु स्वल्पेऽप्यपकृते (९) भवेत् ॥

---

(१) ये क्षमाकालाः नित्यं सर्व्वकालमेव असंत्याज्याः अपरिहार्य्याः येषु क्षमाप्रदर्शनमवश्यकर्त्तव्यमिति भावः ।

(२) यः पूर्व्वमुपकृतवान् ।

(३) अपराधे गरीयसि अतिमहत्यपि अपराधे ।

(४) उपकारेण पूर्व्वकृतोपकारानुरोधेन पूर्व्वकृतमुपकारं संस्मृत्येत्यर्थः ।

(५) तत् अपराधरूपमसदाचरणम् ।

(६) अबुद्धिम् अज्ञानम् आश्रितानाम् अपराधिनाम् अज्ञानतः कृतापराधानामित्यर्थः ।

(७) पाण्डित्यम् अभिज्ञता ।

(८) तथा अनृजून् तथा कपटचारिणः ।

(९) अपकृते अपकारे अपराधे इति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एत एवंविधाः कालाः क्षमायाः परिकीर्त्तिताः।
अतोऽन्यथानुवर्त्तत्सु (१) तेजसः काल उच्यते॥
तदहं तेजसः कालं तव मन्ये नराधिप।
धार्त्तराष्ट्रेषु लुब्धेषु सततञ्चापकारिषु॥
न हि कश्चित् क्षमाकालो विद्यतेऽद्य कुरून् प्रति।
तेजसश्चागते काले तेज उत्स्रष्टुमर्हसि (२)॥
मृदुर्भवत्यवज्ञातस्तीक्ष्णादुद्विजते जनः।
काले प्राप्ते द्वयञ्चैतद्यो(३) वेद स महीपतिः (४)॥

युधिष्ठिर उवाच।

क्रोधो हन्ता मनुष्याणां(५) क्रोधो भावयिता(६) पुनः।
इति विद्धि महाप्राज्ञे क्रोधमूलौ भवाभवौ (७)॥
यो हि संहरते क्रोधं भवस्तस्य सुशोभने।

---

(१) अतोऽन्यथानुवर्त्तत्सु अत एतेभ्यः अन्यथा प्रकारान्तरेण अनुवर्त्तत्सु प्रवर्त्तमानेषु नरेषु एतद्व्यतिरिक्तस्थलेष्वित्यर्थः। अनुवर्त्तत्सु इति परस्मैपदमार्षम्।

(२) उत्स्रष्टुं प्रयोक्तुम्।

(३) द्वयं चैतत् क्षमा तेजश्चेति द्वयम्।

(४) महीपतिः राजा राज्यभाक् भवतीत्यर्थः।

(५) अस्थाने अकाले च प्रयुक्तः सन्निति भावः।

(६) स्थाने काले च प्रयुक्तः सन्निति भावः—भावयिता वर्द्धयिता शुभफलोत्पादक इति यावत्।

(७) इति अस्मात् कारणात्। भवाभवौ शुभाशुभे सम्पद्विनाशौ वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यः पुनः पुरुषः क्रोधं नित्यं न सहते (१) शुभे ।
तस्याभवाय भवति क्रोधः परमदारुणः ॥
क्रोधमूलो विनाशो हि प्रजानामिह दृश्यते ।
तत् कथं मादृशः क्रोधमुत्सृजेल्लोकनाशनम् (२) ॥
क्रुद्धः पापं नरः कुर्य्यात् क्रुद्धो हन्याद्गुरूनपि ।
क्रुद्धः परुषया वाचा श्रेयसोऽप्यवमन्यते (३) ॥
वाच्यावाच्ये हि कुपितो न प्रजानाति कर्हिचित् ।
नाकार्य्यमस्ति क्रुद्धस्य नावाच्यं विद्यते तथा ।
आत्मानमपि च क्रुद्धः प्रेषयेद्यमसादनम् ॥
एतान् दोषान् प्रपश्यद्भिर्जितः क्रोधो मनीषिभिः ।
इच्छद्भिः परमं श्रेय इह चामुत्र चोत्तमम् ॥
तं क्रोधं वर्ज्जितं धीरैः कथमस्मद्विधश्चरेत् (४) ॥
एतत् द्रौपदि सन्धाय (५) न मे मन्युः प्रवर्त्तते ॥
आत्मानञ्च परञ्चैव त्रायते महतो भयात् ।
क्रुध्यन्तमप्रतिक्रुध्यन् (६) द्वयोरेष चिकित्सकः (७) ॥

---

(१) न सहते न पराजयते ।
(२) उत्सृजेत् प्रयुञ्जीत ।
(३) श्रेयसः श्रेष्ठान् मान्यानिति यावत् ।
(४) चरेत् आचरेत् अवलम्बेत इति यावत् ।
(५) सन्धाय विविच्य । (६) अप्रतिक्रुध्यन् क्षममाणः ।
(७) एष क्षममाणः पुरुषः द्वयोः स्वस्य परस्य चेत्युभयोः चिकि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्तु क्रोधं समुत्पन्नं प्रज्ञया प्रतिबाधते।
तेजस्विनं तं विद्वांसो मन्यन्ते तत्त्वदर्शिनः॥
दाक्ष्यं ह्यमर्षः शौर्य्यञ्च शीघ्रत्वमिति (१) तेजसः।
गुणाः क्रोधाभिभूतेन न शक्याः प्राप्तुमञ्जसा (२)॥
यदि न स्युर्मानुषेषु क्षमिणः पृथिवीसमाः।
न स्यात् सन्धिर्मनुष्याणां क्रोधमूलो हि विग्रहः (३)॥
क्षमा तेजस्विनां तेजः क्षमा ब्रह्म(४) तपस्विनाम्।
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः।
तां क्षमां तादृशीं कृष्णे कथमस्मद्विधस्त्यजेत्॥
इह सम्मानस्तृच्छन्ति परत्र च शुभां गतिम्।
येषां मन्युर्मनुष्याणां क्षमयाभिहतः (५) सदा॥

त्यक्तः प्राणरक्षिता ज्यक्षमायामुभयोरपि प्राणविनाशस्य सम्भावितत्वात्।

(१) दाक्ष्यं कर्म्मसु कौशलम्। अमर्षः अपमानासहिष्णुता। शौर्य्यं शूरता विपक्षपराजयशक्तिरिति यावत्। शीघ्रत्वम् आशुकारिता।

(२) अञ्जसा तत्त्वेन।

(३) विग्रहः विरोधः।

(४) ब्रह्म तपः।

(५) अभिहतः पराजितः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धृतराष्ट्रविलापः ।

जयत्सु पाण्डुपुत्त्रेषु श्रुत्वा सुमहदप्रियम् ।
धृतराष्ट्रश्चिरं ध्यात्वा सञ्जयं वाक्यमब्रवीत् ॥

यदाश्रौषं जातुषाद्देश्मनस्तान्
मुक्तान् पार्थान् पञ्च कुन्त्या समेतान् ।
युक्तश्चैषां (१) विदुरं स्वार्थसिद्धौ
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं द्रौपदीं रङ्गमध्ये
लक्ष्यं भित्त्वा निर्जितामर्ज्जुनेन ।
शूरान् पाञ्चालान् पाण्डवेयांश्च युक्तान् (२)
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं मागधानां वरिष्ठं
जरासन्धं क्षत्रमध्ये ज्वलन्तम् ।
दोर्भ्यां हतं भीमसेनेन गत्वा
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं दिग्जये पाण्डुपुत्त्रै-
र्वशीकृतान् भूमिपालान् प्रसह्य (३) ।

---

(१) युक्तम् अभिनिविष्टम् ।

(२) युक्तान् मिलितान् ।

(३) प्रसह्य बलेन ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महाक्रतुं राजसूयं कृतञ्च
तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषं हृतराज्यं युधिष्ठिरं
पराजितं सौबलेनाक्षवत्याम् (१)।
अन्वागतं भ्रातृभिरप्रमेयैः (२)
तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषं स्नातकानां (३) सहस्रै-
रन्वागतं धर्म्मराजं वनस्थम्।
भिक्षाभुजां ब्राह्मणानां महात्मनां
तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषमर्ज्जुनं देवदेवं
किरातरूपं त्र्यम्बकं तोष्य (४) युद्धे।
अवाप्नवन्तं (५) पाशुपतं महास्त्रं
तदा नाशंसे विजयाय सञ्जय॥

---

(१) अक्षवत्याम् अक्षक्रीडायां द्यूतशालायां वा।

(२) अन्वागतम् अनुगतम्। अप्रमेयैः अपरिमेयबलविक्रम-सौभ्रात्रादिगुणयुक्तैः।

(३) ब्रह्मचर्य्यं समाप्य गृहस्थाश्रममप्रविष्टाः स्नातकाः।

(४) तोष्य तोषयित्वा। आर्षः प्रयोगः।

(५) अवाप्नवन्तं लब्धवन्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदाश्रौषं त्रिदिवस्थं (१) धनञ्जयं
शक्रात् साक्षाद्दिव्यमस्त्रं यथावत् ।
अधीयानं संशितं सत्यसन्धं (२)
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषमसुराणां वधार्थे
किरीटिनं यातममित्रकर्षणम् ।
कृतार्थञ्चाप्यागतं शक्रलोकात् (३)
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं घोषयात्रागतानां (४)
बन्धं गन्धर्वैर्मोक्षणञ्चार्ज्जुनेन ।
स्वेषां सुतानां कर्णबुद्धौ रतानां
तदा नाशंसे विजयाय सञ्जय ॥

---

(१) त्रिदिवस्थं त्रिदिवः स्वर्गः तत्र स्थितम् ।

(२) संशितं संशितव्रतं सङ्कल्पितव्रतसाधने यत्नं कुर्व्वाण-मित्यर्थः । सत्यसन्धम् अवन्ध्यप्रतिज्ञम् ।

(३) कृतार्थं कृतकार्य्यं सम्पादितासुरवधरूपकार्य्यमिति यावत् ।

(४) घोषः आभीरपल्ली गोरक्षकाणामावास इति यावत् तत्र यात्रा प्रस्थानं घोषयात्रा घोषयात्रागतानां द्वैतवनवर्त्ति-नीमाभीरपल्लीं प्रस्थितानाम् । ऐश्वर्य्यप्रदर्शनेन द्वैतवन-स्थितान् पाण्डवान् परितापयितुं गोदर्शनव्यपदेशेन तत्र गत्वा दुर्य्योधनादयो गन्धर्वैर्बद्धा अभूवन् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदाश्रौषं न विदुर्मामकास्तान् (१)
प्रच्छन्नरूपान् वसतः पाण्डवेयान् ।
विराटराष्ट्रे सह कृष्णया तया
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं मामकानां वरिष्ठान्
धनञ्जयेनैकरथेन भग्नान् (२) ।
विराटराष्ट्रे वसता महात्मना
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं निर्जितस्याधनस्य
प्रव्राजितस्य (३) स्वजनात् प्रच्युतस्य ।
अक्षौहिणीः (४) सप्त युधिष्ठिरस्य
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं माधवं वासुदेवं
सर्व्वात्मना पाण्डवार्थे निविष्टम् (५) ।

---

(१) विदुः विविदुः । वर्त्तमानप्रयोग आर्षः ।

(२) भग्नान् पराजितान् ।

(३) प्रव्राजितस्य निर्वासितस्य ।

(४) १०९३५० पदातयः ६५६१० अश्वाः २१८७० रथाः २१८७० गजाः एतदात्मिका सेना अक्षौहिणी ।

(५) सर्व्वात्मना सर्व्वप्रयत्नेन पाण्डवार्थे पाण्डवानां हितसाधने निविष्टम् उद्युक्तं रतमिति यावत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्येमां गां विक्रममेकमाहुः (१)
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं लोकहिताय कृष्णं
शमार्थिनमुपयातं कुरूणाम् ।
शमं कुर्वाणमकृतार्थञ्च यातं
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं मन्त्रिनं वासुदेवं
तथा भीष्मं शान्तनवञ्च तेषाम् ।
भारद्वाजञ्चाशिषोऽनुब्रुवाणं (२)
तदा नाशंसे विजयाय सञ्जय ॥
यदा कर्णो भीष्ममुवाच वाक्यं
नाहं योत्स्ये युध्यमाने त्वयीति ।
हित्वा सेनामपचक्राम चापि
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं वासुदेवार्ज्जुनौ तौ
तथा धनुर्गाण्डिवमप्रमेयम् (३) ।

---

(१) इमां गां पृथिवीं यस्य वासुदेवस्य एकं विक्रमं प्रदक्षेपम् आहुः वर्णयन्ति । बलिच्छलनकाले नारायण एकेन पद-क्षेपेण ससमुद्रां महीं व्याप्तवान् इति पौराणिकी कथा ।

(२) भरद्वाजं द्रोणम् ।

(३) गाण्डिवम् अर्ज्जुनस्य धनुः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तीक्ष्णुग्रवीर्य्याणि समागतानि
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं भीष्ममित्रकर्षणं
निघ्नन्तमाजावयुतं रथानाम् (१) ।
नैषां कश्चिद्वध्यते ख्यातरूप- (२)
स्तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं भीष्ममत्यन्तशूरं
हतं पार्थेनाहवेष्वप्रधृष्यम् ।
शिखण्डिनं (३) पुरतः स्थापयित्वा
तदा नाशंसे विजयाय सञ्जय ॥
यदा द्रोणो विविधानस्त्रमार्गान् (४)
निदर्शयन् समरे चित्रयोधी (५) ।
न पाण्डवान् श्रेष्ठतरान् (६) निहन्ति
तदा नाशंसे विजयाय सञ्जय ॥

---

(१) रथानां रथिनाम् ।

(२) ख्यातरूपः विख्यातनामा वीरत्वेन प्रसिद्ध इति यावत् ।

(३) शिखण्डिनं तदाख्यं द्रुपदपुत्रम् ।

(४) अस्त्रमार्गान् अस्त्रप्रयोगकौशलानि ।

(५) चित्रयोधी अद्भुतयोद्धा अशेषरणकौशलाभिज्ञो वा ।

(६) पाण्डवान् पाण्डुपक्षीयान् श्रेष्ठतरान् अतिश्रेष्ठान् योद्धृपुरुषान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदाश्रौषं चास्मदीयान् महारथान्
व्यवस्थितानर्ज्जुनस्यान्तकाय (१) ।
संशप्तकान् (२) निहतानर्ज्जुनेन
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं व्यूहमभेद्यमन्यै-(३)
र्भारद्वाजेनात्तशस्त्रेण गुप्तम् (४) ।
भित्त्वा सौभद्रं (५) वीरमेकं प्रविष्टं
तदा नाशंसे विजयाय सञ्जय ॥
यदाभिमन्युं परिवार्य्य बालं
सर्व्वे हत्वा हृष्टरूपा (६) बभूवुः ।
महारथाः पार्थमशक्नुवन्त-(७)
स्तदा नाशंसे विजयाय सञ्जय ॥

---

(१) अन्तकाय वधाय ।

(२) प्राणात्ययेऽपि न वयं संग्रामान्निवर्त्तिष्यामहे इति कृत-शपथा योद्धृविशेषाः संशप्तकाः ।

(३) व्यूहं सैन्यसन्निवेशविशेषम् ।

(४) आत्तशस्त्रेण गृहीतशस्त्रेण । गुप्तं रचितम् ।

(५) सौभद्रं सुभद्रागर्भसम्भूतम् अर्ज्जुनतनयमभिमन्युम् ।

(६) हृष्टरूपाः हर्षोत्फुल्लकलेवराः ।

(७) पार्थमशक्नुवन्तः पार्थं हन्तुमशक्नुवन्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदाश्रौषमभिमन्युं निहत्य
हर्षान्मूढान् क्रोशतो (१) धार्त्तराष्ट्रान्।
क्रोधादुक्तं सैन्धवे चार्ज्जुनेन (२)
तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषं द्रोणः कृतवर्म्मा कृपश्च
कर्णो द्रौणिर्मद्रराजश्च (३) शूरः।
अमर्षयन् (४) सैन्धवं वध्यमानं
तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषं नागबलैः सुदुःसहं
द्रौणानीकं युयुधानं (५) प्रमथ्य।
यातं वार्ष्णेयं (६) यत्र तौ कृष्णपार्थौ
तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषं द्रोणमाचार्य्यमेकं
धृष्टद्युम्नेनाभ्यतिक्रम्य धर्म्मम्।

---

(१) हर्षात् क्रोशतः कृतहर्षनिनादान्।

(२) सैन्धवे सिन्धुराजे जयद्रथे अर्ज्जुनेन उक्तं तद्वधाय अर्ज्जुनेन कृतां प्रतिज्ञामित्यर्थः।

(३) द्रौणिः अश्वत्थामा। मद्रराजः शल्यः।

(४) अमर्षयन् सहन्ते स्म।

(५) युयुधानं सात्यकिम्।

(६) वार्ष्णेयं वृष्णिवंशसम्भूतम्। सात्यकिविशेषणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रणाच्चेले प्रायगतं विशस्तं (१)
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं भीमसेनेन पीतं
रक्तं भ्रातुर्युधि दुःशासनस्य ।
निवारितं नान्यतमेन (२) भीमं
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं कर्णमत्यन्तशूरं
हतं पार्थेनाहवेष्वप्रधृष्यम् ।
तस्मिन् भ्रातॄणां विग्रहे घोररूपे (३)
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं निहतं मद्रराजं
रणे शूरं धर्म्मराजेन (४) सूत ।
सदा संग्रामे स्पर्द्धते यस्तु कृष्णं
तदा नाशंसे विजयाय सञ्जय ॥

---

(१) प्रायगतम् अनशने स्थितम् अश्वत्थामा हत इति श्रुत्वा अनशनेन प्राणांस्त्यक्ष्यामीति कृतसङ्कल्पमित्यर्थः । विशस्तं निहतम् ।

(२) अन्यतमेन अस्मत्पक्षीयेन केनापि न निवारितं दुःशासन-रुधिरपानव्यवसायान्निवर्त्तयितुमशक्तितम् ।

(३) विग्रहे संग्रामे । घोररूपे भयङ्करे ।

(४) धर्म्मराजेन युधिष्ठिरेण ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदाश्रौषं कलहद्यूतमूलं
  मायाबलं (१) सौबलं पाण्डवेन।
हतं संग्रामे सहदेवेन पापं
  तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषं श्रान्तमेकं शयानं (२)
  ह्रदं गत्वा स्तम्भयित्वा तदम्भः (३)।
दुर्य्योधनं विरथं भग्नशक्तिं (४)
  तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषं पाण्डवांस्तिष्ठमानान् (५)
  गत्वा ह्रदे वासुदेवेन सार्द्धम्।
अमर्षणं धर्षयतः (६) सुतं मे
  तदा नाशंसे विजयाय सञ्जय॥
यदाश्रौषं विविधांश्चित्रमार्गान्
  गदायुद्धे मण्डलशश्चरन्तम् (७)।

---

(१) कलहद्यूतमूलं कलहः भ्रातृविरोधः द्यूतम् अक्षक्रीड़ा तयोर्मूलम्। मायाबलं माया कपटं तदेव बलमस्य तम्।
(२) शयानं विश्रास्यन्तम्।
(३) तदम्भः तस्य ह्रदस्य अम्भः जलम्।
(४) विरथं हतसैन्यम्। भग्नशक्तिं भग्नपराक्रमम्।
(५) तिष्ठमानान् तिष्ठतः। आत्मनेपदमार्षम्।
(६) धर्षयतः भर्त्सयतः।
(७) मण्डलशः मण्डलाकारगत्या गदायुद्धे विविधान् बहु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मिथ्याहतं वासुदेवस्य बुद्ध्या (१)
तदा नाशंसे विजयाय सञ्जय ॥
शोच्या गान्धारी पुत्त्रपौत्त्रैर्विहीना
तथा बन्धुभिः पितृभिर्भ्रातृभिश्च ।
कृतं कार्य्यं दुष्करं पाण्डवेयैः
प्राप्तं राज्यमसपत्नं पुनस्तैः ॥
कष्टं युद्धे दश शेषाः श्रुता मे
त्रयोऽस्माकं (२) पाण्डवानाञ्च सप्त (३) ।
द्व्यूना विंशतिराहताक्षौहिणीनां (४)
तस्मिन् संग्रामे भैरवे क्षत्त्रियाणाम् ॥
तमस्त्वतीव विस्तीर्णं मोह आविशतीव माम् ।
संज्ञां नोपलभे सूत मनो विह्वलतीव मे (५) ॥
इत्युक्त्वा धृतराष्ट्रोऽथ विलप्य बहु दुःखितः ।

र्विधान् चित्रमार्गान् अद्भुतोपायान् अद्भुतशिल्पाकौश-लानि वा चरन्तं दर्शयन्तम् ।

(१) वासुदेवस्य कृष्णस्य बुद्ध्या युक्त्या उपदेशेनेति यावत् मिथ्या-हतं मिथ्या छलेन धर्म्ममार्गमतिक्रम्येत्यर्थः हतम् ।

(२) कृपः अश्वत्थामा कृतवर्म्मा चेति ।

(३) कृष्णः सात्यकिर्युधिष्ठिरो भीमोऽर्ज्जुनो नकुलः सहदेवश्चेति।

(४) द्व्यूना विंशतिः द्वाभ्यामूना विंशतिः अष्टादश ।

(५) तमः अज्ञानम् । संज्ञा चेतनाम् । विह्वलति व्याकुली-भवति । इवशब्दम् आतिशय्यव्यञ्जकम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मूर्च्छितः पुनराश्वस्तः (१) सञ्जयं वाक्यमब्रवीत् ॥
सञ्जयैवं गते प्राणांस्त्यक्तुमिच्छामि माचिरम् ।
स्तोकं ह्यपि न पश्यामि फलं जीवितधारणे(२) ॥
तं तथावादिनं दीनं विलपन्तं महीपतिम् ।
निश्वसन्तं यथा नागं मुह्यमानं (३) पुनः पुनः ।
गावल्गणिरिदं (४) धीमान् महार्थं वाक्यमब्रवीत् ॥
द्वैपायनस्य वदतो नारदस्य च धीमतः (५) ।
श्रुतवानसि वै राज्ञो महोत्साहान् महाबलान् ।
महत्सु राजवंशेषु गुणैः समुदितेषु च ।
जातान् दिव्यास्त्रविदुषः शक्रप्रतिमतेजसः ।
धर्म्मेण पृथिवीं जित्वा यज्ञैरिष्ट्वा सदक्षिणैः ।
अस्मिन् लोके यशः प्राप्य ततः कालवशं गतान् ॥
हित्वा सुविपुलान् भोगान् बुद्धिमन्तो महाबलाः ।
राजानो निधनं प्राप्तास्तव पुत्त्रा इव प्रभो ॥
येषां दिव्यानि कर्म्माणि विक्रमस्त्याग एव च ।

---

(१) पुनराश्वस्तः पुनर्लब्धसंज्ञः ।
(२) एवं गते इत्थं प्रवृत्ते ईदृशे दशान्तरे आपतिते सतीत्यर्थः । माचिरम् अचिरेण । स्तोकम् अल्पम् ।
(३) मुह्यमानं मुह्यन्तम् । आत्मनेपदमार्षम् ।
(४) गवल्गणस्यापत्यं पुमान् गावल्गणिः सञ्जयः ।
(५) तयोः सकाशादित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

माहात्म्यमपि चास्तिक्यं सत्यं शौचं दयार्ज्जवम् ।
विद्वद्भिः कथ्यते लोके पुराणे कविसत्तमैः ।
सर्व्वैर्ब्भिगुणसम्पन्नास्ते चापि निधनं गताः ॥
तव पुत्त्रा दुरात्मानः प्रतप्ताश्चैव मन्युना ।
लुब्धा दुर्वृत्तभूयिष्ठा(१) न तान् शोचितुमर्हसि ॥
श्रुतवानसि मेधावी बुद्धिमान् प्राज्ञसम्मतः ।
येषां शास्त्रानुगा बुद्धिर्न ते मुह्यन्ति भारत (२) ॥
भवितव्यं तथा तच्च नानुशोचितुमर्हसि ।
दैवं प्रज्ञाविशेषेण कोऽतिवर्त्तितुमर्हति (३) ।
विधातृविहितं (४) मार्गं न कश्चिदतिवर्त्तते ॥
कालमूलमिदं सर्व्वं भावाभावौ सुखासुखे ॥
कालः सृजति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः (५) ॥

---

(१) दुर्वृत्तभूयिष्ठाः दुराचारबहुलाः अतिदुरात्मान इति यावत् ।

(२) श्रुतवान् अधीतशास्त्रः। प्राज्ञसम्मतः पण्डितपूजितः। शास्त्रानुगा शास्त्रानुसारिणी ।

(३) दैवं विधिनिर्बन्धम् । प्रज्ञाविशेषेण बुद्धिविवेकबलेन । अतिवर्त्तितुं अतिक्रमितुम् ।

(४) विधातृविहितं दैवनियमितम् ।

(५) दुरतिक्रमः दुष्परिहरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतीतानागता भावा(१) ये च वर्त्तन्ति(२) साम्प्रतम् ।
तान् कालनिर्मितान् बुद्धा न संज्ञां हातुमर्हसि ॥
इत्येवं (३) पुत्त्रशोकार्त्तं धृतराष्ट्रं जनेश्वरम् ।
आश्वास्य स्वस्थमकरोत् सूतो गावल्गणिस्तदा ॥

---

(१) अनागता भविष्यन्तः । भावाः विषयाः ।

(२) वर्त्तन्ति वर्त्तन्ते । परस्मैपदमार्षम् ।

(३) इत्येवमित्यस्य आश्वास्येत्यनेनान्वयः । इत्येवमाश्वास्य उक्त-प्रकारेण सान्त्वयित्वा ।

सम्पूर्णम्

PRINTED BY PITAMBARA VANDYOPADHYAYA,
AT THE SANSKRIT PRESS.
NO .62, AMHERST STREET, CALCUTTA. 1885.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

SÁHITYAPARICHAYA

PART II.

An Introduction to Sanskrit Literature.

WITH NOTES AND EXPLANATIONS.

BY

NÍLAMANI MUKHOPÁDHYAYA NYÁYÁLANKÁRA, M.A., B.L.,

Professor of Sanskrit, Presidency College.

New Edition.

साहित्यपरिचयः ।

द्वितीयोभागः ।

श्रीनीलमणिमुखोपाध्यायेन

सङ्कलितः ।

नूतन संस्करणम् ।

CALCUTTA.

PRINTED AND PUBLISHED BY B. L. CHAKRAVARTI,

At the New School-Book Press.

8, Dixon's Lane,

1887.

Price—12 As.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

SA'HITYAPARICHAYA

PART II.

AN INTRODUCTION TO SANSKRIT LITERATURE.

WITH NOTES, AND EXPLANATIONS

BY

NI'LAMANI MUKHOPA'DA'YA NYA'YA'LANKA'RA, M. A., B. L.,

Professor of Sanskrit, Presidency College.

New Edition.

साहित्यपरिचयः ।

द्वितीयोभागः ।

श्रीनीलमणिमुखोपाध्यायेन

सङ्कलितः ।

नूतन संस्करणम् ।

CALCUTTA.

PRINTED AND PUBLISHED BY B. L. CHAKRAVARTI

At the New School-Book Press.

8 Dixon's Lane,

1887.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Preface to the present Edition.

The present Edition of Part II of Sáhitya-Parichaya, differs considerably from the first. Giving due weight to the opinions kindly expressed by learned critics, European and Indian, I have omitted the stories of Lalitánga, of Nala and Damayantí, and of Buddha, and supplied their place with extracts from the Purusha-Paríkshá and Kathá-Kosha. The proportion of the prose and poetical selections has been maintained by the introduction of the stories of Mátrigupta and Lalitáditya from the Rájatarangini.

The 1st. *July* 1887.
Presidency College,
CALCUTTA.

NILMANI MUKERJEA.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

CONTENTS.

Purusha-parikshà.

Story of a Swindler ... ...

Story of Robbers ... ...

Story of a Hero of Veracity 1

Story of a Hero of Charity 2

Kathá-kosha.

Story of Tenderness to Animals 2

Story of Satya-Manjarí 4

Vetàlapanchavinsati.

Upakramaniká (Introduction) 5

Upasanhàra (Conclusion) 5

Purusha-parikshá.

Lokavidya-kathà (Story of Nanda) 6

Ubhayavidya-kathà (Story of Chandragupta) ... 7

Mahábhárata.

Story of Dharmarája (in the disguise of a heron) ... 8

Ràmàyana.

Ráma-pravásana (Exile of Ráma) 10

Rájatarangini.

Story of Màtrigupta 10

Story of Lalitáditya 11

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साहित्य परिचयः ।

द्वितीयोभागः ।

वञ्चककथा ।

आसीत् गोदावरीतीरे विशाला (१) नाम नगरी । तस्याञ्च समुद्रसेनाभिधानो राजा बभूव । तस्य पुत्रं चन्द्रसेननामानं शुद्धहृदयं(२)दृष्ट्वा तन्नगरवासिना वञ्चकेन केनापि वणिजा चिन्तितम् ।

यतः—

शार्दूलस्य मृगा भक्ष्या नागा एव गरुत्मतः ।
असाधोः साधवोभक्ष्याः श्येनस्येवेतरे खगाः ॥

साधुप्रकृतिः कुमारोनिश्चितं मम सुखग्राह्यधनो(३)भविष्यति, तदेनं उपसर्पामीति परामृश्य स

१। विशाला—is another name for Ujjayini, but here a different city is meant.

२। शुद्धम् आर्जवयुक्तं हृदयं चित्तं यस्य वधीत्तं, सर्व्वत्र विश्वस्तपूर्व्वम् ।

३। सुखेन ग्राह्यं धनं यस्य सुखग्राह्यधनः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वणिक् तं राजकुमारं सिषेवे। चिञ्चाफलप्राया (१) दुर्ज्जनस्य प्रकृतिः परिणामविरसाप्यापातसुरसा भवति। तया प्रकृत्या तं कुमारं सेवमानः सेवया वशमानीतवान्। ततः स वञ्चकश्चिन्तयामास, यदेनं केनाप्युपायेन देशान्तरं नीत्वा अस्य द्वारा राजकोष-सारभूतानि रत्नानि हरामि। ततश्च विश्रम्भ-प्रस्तावे (२) कुतूहलप्रस्तावे च देशान्तरकथां श्रवण-रमणीयां मुहुः कथयति। तत्कथाश्रवणरसिकं (३) विदित्वा स वणिगुवाच, कुमार! यौवराज्येऽपि वर्त्तमानस्य भवतो नित्यसुलभैरुपभुक्तैरेव भोग्य-वस्तुभिः कुतः सुखम्? सुखन्तु देशान्तरे सम्भवति, यत्र प्रत्यहमदृष्टदर्शनमभुक्तभोजनमननुभूतानुभवश्च जायते। चन्द्रसेन उवाच, सखे! महती ममोत्कण्ठा

१। चिञ्चाफलप्राया—प्रायेण तिन्तिड़ीफलतुल्या। परिणामविरसा चरमे पीड़ाकरी। आपातसुरसा तत्कालरम्या। तिन्तिड़ी—भोजन-काले स्वादुरपि परिणामे पीड़ाकरी। तथाच "तिन्तिड़ी यमदूतिका" इति।

२। विश्रम्भप्रस्तावे—विश्रम्भः विश्वासः परस्परहृदयोद्घाटनं तेन यः प्रस्तावः कथाप्रसङ्गः तस्मिन् विश्रम्भालापे इत्यर्थः। कुतूहलप्रस्तावे—कौतूहलात् प्रारब्धे परस्परालापे।

३। श्रवणरसिकं। श्रवणे रसिकम् अनुरागिणम्। रसः रागः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विद्यते, कथं देशान्तराणि दृश्यन्ताम्। वणिगुवाच, भारलघुना गुरुमूल्येन धनेन निर्वहति देशान्तरदर्शनम्। यदि मनः स्थिरं भवति, धनं भवतो राजकुमारस्य विद्यत एव, मनः परं स्थिरीक्रियतां कुमारेण। कुमारोऽवदत्, सखे! मनःस्थैर्यं कृतम्। वञ्चको ब्रूते, यदि कथेयमन्यकर्णपथगामिनी (१) न भवति, परतर्कविषयश्च न भवति, तदा निर्व्वहति कार्य्यम्। कुमारोऽब्रवीत् न तर्कणीयं केनापि। ततस्तथा देशान्तरसाभिलाषं (२) कुमारं तथाविधधनसमेतमाखेटकव्याजेन(३) नीत्वा चलितः स वणिक्! कियती दूरात् सैन्यं परावर्त्य वराश्वारूढौ कुमारौ द्वावेतौ काञ्चिद्दिशमुद्दिश्य जग्मतुः। ततो दूरगमनपरिश्रान्तौ क्षुत्पिपासापराभूतौ क्वचिदरण्ये जलाशयसन्निधाने महावृक्षमेकं ददृशतुः। तस्य छायायां द्वावपि तुरगादवतेरतुः। कुमारस्तु कृतजलपानः

१। अन्यकर्णपथगामिनी—अन्येषां कर्णपथं श्रवणगोचरं न गच्छतीति। अन्यैः न श्रूयते इत्यर्थः। परतर्कविषयः परेषां तर्कविषयः अनुमानेन उन्नेतव्यः। परैर्न उन्नाय्यते इत्यर्थः।

२। देशान्तरसाभिलाषः—अन्योदेशः देशान्तरम्, अभिलाषेण सह साभिलाषः, देशान्तरे साभिलाषः विदेशभ्रमणानुरागीत्यर्थः।

३। आखेटकः मृगया स एव व्याजः छलं तेन।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परमसुखी छायामासाद्य तृणशय्यायां निद्राणो बभूव। अथ तेन वञ्चकेन चिन्तितं, यत् मम कल्यस्यायमेवावसरः। ततः पादसंवाहनं(१) कुर्व्वाणेन दुरात्मना तं गाढ़निद्रं विदित्वासौ लताभिर्ब्बबन्धे। तदनन्तरं तस्य हृदयमारुह्य शस्त्रमादाय चक्षुषी स्फाटितवान्। यावदसौ कुमारः, सखे! परित्रायस्वेति वदति, तावदेष वञ्चकः कृतकर्म्मा धनं तुरगद्वयञ्चादाय पलायितः। कुमारश्च तत्रारण्ये कृतार्त्तनादो रुरोद। रुदंश्चक्षुर्व्वेदनया निर्द्दयनिक्षिप्तहस्तपादः(२)स्फुटितबन्धो बभूव। परिश्रान्तो निःसत्वो(३)निष्क्रियश्च भूमौ निपपात। तत्र वृक्षे कश्चिद्वृद्धशुको वसति। तस्य द्वौ पुत्रौ महाशुकौ सञ्चरणासमर्थस्य प्रत्यहमाहारमानीय प्रयच्छतः। तदाच तौ वृद्धशुकं पितरं भोजयित्वा कथयामासतुः, पितः! अद्यावाभ्यां नर्म्मदातीरे महदपूर्व्वं कष्टस्थानञ्च दृष्टम्। वृद्धशुक उवाच, किं तदपूर्व्वं किं वा कष्टस्थानं दृष्टम्? महाशुकौ कथयतः,

१। संवाहनं मृदुमर्द्दनं तच्च वेदनानिरासार्थं गाढ़निद्रानुकूलञ्च।

२। निर्द्दयं सबलं यथा तथा निक्षिप्तं चालितं हस्तपादं येन तथोक्तं हस्तौ च पादौ च एतेषां समाहारः हस्तपादम्। स्फुटितः छिन्नः बन्धो येन तथोक्तः।

३। निःसत्त्वः बलहीनः निष्क्रियः निश्चेष्टः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत् तत्र यूथिकापुरे नगरे नीलरथनाम्नो भूपाल-स्यैक एव पुत्रश्चित्ररथनामधेयः, स चान्धो वैद्यजन-सेव्यमानोऽप्यन्धतां न मुञ्चति । तेन(१)रात्रौ निर्दीपं गृहमिव लब्धाद्य महत् कष्टस्थानं दृष्टमावाभ्याम् । वृद्धशुक उवाच, पुत्रौ ! नष्टचक्षुषश्चक्षुर्व्विलाय भेषजं विद्यते, किन्तु तत् भिषजो न जानन्ति । तावूचतुः, तात ! किन्तद्भेषजम् ? वृद्धशुकः कथयति, एतस्यैव तरोः कुसुमेन शुष्केणार्द्रेण वा यदि अञ्जनं क्रियते, तदा नष्टचक्षुश्चक्षुष्मान् भवति। तदाकर्ण्य कुमार-श्चिन्तयामास । अहो ! विधिरनुकूलो दृश्यते, यत् विहगानां परस्परं चक्षुर्भेषजप्रस्तावना जाता, भेष-जमपि सुलभमिदानीम्। तदस्य वृक्षस्य पुष्पेण चक्षु-रञ्जनमाचरामि तावत्। पश्चात् कुमारेण तथा कृतम् । प्रथमाञ्जनेन चक्षुषि वेदना शान्ता । द्विती-याञ्जनेन तारा जाता । तृतीयाञ्जनेन प्रकृष्टा दृष्टि-र्ब्बभूव । ततः परमहृष्टः कुमारश्चिन्तयामास, यत् इदानीमसम्भेचोजनिता विपन्निस्तीर्णा । अये किं विधेयमस्ति ? अनया दुर्दशया यदि पुनर्गृहं गम्यते, तदन्येषामुपहासस्थानमात्मनो दैन्यं भवति ।

---

१ । तेन—तेन हेतुना ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कार्पण्यन्तु (१) मरणादपि निन्दितं। तदितो गृहं न यास्यामि। परम् उपलब्धानुभावमिदमेव (२) भेषजं नीत्वा यूथिकापुरं गच्छामि, तं चित्ररथं राजकुमारं सलोचनं करवाणि। तेनैव तस्य पिता नीलरथो मम कामनां पूरयिष्यतीति परामृश्य भेषजमादाय स कुमारः पन्थानं पृच्छन् कियतापि कालेन यूथिकापुरं जगाम। नीलरथस्य दर्शनं विधाय तत्-पुत्रं चित्ररथं चक्षुष्मन्तं चकार। अथ राजा परि-तुष्टस्तं सर्वं पप्रच्छ। तस्य कथया गुणेन शीलेन च (३) तदीयकुलं ज्ञात्वा चित्ररथकनीयसीं चित्र-सेनानाम्नीं निजदुहितरं विवाहविधिना चतुर्थ-भागराज्यसमेतां तस्मै ददौ। ततः प्रभृति चन्द्रसेन-श्चन्द्राननया प्रियया सह निष्कण्टकं राज्यसुखमनु-भवति। एकदा च कस्मिन्नप्युत्सवसमये चन्द्रसेनो राज्ञो नीलरथस्य श्वशुरस्यागारं गच्छन्नकस्मात् पथिकं वञ्चकनामानं वणिजमागच्छन्तं ददर्श। दृष्ट्वा तुरगादवततार तमालिङ्गितुम्। वञ्चकस्तु तं परि-

---

१। कार्पण्यं—दैन्यम्।

२। उपलब्धानुभावम्—उपलब्धः ज्ञातः अनुभावः प्रभावो वीर्यं यस्य

३। शीलेन—सत्स्वभावेन। शीलं स्वभावे सद्वृत्ते इत्यमरः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चिन्त्य कथमत्रापि स एव कुमार इति पलायाम्बभूव। पलायमानन्तु पदातिभिरानीय कुमारस्तं वणिजमालिङ्ग्य पप्रच्छ, मित्र! कुशलम्? वणिजा किमपि न बभाषे, कुमारस्तु मित्रलाभहृष्टो राजकुलगमनं (१) परिहृत्य तेन वणिजा सह निजगृहमागत्य रहस्युपविष्ट उवाच, मित्र! कथय वार्त्तां, तथा लब्धधनोऽपि कथमित्थं दुरवस्थोऽसि। वञ्चक उवाच, कुमार! वणिगहं स्वभावलुब्धस्तेन भवदीयधनेन वाणिज्यार्थं वहित्रमारुह्य समुद्रपारं गतोऽस्मि। तत्र शतगुणं(२)वाणिज्यमभूत्। तस्मादागच्छतो मम तटान्तनिकटे (३) समुद्रे वहित्रं निममज्ज, धनानि विनष्टानि। प्राणावशेषोऽहमागतोऽस्मि, प्राणान्मम सापराधस्य रक्षतु कुमारः। चन्द्रसेन उवाच,मित्र! न भेतव्यं, त्वं मम मित्रमसि, यावज्जीवपरिपालनीया हि सतां मैत्री। वित्तं विनष्टं, तत्र चिन्तां न करि-

---

१ राजकुलगमनम्—राज्ञः कुलं गृहं तत्र गमनम्।

२। शतगुणं—शतगुणलाभयुक्तं, वाणिज्येन मूलधनं शतगुणं वर्द्धितमभूत्।

३। तटान्तनिकटे—तटस्य समुद्रतीरस्य अन्तः प्रान्तः पुलिनं तस्य निकटे समीपे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ष्यसि। तदधिकमपरं वित्तं ते दास्यामि। वणिगुवाच, कुमार! नेदं प्रत्येति स्वापराधकलुषितं मे हृदयम्। यतो मम न कोऽपि त्वयि मित्रानुरागः कथं पुनः प्रसीदति भवान्? चन्द्रसेन उवाच, ममायत्तं ममैव कर्म्म भवति, तव त्वहं कः? (१)तत् श्रुत्वा सलज्जः सानुतापः कम्पमानः पाषाणमयकुट्टिमे पपात च ममार च स वणिक्। कुमारस्तन्मरणदुःखेन सुतरां ररोद। तं रुदन्तं स्वामिनं दृष्ट्वा चित्रसेनाब्रवीत्, नाथ! कोऽयं, कस्मादागतः, कस्मान्मृतः, कुतो भवानित्थं करुणापराधीनो रोदिति? चन्द्रसेन उवाच, प्रिये! पुरानेन महती अनुकम्पा कृता, यतो धनापहारकेणापि स्वायत्तिपतितोऽपि (२) समूलघातं न हतोऽस्मि। चित्रसेनावदत्,सोऽस्य प्रमादो नतु ज्ञानपूर्व्वको व्यापारः। चन्द्रसेन उवाच, तथापि महानेवायं, यतो लज्जया पूर्व्ववृत्तं स्मृत्वेदानीमपि मुमोह। तथाहि——

१। तव त्वहं कः—अहं पुनः तव कार्य्याकार्य्येषु न नियन्ता नापि फलभोक्ता इत्यर्थः।

२। स्वायत्तिपतितः—स्वस्य निजस्य आयत्तां वशतायां पतितः। तदधीन-जीवन-मरणः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सलज्जः पुरुषः श्लाघ्यः कापथेऽपि (१) व्रजन् क्वचित्।
लज्जा हि जायते पुंसो नाकुलीनस्य (२) मानसे ॥

ततः स राजकुमारस्तस्य वणिजस्तत्सजातीय-द्वारा संस्कारमौर्द्धदैहिकञ्च (३)कारितवान्। वञ्चक-स्तथापि निजव्यापारफलमैहिकमयशः पारलौकिकञ्च नरकमासादितवान्।

चौरकथा।

आसीदुज्जयिन्यां पुरि विक्रमादित्यो नामराजा। सचैकदा चौरव्यापारदर्शनकुतूहली रङ्कवेशं(४)परिगृह्य निजनगरएव देवतायतनसन्निधाने तस्थौ। तत्र च तमस्विन्यां (५) रात्रौ निशीथभागे चत्वारश्चौराः समागत्य मन्त्रयामासुः, यदिदं गृहादा-

---

१। कापथेऽपि व्रजन् क्वचित्—कस्मिंश्चित् कुत्सितमार्गे विचरन् अपि। कुशब्दस्य कादेशः।

२। अकुलीनस्य—कुले सत्कुले भवः कुलीनः, तस्य सद्वंशजातस्य गुणवत इत्यर्थः। तद्विपरीतस्य अकुलीनस्य।

३। और्द्धदैहिकं—देहात् ऊर्द्धं नाशात् परं कर्त्तव्यं श्राद्धतर्पणादिकम्। संस्कारं सत्कारं दाहनादिकम्।

४। रङ्कवेशम्—दरिद्रवेशम।

५। तमस्विन्यां कृष्णपक्षीयत्वात् अन्धकारवत्यां; निशीथभागे घर्द्धरात्रे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नीतमन्नमत्र भुङ्क्त्वा प्रवृत्तबलाः पुरं प्रविशामः। विक्रमादित्य उवाच, तदुच्छिष्टं मह्यं दास्यथ ? चौराः सवितर्कमाहुः (१), अहो कस्त्वम् ? राजोवाच, रङ्कोऽहं क्षुधाकुलितो गन्तुमसमर्थः पतितस्तिष्ठामि। चौरा ऊचुः, हुं नगरपथपरिशोधनसमये दिवाप्यस्माभिर्दृष्ट एवायमत्र। रे रङ्क ! कथमिदानीमप्यत्रैव तिष्ठसि ? राजोवाच, देवयात्राप्रवृत्तं(२)लोकमुद्दिश्य भिक्षार्थमहमागतोऽस्मि, क्षुत्राऽन्यत्र यास्यामि ? भिक्षामनासाद्य बुभुक्षितस्तिष्ठामि। चौरा ऊचुः, यदि तुभ्यमुच्छिष्टं दास्यामः, तदा किं पुनः प्रयोजनं करिष्यसि ? राजोवाच, तुङ्गं तुङ्गं धनिकगृहं दर्शयिष्यामि, चोरितवस्तुभारञ्च वोढास्मि। चौरा ऊचुः, ततस्तिष्ठ गृहाणोच्छिष्टमन्नम्। ततः कृतभोजनैश्चौरैःप्रदीयमानमुच्छिष्टमन्नं कर्परे कृत्वा वेतालेनापहारयन् राजोवाच, अद्याहं कृतार्थोऽस्मि युष्माकं प्रसादेन। ततस्तेषां मध्ये

१। सवितर्क—सविचारं, ससन्देहम्। Suspiciously.

२। देवयात्राप्रवृत्तं—देवस्य कस्यचित् यात्रायाम् उत्सवे प्रवृत्तम्। उज्जयिन्यां महाकालनाम्नः महादेवस्य लिङ्गं प्रतिष्ठितम् आसीत्। तस्य उत्सवकाले महती घटा बभूव। भवभूतिसमकाले तत्प्रणीतानि नाटकानि तत्र अभिनीतानि आसन्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सरीसृपनामा चौरोऽब्रवीत्, यदहं शाकुनिकशास्त्रे (१) कृतश्रमोऽस्मि, ततः शृगालाः किं वदन्तीति जानामि। इतरे ऊचुः, जानीहि। सरीसृप उवाच, सखायः! श्रूयतां युष्माभिः। शृगालो वदति, अस्माकं मध्ये चत्वारश्चौरा एको राजाऽस्तीति। चौरा ऊचुः, चत्वारोऽपि चिरपरिचिता एव पञ्चमोऽसौ रङ्कः। दिवापि दृष्टोप्ययं नैवोच्छिष्टग्राही दृश्यते। ततोहि कुतोऽत्र राजशङ्का। सरीसृप उवाच, शृगालभाषितं मिथ्या न भवति। इतरे ऊचुः, प्रत्यक्षबाधितेऽर्थे (२) का शङ्का? ततः पञ्चापि पुरुषाः प्रविविशुः पुरपतिगृहे (३)। सन्धिं कृत्वा बहूनि धनानि चोरयित्वा नगराद्बहिराहृत्य गर्त्ते चिक्षिपुः। चौराश्चत्वारोऽपि सरसि कृतस्नानाः पुनर्नगरमागत्य मदिरागृहं विविशुः। राजा च

१। शाकुनिकशास्त्रे—अत्र शाकुनिकशास्त्रमिदं पदं पशुपक्षिभाषितपरिज्ञाने वर्त्तते। पशुपक्षिणां ध्वनिश्रवणेन गतिविगतिजातिपङ्क्तिप्रभृतिदर्शनेन च भाविशुभाशुभगणनमपि शाकुनिकशास्त्रस्य विषयः।

२। प्रत्यक्षबाधितेऽर्थे—प्रत्यक्षप्रमाणविरुद्धे वस्तुनि।

३। पुरपतिगृहे—पुरस्य पतिः शासने अधिकृतः राजपुरुषविशेषः। At the house of the governor of the city. सन्धिं दीर्घविलं, सिंध इति भाषा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वकीयमगारमाजगाम। तदनन्तरमास्थानमण्डपे (१) सर्व्वावसरं कृत्वा सिंहासनोपरिस्थितः दण्ड-नायकमाहूयादिदेश(२)अये परलचक!(३)त्वमाज्ञा-पालोऽपि न जानासि किमपि रात्रिचरित्रम्? गच्छ तावदिदानीं चत्वारश्चौराः पिण्डिलनाम्नः शौण्डिकस्य (४) गृहे मद्यं पिबन्तः सन्ति, तानिह शृङ्खलबद्धान् कृत्वा सत्वरमानय। दण्डपाणिस्तु राजानं प्रणम्य गत्वा तथा कृतवान्। राजोवाच, रे रे मम सखायश्चौराः! परिचिनुथ माम्? सरीसृप उवाच, देव! मया तदैव परिचितो भवान्, किन्तु मे सखायः परमदुष्टाःशृगालस्यापि

१। आस्थानमण्डपे—सभागृहे। सर्व्वावसरं सर्व्वेभ्यो राजकार्य्येभ्यः अवसरं कृत्वा निवृत्तो भूत्वा इत्यर्थः। Refraining from all other work.

२। दण्डनायकं—शान्तिरचकम्, कोटाल इति भाषा।

३। परलचकः—परान् विपचान् शान्तिनाशकान् लचयति यः सः। अत्र नामविशेषः। आज्ञापालोऽपि—सदाज्ञानुसरणे अधिकृतोऽपि। रात्रिचरित्रं—रात्रिसम्भूतघटनां, रात्रौ यत् चौर्य्यादिकमनिष्टमापतति तदपरिज्ञानात् सदाज्ञापालनात्ते प्रमादो दृश्यते, तच्च शान्तिरचकस्य ते महत् स्खलनम् इति तात्पर्य्यार्थः।

४। शौण्डिकस्य—शुण्डाकारेण यन्त्रविशेषेण मद्यपचनात् शौण्डिकः। शुण्ड+इक।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कथितमतथ्यं निर्धारितवन्त; किमहं करोमि? सखिवचनैः प्रमत्तोऽस्मि। तथाहि——

एक एव हि नीतिज्ञः कर्म्म कृत्वा सुखी भवेत्।
बहूनपेक्षमाणस्य स्थानात् (१) प्रच्यवते मतिः॥

अपिच——

ज्ञातसारोऽपि (२) शूरोऽपि पण्डितोऽपि क्रियोद्यतः।
निमज्जति महाराज बहूनां मतिकर्द्दमे॥

राजोवाच, रे चौराः! परोपदेशग्रहणजं निज-प्रमादं शोचथ; स्वज्ञानदोषजं कथं न शोचथ? चौरा ऊचुः, कोऽस्माकं ज्ञानदोषजन्मा प्रमादः(३)? राजोवाच, स्फुट एवात्र युष्माकं प्रमादोऽस्ति, यद्वीर-वृत्तिसमर्था अपि (४) चौरवृत्तिं समाश्रयथ। चौरा ऊचुः, देव! दुर्नीतिरेवात्र कारणम्। राजोवाच, यद्येवं स्वीकुरुथ, तदा किं न त्यजथ? चौरा ऊचुः,

---

१। स्थानात् प्रकृतकार्य्यात् ईप्सितलक्ष्यात्।

२। ज्ञातसारः ज्ञाततत्त्वः; यः कर्त्तव्यार्थस्य स्वरूपं ज्ञातवान्। बहूनां मतिकर्द्दमे, बहूनां परस्परविरुद्धभाषिणां मतिकर्द्दमे विभिन्नमतिरूपे पङ्के इत्यर्थः।

३। ज्ञानस्य दोषाः भ्रमसंशयमोहादयः तेभ्यः जन्म यस्य सः।

४। वीरवृत्तिः वीरजनोचिता वृत्तिः युद्धादिका, कृषिवाणिज्यादिका स्वाधीना निर्द्दोषा वा वृत्तिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देव ! दरिद्रता तत्परित्यागस्य प्रतिबन्धिका । राजोवाच, यत् युष्माकं सख्यमालम्ब्य चणमहं चौरतां गतोऽस्मि, तत् कथं यूयं मम सख्येन राजतां (१) न यास्यथ ? तदग्रेऽपि परिहरिष्यथ दुर्म्मतिमिमाम् । चौरा ऊचुः, कथं न त्यच्यामः ? राजोवाच, इदानीं शृङ्खलबद्धा यूयं किंवा न स्वीकरिष्यथ ? तथाहि—

आक्रमे (२) पतिता दुष्टा जिह्वाग्रगतया गिरा ।
दूषणं के न मुञ्चन्ति के न गृह्णन्ति वा गुणम् ?

अथवा पुनर्यदि कुवृत्तिं करिष्यथ, तदा पुनरिमामेव दशां प्राप्स्यथ ; इत्यभिधाय पुरपतिधनं पुरपतये दापयित्वा स राजा चौरान् मुमोच । तेषां मध्ये सरीसृपनामानं चौरं शाल्मलिपुरे (३)

१। राजतां—राज्ञोभावः राजता राजवत् ऐश्वर्य्यमित्यर्थः ।

२। आक्रमे चमतायां पतिताः आयत्तीकृता इत्यर्थः । के दुष्टा जना जिह्वाग्रगतया जिह्वाग्रेण उच्चार्य्यमाणया गिरा वाक्येन दूषणं दोषं न मुञ्चन्ति न त्यजन्ति ; न वा गुणं गृह्णन्ति अवलम्बन्ते ? वाक्यमात्रेण दोषत्यागः गुणपरिग्रहश्च सुकरः, कार्य्यतस्तु दुष्कर एव इत्यर्थः ।

३। शाल्मलिपुर—a city in the continent of Sálmali, one of the seven dvipas or continents, which is imagined to be surrounded by the sea of clarified butter. Sálmali is also the name of a river in the infernal regions, so that Sálmalipura may mean a city situated on the banks of the river Sálmali.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

राजानं चकार, तदितरचौरान् काञ्चनेनैवादरिद्री-कृत्य करुणया कुतूहलेन च प्रस्थापयामास। ततः कियता कालेन राज्ञा चिन्तितं, यत् सरीसृपो राजत्वं प्राप्य किमिदानीं समाचरतीति मया निरूपणीयं भवति। यतः—

दुर्ब्बलस्य गुरुर्भारो दुष्टाग्नेर्गुरुभोजनम् (१)।
राज्यं गुरु च दुर्ब्बुद्धेः परिणामसुखं कुतः ?

ततः स राजा सुचेतनं नाम चारपुरुषं प्राप्तराज्यस्य तस्य चरित्रनिरूपणाय प्रस्थापयामास। चरस्तु तत्राधिगतसर्व्ववृत्तान्तः पुनराजगाम। राजोवाच, सुचेतन ! कथय वार्त्ताम्। चर उवाच, देव ! भवतः पथ्यमपथ्यमिति नहि विचारयामि, किन्तु तथ्यं कथयामि। अलीकभाषणं नोचितं चारपुरुषस्य। तथाहि——

काणेन चक्षुषा जन्तुर्यथा किञ्चिन्न पश्यति।
न पश्यति तथा राजा चारेणानृतभाषिणा॥

तदहं यथादृष्टं तच्चरितमुपवर्णयामि, शृणोतु देवः।

१। दुष्टाग्नेः मन्दाग्नेः उदरामयग्रस्तस्य। गुरुः दुर्ब्बहः दुःसहः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकस्मै कृपया तस्मै राज्यं दत्वा दुरात्मने ।
परानिष्टप्रवीणाय (१) बहूनां विपदः कृताः ॥
स दुर्वृत्तः पुराप्यासीत् समर्थो (२) भवता कृतः ।
दुर्वृत्तस्य समर्थस्य किन्नाम न करिष्यति ?
कृपास्तिमितचित्तेन (३) भवतापि महात्मना ।
दुर्गतिः खण्डिता तस्य प्रकृतिस्तु न खण्डिता ॥
यशः पुण्यं सुखञ्चेति त्रयं राज्यतरोः फलम् ।
तन्नानाप्नुवतस्तस्य किं राज्येन प्रयोजनम् ?
साधूनां हरति द्रव्यं हन्ति मानं मनस्विनाम् ।
निजसौकर्य्यलोभेन (४) किमकृत्यं दुरात्मनः ?
नावसीदति पापेन लज्जते नापकर्म्मणा ।
न द्रुह्यति परक्लेन घस्मरस्य (५) कुतोघृणा ?
ब्रवीति चौरवृत्त्याहं (६) गतोऽस्मि राजतां यया ।
त्यजामि केन दोषेण तामात्महितकारिणीम् ?

---

१ । परानिष्टप्रवीणाय—परेषां अनिष्टे प्रवीणः पटुः तस्मै ।

२ । समर्थः शक्तियुक्तः परेषां निग्रहानुग्रहयोः क्षमः ।

३ । कृपास्तिमितचित्तेन—कृपया स्तिमितं स्थिरं आयत्तं चित्तं यस्य तेन, अनुकम्पापरतन्त्रमनसा इत्यर्थः ।

४ । निजसौकर्य्यलोभेन—निजं यत् सौकर्य्यं सुविधा सुखस्वच्छन्दादिकं तस्मिन् लोभः लालसा तेन ।

५ । घस्मरस्य भक्षकस्य उपघातकस्य सर्व्वनाशकस्य इत्यर्थः । अद-भक्षणे, तस्मात् क्मरः । घृणा दया, परक्लेशासहनम् ।

६ । चौरवृत्त्या—चौर्य्यव्यवसायेन । तां चौरवृत्तिम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वयंकृतानि (१) कर्म्माणि स्वयमेव विलुम्पति।
तृष्णोपप्लुतचित्तानां स्थैर्य्यमङ्गीकृते कुतः ?

राजोवाच, सुचेतन एभिः पद्यैस्तस्य दुरात्मनश्चरितं विदित्वा स्वस्थोऽहं वृत्तोऽस्मि, मन्ये ममापि दुरकीर्त्तिरेवेयम् (२)। ततो विक्रमादित्येन प्रच्छन्नवेशधारिणा चौरस्य राज्यं गत्वा चरवचनं परीक्षितं, पश्चाच्चौरोऽपि राजपदादवतार्य्य पूर्व्वामेव दशां प्रापितो हतश्च।

सत्यवीरकथा। (३)

पुरा हस्तिनापुरनाम्नि (४) नगरे महामल्लनामा यवनेश्वरो बभूव। तस्मिन्नासमुद्रं धरणिवलयं शासति

१। स्वयं कृतानीति—यानि कार्य्याणि तेन चौरराजेन स्वयं कृतानि, तानि स स्वयमेव विलुम्पति अपलपति; यद्वा विपरीताचरणेन तानि निष्फलानि करोतीति इत्यर्थः।

२। दुरकीर्त्तिः—दुर् दुष्टा अकीर्त्तिः, महती अकीर्त्तिः।

३। वीरस्तावत् चतुर्व्विधः सत्यवीरः दानवीरः युद्धवीरः दयावीरश्च। तत्र युधिष्ठिरादयः सत्यवीराः, वलिप्रभृतयः दानवीराः, अर्ज्जुनादयः युद्धवीराः, जीमूतवाहनादयः दयावीराश्च।

४। हस्तिनापुर—The capital of the Kauravas and Pandavas, the remains of which still exist about 57 miles to the north-east of the modern city of Delhi, on the banks of the old channel of the Ganges. It was founded by Hastin, a King of the Lunar line.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदुत्कर्षासहिष्णुः कार्फरराज (१) स्तमभियोक्तु सकलबलसहितस्तत्राजगाम। यवनेश्वरस्तमायान्तं ज्ञात्वा काम्बोजै (२) स्तुरङ्गैश्वाश्वारोहैः बहुभिर्लक्षैः परिवारितः पुराद्बहिर्भूय तेन समं संग्रामसङ्गी-चकार। तदुभयवर्गसमारब्धे संग्रामे बलीयसा कार्फरराजसैन्येन हन्यमाना यवनयोधा रणात् पराङ्मुखा बभूवुः। ततः सिंहभयार्द्दितमिव करि-यूथं पलायमानं निजबलं दृष्ट्वा यवनेश्वर उवाच, रे रे मम सैन्यस्वभटा(३)राजानो राजपुत्राश्च युष्माकं मध्ये कोऽपि तथा नास्ति, य इदानीं रिपुभयभग्नं मम सैन्यं स्वेन बाहुबलेन क्षणमवलम्बते ? तच्च यवनराजवचनं श्रुत्वा कर्णाटकुलसम्भवो(४)नरसिंह-

---

१। कार्फर—is a corruption of Africa.

२। काम्बोज—This name is applied to the people of the north-western corner of India ; the country was noted for the breeding of horses.

३। सैन्यस्य स्वभटाः स्वपक्षीययोधाः सैन्यान्तर्गतयोधा इत्यर्थः।

४। कर्णाट—The modern Karnatic ; the name however was anciently applied to the central districts of the peninsula, including Mysore,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देवनामा चौहानकुल (१) सम्भवश्चाचिकदेवनामाच राजकुमारौ प्रोचतुः,राजन् ! क इदानीं निम्नाभिमुखं पततः पाथस(२)इव रिपुत्रासभग्नस्य भवद्बलस्य निवर्त्तयिता भवति ? यदि क्षणं परावृत्य भवान् अवलोकयति, तदा आवामेव भवतो विपक्षं खड्गधाराप्रहारपरिचितं करवाव:। यवनेश्वर उवाच, साधु कुमारौ साधु, युवाभ्यामन्यः क एतादृशं व्यवस्यति ? ततो नरसिंहदेवः कुलिशपातानुकारिणा कषाघातेन तुरगं त्वरयित्वा परावृत्याऽतर्कित एव कार्फरबलं प्रविवेश, प्रविश्य च जितकाशिन(३) मायान्तं सितातपत्रपरिचितं कार्फरराजं शल्येन हृदि हतवान्। कार्फरराजस्तु गतप्राणो भूमौ निप-

---

1 The Chouhàns are one of the Agnikulas, who are divided into four tribes, the Pramaras, the Pariharas, the Chaluks, and the Chouhaanas. The last mentioned tribe was the most valiant of all, the name meaning the "four-handed warrior." The genealogical tree of the Chouhàns exhibits 39 princes from Anhub, the first celebrated Chouhan, down to Prithviràja, the last of the Hindu emperors. The Chouháns sent forth twentyfour branches, of which the most celebrated are the existing families of Boondi and Kotah.

२। पाथस:—पयस:, जलस्य।

३। जितकाशिनं—जित' जयः भावे क्तः। तेन काशते उल्लसति जितकाशी, जयोद्धत इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पात। चाचिकदेवेन च भूमौ पतितस्य तस्य शिर-श्छित्वा यवनराजस्य पुरो नीतम्। यवनेश्वर उवाच, कस्येदं शिरः? चाचिकः कथयति, काफरराजस्य। यवनेश्वर उवाच. केनासौ हतः? चाचिको ब्रूते, राजन्! पराक्रमतुलितनरसिंहेन (१) नरसिंहदेवेन हतः। तत्पश्चाद्गामिना मया शिरश्छिन्नम्। यवनेश्वर उवाच. नरसिंहदेवः कुत्र? चाचिको ब्रूते, काफर-राजसन्निधानवर्त्तिभिः स्वामिवधामर्षितैः मङ्गोल स्वभटै(२)र्बहुभिरेको हन्यमानो मया दृष्टः, क्व गतः क्वेदानीमस्ति वा तन्न ज्ञायते। ततो यवनराजः पर-सैन्यं हतनायकं पलायमानं दृष्ट्वा परमसानन्दो(३) बभूव। पुरुषांश्च तदनुगामिनः स्वसैनिकान् प्रत्याह,

१। पराक्रमतुलितनरसिंहेन—पराक्रमेण तुलितः अनुकृतः नरसिंहः नृसिंहावतारो येन तथोक्तः।

२। मङ्गोलस्वभटैः—मङ्गोलाः महम्मदीयजातिविशेषाः सैकसैयद-मङ्गोलपाठानानामन्यतमाः तेषां स्वभटैः स्वपक्षीययोधैः।

३। परमसानन्दः आनन्देन सह सानन्दः (बहुव्रीहि,) परमश्चासौ सानन्दश्चेति परमसानन्दः। क्वचित् द्वयोः विशेषणयोरपि कर्मधारय-दर्शनात् साधु।

In rendering the phrase into English, the word "परम" should be considered as an adverb, thus—"exceedingly delighted."

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रे रे सैनिकाः ! पलायमानान् परभटान् किं निहथ? सम्प्रति राज्यरक्षितारं काफ़ैरराजहतान्तं नररूपिणं नरसिंहमिव नरसिंहदेवं मे विज्ञापयत। तदनन्तर-मेकत्र संग्रामप्रदेशे बहुतरनाराचभिन्नशरीरं (१) वहद्रुधिरधारासहस्रं (२) पुष्पितं किंशुकमिव वेदनामूर्च्छितं नरसिंहदेवं यवनराजो ददर्श, तुरङ्गादवतीर्य्य च बभाषे, हे नरसिंहदेव! जीवि-ष्यसि? नरसिंहदेव उवाच, राजन्! मया यत् कृतं तदवगतं भवता? यवनेश्वर उवाच, ज्ञातं मया; कथितं चाधिकदेवेन, त्वया मम शत्रुर्हतः। नर-सिंहदेव उवाच, तर्हि जीविष्यामि। यतः——

स्वीकृतं दुष्करं कर्म मया यस्य हितेच्छया।
तेन विज्ञायमानो मे फलितः श्रमपादपः।

ततस्तच्छरीरादापुङ्खनिमग्नान्(३)वाणान् उद्धृत्य

१। बहुतरनाराचभिन्नदेहं—बहुतरा नाराचाः वाणाः तैः भिन्नः क्षतः देहो यस्य तथोक्तः।

२। वहद्रुधिरधारासहस्रं—रुधिरस्य धाराणां सहस्रं रुधिरधारा-सहस्रं वहत् रुधिरधारासहस्रं यस्मात्। सहस्रशब्दोऽत्र अनियत-संख्यावाची।

३। आपुङ्खनिमग्नान् फलात् आरभ्य पुङ्खपर्यन्तं शरीरान्तःप्रविष्टान्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यवनराजस्तं कुमारं नानाभेषजप्रयोगेण नियमेन(१) च स्वल्पैरेव दिवसैर्निर्व्वाणक्षतमचीकरत्। तदनन्तरं सहस्रसंख्यैस्तुरङ्गैर्लक्षसंख्यैः काञ्चनच्छत्रचामरादिभिश्च तं पूजयितुमुपचक्रमे। प्रसादावसरे (२) नरसिंहदेव उवाच, राजन्! युद्धं राजपुत्राणां स्वाभाविक एव धर्म्मस्तत् किमद्भुतं मया कृतं, यदियं मम पूजा क्रियते? यदि तु पूजैव कर्त्तव्या, तदा चाचिकदेवस्य क्रियतां, येन रिपुशिरोऽप्यानीय सत्यरक्षणानुरोधेन भवतः पुरस्तान्मम यशः प्रकाशितं, स्वपौरुषं न ख्यापितम्। अन्यथानेन नीयमानं मारणचिह्नं (३) रिपुशिरो दृष्ट्वा को वाप्यगमिष्यत्, यन्मया मारितोरिपुरिति? तदयमेव प्रथमं पूज्यताम्। चाचिकदेव उवाच, कुमार नरसिंहदेव मैवं ब्रूहि। कथमहं तव पराक्रमफलमादाय परोच्छिष्टजीवी

१। नियमेन—पथ्याहारादिना।

२। प्रसादावसरे—प्रसादस्य प्रसादचिह्नप्रदर्शनस्य पारितोषिकदानस्य अवसरे समये।

३। मारणचिह्नं—मारणस्य वधस्य चिह्नानि असिप्रहारादिजनितानि लक्षणानि यत्र तत्;

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भविष्यामीति। नरसिंहदेव उवाच, साधु सत्यवीर साधु, अनेन तव सत्येन सर्व्वमेव(१)विवेचितम्।

महेच्छोऽसि विदग्धोऽसि सतीपुत्रोऽसि चाधिक॥

ततस्तयोः परस्परमालापमुपकर्णयता समुपजातपरितोषेण यवनराजेन द्वावपि कुमारौ तुल्यमेव सत्कृतौ।

दानवीरकथा।

आसीन्महीमण्डले सकलराजलक्षणोपेतः (२) सार्व्वभौमः शूद्रको (३) नाम राजा। एकदासौ अमात्यगणपरिवृतः परिषदमास्थितः। तदैको राजपुत्रः पुत्रभार्य्यासमेतो देशान्तरादाजगाम,

---

१। सर्व्वमेव विवेचितं—सर्व्वम् ऐहिकं पारत्रिकं समस्तमेव कुशलं विवेचितं विचारितं विचार्य्य सम्पादितमित्यर्थः। इदं ते सत्यम् इह चामुत्र च कल्याणाय कल्पते इत्यर्थः।

२। सकलराजलक्षणोपेतः—सकलानि राज्ञः लक्षणानि विलक्षणधर्म्माः शौर्य्योदार्य्यादयः तैः उपेतः युक्तः। सामुद्रिकैः उक्तानि आजानुलम्बितबाहुत्वादीनि शरीरगतचिह्नानि वा।

३। शूद्रक—The name of the first Andhra king, author of the drama called Mrichhakatika.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वर्त्तनार्थी(१)च दौवारिकमब्रवीत्, भो दौवारिक! मामवेहि राजपुत्रम्। अहं पुत्रभार्य्यासहायः शूद्रक-महाराजस्य यशः श्रुत्वा वर्त्तनार्थी समागत्य तिष्ठामि। मम वृत्तान्तं राज्ञे विज्ञापय। श्रुत्वैतत् प्रतीहारी राजानं विज्ञाप्य आगन्तुकमुपनिनाय। तमवलोक्य राजा पप्रच्छ, को भवान् किमर्थमिहा-गत्य मिलितः? इति पृष्टः स ब्रूते, देव! वीरवर-नामा क्षत्रियोऽहम्, भवत्सेवाकाङ्क्षी समागत्य तिष्ठामि। राजा वदति, किं जीवनं(२) कर्त्तव्यं तद्वद। वीरवरेणोक्तं, प्रत्यहं सुवर्णशतपञ्चत्रयं(३) ददातु देवः! राजाब्रवीत्, अहो? अत्र(४) नेक-महागुणवन्तः सन्ति; केषामपि एतावज्जीवनं न विद्यते। तत् श्रुत्वा वीरवरो नृपतिमभिवन्द्य चलितः। ततः सान्धिविग्रहिकेणोक्तं,(५) देव!

१। वर्त्तनार्थी—आजीवार्थी। २। जीवनं—जीवति अनेन जीवनं वेतनम्। करणे अनट्।

३। सुवर्णानां सुवर्णमुद्राणां तोलकपरिमितानां शतानां पञ्चत्रयं पञ्चदश। पञ्चदशशतसुवर्णमुद्राः इत्यर्थः। ४ अत्र—राजाधिकारे।

५। सान्धिविग्रहिकेण—सन्धिविग्रहौ वेत्ति सान्धिविग्रहिकः, सन्धि-बन्धने युद्धकरणे च कुशल इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतेन मा कातरो भव, दिवसकतिपयम् एतावज्जीवनं दत्त्वा वीरवरः परीक्ष्यताम्। बहुलधनमपि विनष्टं न भविष्यति। ततो राज्ञा पुनरानीय तस्मै यथाभिलषितवर्त्तनं दत्त्वा स्थापितोऽयम्। वीरवरो वर्त्तनधनस्यार्द्धं ब्राह्मणेभ्यो दत्त्वा चतुर्थांशम् अन्धपङ्गुजनेभ्यो दत्त्वा अवशिष्टचतुर्थांशेनात्मानं वर्द्धयति। एवं राजसेवां कुर्व्वन्नास्ते। अथैकदा दक्षिणस्यां दिशि रात्रौ एका स्त्री करुणस्वरेण रोदिति। तत् श्रुत्वा राजा वदति, द्वारि कस्तिष्ठति ? वीरवरेणोक्तं देव ! अहमस्मि। नृपेणोक्तं, वीरवर ! का रोदिति, तां निश्चित्य मां ज्ञापय। ततोऽयं गतः। राजा च तस्य पश्चात् अनुपलक्षितो जगाम। वीरवरस्तत्र गत्वा रुदतीमालोक्याब्रवीत्। मातर्भवती किमर्थम् एकाकिनी रोदिति ! सा तु यत्नेन पृष्टा ब्रूते, वत्स ! अहं शूद्रकस्य लक्ष्मीः, स महात्मा प्रातःकाले नाशं गमिष्यति, तदहमिदानीं कुत्र स्थास्यामि इति रोदिमि ! तत् श्रुत्वा वीरवरेणोक्तं, मातर्भवती यथा चिरस्थायिनी, राजा च चिरजीवी भवति, तदुपायं वदतु भवती, अहं तावत् करोमि। लक्ष्मीः ब्रूते, वत्स ! तत् दुष्करं कर्म्म कः करिष्यति !

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वीरवरेणोक्तं मयाऽशक्यमपि कर्त्तव्यमिति (१) वदतु भवती। लक्ष्मीः ब्रूते, द्वात्रिंशल्लक्षणोपेतं (२) कुमारं समानीय तन्मातृभगिन्यौ तच्चरणौ स्वेच्छया दधाते; स्वयमपि पिता कात्यायन्यै बलिं ददाति, तदा राज्ञः शोभनं (३) भवति। केशाकर्षणशिरश्छेदं यदि पुत्रः स्वीकरोति तदैव, नान्यथेति, निगद्य लक्ष्मीरन्तर्हिता बभूव। राजा सर्व्वं श्रुत्वा सुगुप्तं तदनुसरणं(४)करोति। वीरवरः सहसा स्वगृहं गत्वा पत्नीं पुत्रे दुहितरि च सर्व्वमकथयत्, प्राबोधयच्च (५)। तत् श्रुत्वा पत्नी वदति यद्येतत् दुष्करं कर्म्म न कर्त्तव्यं तदा परलोके निस्तारः कथं भविष्यति! तत्पुत्रः शक्तिधरो ब्रूते, तात! धन्योऽहं यन्मम मरणे राजा चिरजीवी, राज्यस्य च निस्तारो भविष्यति। दुहिता चाभिनन्दति। राजा सुगुप्तः

१। इति—इति हेतोः।

२। द्वात्रिंशल्लक्षणोपेतं—द्वात्रिंशता लक्षणैः शरीरस्थैः सामुद्रिकैश्चिह्नैः महापुरुषत्वसूचकैः इत्यर्थः।

३। शोभनम्—शुभम्।

४। तदनुसरणं—तस्य वीरवरस्य अनुसरणम् अनुगमनम्।

५। प्राबोधयत्—प्रकर्षेण ज्ञापयामास, तेषां सम्यक्ज्ञानार्थं व्याचष्ट स इत्यर्थः।"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्व्वं श्रुत्वाऽनुपलक्षितस्तिष्ठति। वीरवरः सपरिवारस्तत्र गत्वा तेनैव विधिना राज्ञो विपत्तिक्षयहेतोः स्वपुत्रं भगवत्यै बलिं ददौ, तच्छोकं परिहर्त्तुं राज्ञो दीर्घायुष्यकामस्तेन(१)खड्गेन आत्मनः शिरश्चिच्छेद च। गुरुतरशोकेन वीरवरपत्नी दुहिता च नृपतेर्दीर्घायुष्यकामा स्वशिरश्चिच्छेद। राजा सर्व्वमेतदवलोक्य सपरिवारस्य वीरवरस्य सात्त्विकत्वमधिगम्य(२)स्वशिरश्छेत्तुमुपचक्रमे। एतावति समये आकाशवाणी बभूव, राजन् त्वम् आत्मबलिं न दास्यसि। त्वयि कात्यायनी प्रसन्नाऽभवत्। राजा वदति, मातः! यद्येवं तदा वीरवरः सपरिवारो जीवतु। वीरवरे सपरिवारे जीविते (३) सति राजा अनुपलक्षितः सहसा स्वगृहमागतः। प्राप्तजीवनो वीरवरः पत्नीं पुत्रं दुहितरं च स्वगृहे संस्थाप्य नृपद्वारमागतः। तमायातमवलोक्य राजा वदति,

१। दीर्घायुष्यकामः—आयुरेव आयुष्यम्। स्वार्थे ष्यञ्ः। दीर्घम् आयुष्यं कामयते यः सः। कर्त्तरि अः। दीर्घम् आयुर्यस्य स दीर्घायुस्तस्य भावः दीर्घायुष्यं भावार्थे ष्यञ्ः इति केचित्।

२। सात्त्विकत्वं सत्त्वेन सत्त्वगुणेन जनितं सात्त्विकं, तस्य भावः। शुद्धधर्म्मबुद्ध्या अनुष्ठितम् आचरणम् इत्यर्थः।

३। जीविते—जीवनं प्रापिते कात्यायन्या इति शेषः जीव+णिच्+क्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वीरवर ! कुत्र गत्वा स्थितं भवता, का रोदिति ! तद्रहस्यं कथय। इति पृष्टो ब्रूते, देव ! एका स्त्री दुःखिनी रोदिति, तां निःसार्य्यागतोऽस्मि(१)। राज्ञोक्तं वत्स ! स्वगृहं गच्छ। अथ परदिने राजा सर्व्वामात्यान् समाहूय वीरवरस्य सपरिवारस्य सात्त्विकत्वं निगदितवान्। तत् श्रुत्वा सर्व्वे विस्मिता बभूवुः। तदा वीरवरप्रसादात् राजा सार्व्वभौमो(२) बभूव। वीरवरश्च बहुतरहयहस्तिधनजनमणि-रत्नानि (३) दत्वा शेखरदेशे राजानं कृतवान्। वद राजन् ! वीरवरशूद्रकयोर्म्मध्ये को महान् महा-सत्त्वश्च (४)! राजा वदति, शृणु रे वेताल ! सेव-कानामयमेव धर्म्मः यत् प्रभुकार्य्ये प्राणांस्त्यजन्ति। किन्तु शूद्रको नृपतिर्म्महान् महासत्त्वश्च, यदेवंविध-साहसेन सेवकं परिवारसहितं जीवयित्वा राजानं कृतवान्। नृपताविति वादिनि वेतालः शिंशपावृक्षे पुनर्लेलाग।

१। निःसार्य्य—दूरम् अपवाह्य। निर्+सृ+णिच्+यप्।

२। सर्व्वस्याः समग्रायाः भूम्याः पृथिव्याः ईश्वरः सार्व्वभौमः।

३। बहुतरेषु हयेषु, हस्तिषु, धनेषु सुवर्णादिषु, जनेषु दासादिषु, मणिषु मरकतहीरकादिषु यानि रत्नानि जातिश्रेष्ठवस्तूनि तथोक्तानि। "जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते" इति।

४। महासत्त्वः—महत् सत्त्वं मनः स्वभावो वा यस्य सः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जीवदयाकथा ।

अत्रैव भारते क्षेत्रे राजपुरं नाम नगरं। यत्र नगरे मयूरगणा जिनमन्दिरे वाद्यमानातोद्य-ध्वनिं (१) श्रुत्वा नृत्यं कुर्वन्ति। तत्र नगरे सुनन्द इति नाम्ना वसति धीवरः, परं (२) स्वभावेन जीवदयापरः। तस्य जिनदासनामा श्रावकः (३) परममित्रं बभूव। अन्यदा जिनदासेन सह सुनन्दो गुरूणां पार्श्वं जगाम। गुरून् वन्दित्वा द्वावपि उपविष्टौ। गुरुभिः जीवदयाविषये धर्म्मादेशना (४) कृता—

कल्याणकोटिजननी दुरन्तदौर्भाग्यदुःखदलनी भवति जीवदया।

सुनन्देन अभिग्रहो (५) गृहीतः, भगवन् अतः-परं जीवबधो न कार्य्यः मया मांसं न भक्षितव्यम्। एवं बहुषु दिनेषु व्यतिक्रान्तेषु दुर्भिक्षं सञ्जातम्।

१। आतोद्यध्वनिम्—आतोद्यस्य वीणादिवाद्यचतुष्टयस्य ध्वनिम्।

२। परं—यद्यपि जात्या धीवरः, तथापि प्रकृत्या जीवदयापरः।

३। श्रावकः—A particular class of Buddhist saints or ascetics; a Bouddha or Jaina votary.

४। धर्म्मादेशना—धर्म्मस्य आदेशना आदेशनम्, exhortation.

५। अभिग्रहः—अभि सम्यक् गृह्यते असौ अभिग्रहः व्रतं (a vow). अभि+ग्रह+अल् (कर्म्मणि)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन् दुर्भिक्षे सर्व्वोऽपि जनोऽन्नस्य अप्राप्तौ मत्स्यमांसाहारं करोति। सुनन्दोऽपि भार्य्यया भणितः, त्वमपि लोकाचारं प्रतिपालय। तेन कथितं, पापहेतुना कर्म्मणाऽलम्। भार्य्या प्राह, रे मूर्ख! त्वं केन भ्रामितः यत् कुलाचारं न पालयसि? इतश्च तस्य श्यालका मिलिताः, तैर्बलात् महाह्रदे नीतः तत्र जालं क्षेपितः (१)। जाले पतितान् व्याकुलान् बहून् मत्स्यान् दृष्ट्वा सुनन्दस्य हृदये कृपा समुत्पन्ना। सर्व्वान् मत्स्यान् विमुच्य सुनन्दो गृहम् आगतः। एवं त्रीणि दिनानि तैः श्यालकैस्तेन सुनन्देन तत् पापकर्म्म कारितम्। तेन मनसापि न विहितम्। परं संघट्टवशात् एकस्य मत्स्यस्य पाङ्कुड़ी (२) भग्ना। तेन श्यालकानाम् अग्रे कथितं, भोः भोः कुटुम्बस्य कृते प्राणिवधं न करोमि। इत्युक्त्वा तेन अनशनं गृहीतं मृतश्च।

अत्रैव भारते राजगृहे (३) नगरे नरवर्म्मा नाम

१। क्षेपितः—क्षिप्+णिच्+क्तः। अत्र प्रयोज्यकर्त्तुः कर्म्मत्वं व्याकरणविरुद्धमपि तदानीन्तनव्यवहारसिद्धमपि रुध्याव्यते।

२। पाङ्कुड़ी—पाङ्खना इति भाषा।

३। Rajagriha—was sometime the chief city in Magadha, (said to be nine yojanas distant from Pâtaliputra.)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

राजा। तत्र मणिकारो नाम श्रेष्ठी द्वादशसुवर्ण-कोटीनाम् अधिपतिः, तस्य सुयशानाम्नी भार्य्या, तस्याः कुक्षौ सुनन्दजीवः समुत्पन्नः। तस्य दामन्नक इति नाम कल्पितम्। क्रमेण अष्टवार्षिको जातः। अन्यदा भवितव्यतावशेन तस्य श्रेष्ठिनो गृहे मारिरोगः सञ्जातः। राज्ञा भणितं, अयं मारिरोगः सर्व्वत्र पुरे सञ्चरिष्यति। अतोऽस्य गृह-द्वारि वाटी(१)कारिता। कियता कालेनैव मारि-रोगेण सर्व्वे मातापितृप्रमुखाः(२)परिजनाः मृताः। पूर्व्वभवकृतानुकम्पावशेन परं दामन्नकः उद्धा-रितः(३)। परं गृहात् निःसारं न लभते। क्रमेण मृतकभक्षकाणां शुनां (४) प्रवेशमार्गेण निर्गतः भिक्षानिमित्तं भ्रमन् सागरपोतस्य व्यवहारिणो गृहे गतः। यावत् गृहद्वारि तिष्ठति, तावत् मुनि-

---

१। वाटी—वृतिदत्तं गृहं, तस्य गृहस्य द्वारं हत्या तथा बद्धमकारि यथा प्रवेशनिर्गमौ सर्व्वथा रुद्धौ।

२। माता च पिता च मातापितरौ प्रमुखौ येषां ते मातापितृ-प्रमुखाः।

३ उद्धारितः—मारिरोगात् निस्तारं प्रापितः। उत्+हृ+णिच्+क्तः।

४। शुनां—कुक्कुराणाम्। श्वन्+आम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

युगलं विहरणाय (१) समागतम्। दामन्नकं दृष्ट्वा ज्येष्ठतपोधनेन उक्तम्—

षष्ठी भाग्यं भवेद्रङ्को गृहेऽस्मिन् सर्व्वशर्म्मभाक्।

कुड्यान्तरितेन सागरपोतव्यवहारिणा इदं वचः श्रुत्वा स्वमनसि चिन्तितं, मुनयः प्रलयेऽपि अलीकं न वदन्ति। तावत् किं मम कुलक्षयो भविष्यति, समुद्रदत्तो मे पुत्रः किं विनाशं यास्यति, यत इयति प्रौढ़े(२) मम कुटुम्बे प्रवर्त्तमाने अयं रङ्को मम गृहस्वामी भविष्यति? अन्यच्च, यत् मुनिना उक्तं तत् अन्यथा न जायते। श्रेष्ठी दुःखी बभूव, धिक् संसारनाटकम्! यो विभवो मम पितृपितामहप्रमुखैः अतिचिरपरिपालितः, हा! तस्य विभवस्य अयं रङ्कः स्वामी भविष्यति! तावत् कमपि उपायं करिष्यामि। किं कृतेन दुःखेन? तावत् अस्य मारणोपायं चिन्तयामि। अयं रोग इव उपेक्षितो मरणाय जायते इति स्वचित्तेन स मन्त्रयित्वा मोदकं गृहीत्वा तस्य दामन्नकस्याग्रे उक्तं, वत्स! आगच्छ, यथा ते मोदकं ददामि। इति श्रुत्वा दामन्नकोऽपि

१। विहरणाय—यादृच्छिकपर्य्यटनाय।

२। प्रौढ़े—महति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तेन सह जगाम। गतो व्यवहारी चण्डालपाटके(१)। तत्र खड्गिलोनाम चण्डालाग्रणीः। तम् आकार्य्य एकान्ते तस्मै द्रव्यं प्रदाय तस्याग्रे इत्युक्तं, भो मदीयम् एतत् प्रयोजनं कुरु, यथा बालः प्रच्छन्नं हन्तव्यः। मारितस्य अभिज्ञानं मम दर्शयितव्यम्। चण्डालेनापि प्रतिपन्नम् (२)। नगरात् दूरं नीतो दामन्नकः। चण्डालेन चित्ते चिन्तितं, अनेन वराकेण कोऽपराधो विहितः, यत् सागरपोत एनं मारयति ! तदहं सर्व्वथा एनं न मारयिष्यामि, मम हस्तौ न वहतः। ततो यमजिह्वासमानां कर्त्तिकां समाकृष्य तस्य कनिष्ठाङ्गुली छिन्ना। तस्य बालकस्योक्तं, यदि अस्मिन् नगरे स्थास्यसि ततो मारयिष्यामि त्वां, यदि नगरं मुक्त्वा अन्यत्र यासि ततो मुञ्चामि त्वाम्। तेन रुदता उक्तम् एवं करिष्ये। ततो मुक्तश्चण्डालेन। चण्डालेन गृहे गत्वा अङ्गुलीखण्डं दर्शितं सागरपोतस्य। सोऽपि हृष्टो बभूव। दामन्नकोऽपि वने भ्रमन् सागरपोतस्य

१। चण्डालपाटके—चण्डालानां पाटकः विभागः पाड़ा इति भाषा। Half of a village, part of a villge, a kind of village.

२ प्रतिपन्नं—स्वीकृतम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गोकुलिकेन(१)दृष्टः पृष्टश्च कस्त्वम् ? दामन्नकेनोक्तम्, उत्सन्नवंशो वणिक्पुत्रोऽहम् । ततस्तं स्वगृहे नीत्वा तेन गोकुलिकेन निजभार्य्यायाः समर्प्य उक्तं, तव अपुत्रायाः अयं पुत्रो गोत्रदेव्या(२)दत्तः । गोकुलिक-गृहिणी परितुष्टा जाता । विनयप्रमुखैः गुणैः स तस्या अतीव वल्लभो बभूव । दामन्नकस्तत्र गोकुले वर्द्धमानो यौवनं समाससाद ।

अथ कदाचित् गोकुलविलोकनार्थं सागरपोत-व्यवहारी आजगाम । तत्र दामन्नकं दृष्ट्वा व्यव-हारिणा पृष्टम्, अयं को बालः ? तेनोक्तं, एकाकी अत्र वने भ्रमन् निर्नाथो मया पुत्रत्वेन प्रतिपन्नः । व्यवहारिणा कर्त्तितकनिष्ठाङ्गुलीदर्शनात् दामन्नक-एवायमिति निश्चितं, चिन्तितञ्च, मम वाह्यधनस्य अयं स्वामी भविष्यतीति मुनिवचनं किम् अन्यथा भवति ! तथापि पुरुषकारो (३) न मोक्तव्यः । एवं विचिन्त्य सागरपोतेनोक्तं, भो गोकुलिक ! वयं

१। गोकुलिकेन—गोकुलरक्षणे नियुक्तेन पुरुषेण ।

२। गोत्रदेव्या—कुलदेवतया ।

३। पुरुषकारः—उद्योगः, अभीष्टसाधने प्रयत्नः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गमिष्यामो गृहम् । तेनोक्तं बहोः कालात् अद्य यूयम् (१) आगताः । अद्यापि गोकुलं न विलोकितम् । सागरपोतेनोक्तं, गृहे महत् कार्य्यम् अस्ति, अतोऽधुनैव यास्यामः । गोकुलिकेनोक्तं, यदि अपरिहार्य्यं कार्य्यमस्ति ततो लेखं गृहीत्वा अयं मम पुत्रस्तत्र यास्यति । सागरपोतेन लेखं लिखित्वा तस्य करे अर्पयित्वा प्रेषितः सः गतो दामन्नकः । यावत् राजगृहनगरोद्याने गतः, तावत् परिश्रान्तः विश्रामहेतोः देवगृहे सुप्तः । निद्रा समागता ।

इतश्च तस्यैव व्यवहारिणो विषानाम्नी पुत्री देवपूजानिमित्तं तत्रैव प्राप्ता । तया दृष्टो दामन्नको विशाललोचनो विशालवक्षःस्थलः । तस्याः तं विलोकयन्त्याः पितृलेखे दृष्टिर्गता । यष्टिप्रान्तात् तं गृहीत्वा वाचयति, स्वस्ति श्री गोकुलात् सागरपोतः समुद्रदत्तं सस्नेहमालिङ्ग्य वार्त्तयति (२) प्रस्तौति कार्य्यञ्च,—

१। वयं यूयमिति गौरवात् बहुत्वम् ।

२। वार्त्तयति—वार्त्तं आशिषं करोति, अनामयं पृच्छति वा । वार्त्तशब्दात् तत्करोतीत्यर्थे णिच् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अधीतपादकस्यैव (१) पुरुषस्यास्य सत्वरम् ।
विषं दत्वा त्वया कार्य्यं निःशल्यं हृदयं मम ॥

ततस्तया चिन्तितं, नूनं पित्रा मम योग्य एष वरो लब्धः, यत् अद्यैव विवाहः कार्य्यः, तत् अद्यतनीयं सुन्दरं दिनं दृष्टम् । अतोऽद्यैव विवाहः भविष्यति । यत् विषं दातव्यं तत् औत्सुक्यवशात् आकारस्थाने अनुस्वारो विहितः । तदहं शुद्धं करिष्यामि । इति विचिन्त्य नयनाञ्जनं गृहीत्वा बिन्दुस्थाने आकारः कृतः । पुनरपि मुद्रयित्वा लेखस्तथैव मुक्तः । सा गृहं गता । स्तोकवेलानन्तरं दामन्नकोऽपि तत् गृहम् आजगाम । समुद्रदत्तस्य लेखः समर्पितः, समुद्रदत्तेनाऽपि वाचयित्वा लेखोऽवधारितः । तातादेशो मम प्रमाणम् (२) इति भणित्वा विवाहस्य सामग्री कृता । समग्रोऽपि स्वजनवर्गो मिलितः । तस्मिन्नेव दिने शुभे लग्ने समागते दामन्नको विवाहं कारितः ।

अत्रान्तरे सागरपोतो नगरं प्राप्तः । मार्गमिलितेन लोकेन कथितं धन्यस्त्वं येन ईदृशो जामाता

---

१ । अधीतौ पादौ येन तथोक्तस्य बहुव्रीहौ कः । पादधावनात् पूर्व्वमेव, विलम्बं विना, अद्यैव इत्यर्थः ।

२ । प्रमाणं—बहुमानास्पदं, सर्व्वथा पालनीयमित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राप्त:। सागरेण चिन्तितं, नूनं तेन दुरात्मना मम पुत्री परिणीता। गृहागतेन दृष्टा स्वपुत्री विवाहकङ्कणालङ्कृतशरीरा, दृष्टश्च दामन्नकः कौतुक-भूषितकरः(१)। हा! अन्यथा अहं कार्य्यं चिन्तयामि, दैववशेन अन्यथा परिणमति। साम्प्रतं मम गृह-मनुष्याणाम् अयं स्वामी बभूव। यतः गृहस्थानां गृहेषु स्त्रियः प्रमाणं, स्त्रीणां जामाता प्रमाणम्। एतत् अनुचितं द्रष्टुं न शक्नोमि। मम पुत्र्या वैधव्यं वरं सहिष्ये, पुनरेनं सर्व्वथा मारयिष्यामि। इति विचिन्त्य गतो मातङ्गपाटके। खङ्गिलः भणितः, रे चाण्डाल! त्वया मम वचो न प्रमाणीकृतम्। तेनोक्तं तदा बालकं दृष्ट्वा कृपा उत्पन्ना। अधुना दर्शय यथा तं व्यापादयामि। सागरपोतेन भणितं, यदि एवं ततोऽद्य नगरदेवतापूजनार्थं तं दामन्नकं प्रेषयिष्यामि, तदा त्वया मारयितव्यः। ततो गृहम् आगतः। गृहम् आगतेनोक्तं, वधूवराभ्यां कुलोचित आचारः प्रतिपालितः किं वा न? परिजनैरुक्तं न प्रतिपालितः। ततो नगरदेवीपूजनाय सामग्री कृता। ततश्चलिते वरवध्वौ देवीपूजार्थम्। मार्गे

१। कौतुकं—विवाहहस्तसूत्रम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्रजन्त्यौ दृष्टे हट्टनिविष्टेन समुद्रदत्तेन, पृष्टे च ईदृशि सन्ध्यासमये सूर्य्येऽस्तमिते, तिमिरप्रसरे परिस्फुरति, युवां कुत्र चलिते? दामनकेनोक्तं नगरदेवीपूजनाय। समुद्रदत्तेनोक्तं, तर्हि युवां तिष्ठतम्, अहमेव गत्वा देवीपूजां करिष्यामि। पूजोपकरणं गृहीत्वा गतः। समुद्रदत्तो देवीगृहं प्रविशन् पूर्व्वप्रविष्टेन खड्गिलेन हतः। यावत् सागरपोतः समुद्रदत्तनिरीक्षणाय आयाति, तावद्दृष्टो दामनको वधूसहितः। ततः स पुत्रविनाशं श्रुत्वा हृदयं स्फुटित्वा मृतः। ज्ञात-वृत्तान्तेन राज्ञा दामनकः तस्य गृहे स्वामी कृतः। अन्यदा मङ्गलपाठकैः पठितम्——

परोपकरणं कायादसारात् सारमाहरेत् (१)।

तथाच——

प्रवर्त्ततां मनुजहिताय सज्जनो दयावति द्रविणततिर्न हीयताम् (२)।

एतत् श्रुत्वा तेषां त्रयाणां सहस्रं सुवर्णानि

१। असारात् क्षणभङ्गुरत्वात् सारहीनात् अस्थिरात् कायात् सारं सारांशभूतं परोपकरणं परोपकारम् आहरेत् उद्धरेत्।

२। दयावति जने द्रविणततिः धनविस्तारः न हीयतां न न्यूना भवतु। हीयतामित्यत्र हाधातोः कर्म्मणि प्रार्थनायां लोट्। ततिः—तन विस्तारे इत्यस्मात् क्तिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दत्तानि दामन्नकेन। राज्ञा अनुचितं दानं श्रुत्वा दामन्नक आकारितः, पृष्टं दानकारणम्। तेन निज-पूर्व्ववृत्तान्तो राज्ञोऽग्रे निवेदितः। राज्ञा परितुष्टेन तस्मै श्रेष्ठिपदं दत्तम्। अथ स विपुलान् भोगान् भुनक्ति, दानं ददाति, प्रसादान् उद्धरति(३)। अन्यदा तस्य चिन्ता बभूव, यत् पूर्व्वभवे मया किं कर्म्म विहितं यत् व्यसनस्थाने मम उत्सवः? इति विचिन्त-यतस्तस्य प्रभातं जातम्। प्रभाते धर्म्मनियुक्तेन (४) पुरुषेण दामन्नकस्य अग्रे उक्तम्, उद्याने विमलबोध-आचार्य्यः समागतः। दामन्नको हृष्टो बभूव। गतो वन्दनार्थम्। वन्दित्वा पूर्व्वभवः पृष्टः। मुनिनापि पूर्व्वोक्तस्तस्य पूर्व्वभवः कथितः, यत्त्वया पूर्व्वभवे मत्स्यानां त्रिवेलं कष्टम् उत्पादितम्, ततोऽस्मिन् भवे तवापि त्रिवारं कष्टम् आगतम्; यत् एकस्य मत्स्यस्य पाङ्गुड़ी भग्ना, ततस्तव कनिष्ठाङ्गुली छिन्ना। जीव-दयाप्रभावात् तव ईदृग्री सम्पत्। इति श्रुत्वा जातिस्मरो जातः दीक्षां गृहीत्वा स्वर्गं जगाम।

३। प्रसादान् उद्धरति—अनुग्रहान् परिशोधयति; प्रत्युपकारेण पूर्वोपकारिभ्य आनृण्यं लभते।

४। धर्म्मनियुक्तेन—धर्म्मे देवार्च्चनादौ नियुक्तेन।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सत्यमञ्जरीकथा ।

अत्रैव भारते वैताढ्यपर्वते कनकपुरं नाम नगरं। तत्र कनकरथो नाम विद्याधरो राजा। तस्य एते गुणा निवसन्ति। त्यागी सरल: दाक्षिण्यसारो (१) रूपवान् कामरूपी (२); विद्याप्रभावत: पूजित-समीहितसार्थ: (३)। अन्यदा रात्रौ निजनगरस्य मध्ये नष्टचर्य्यायां (४) परिभ्रमति कनकरथ:। तावत् एकस्मिन् देवकुले प्रेक्षणिका (५) भवति, तत्र गीतं गीयते। तावत् गायनेन एषा गाथा पठिता। तद्यथा—

१। त्यागी—दानशील:, दाक्षिण्यं परच्छन्दानुवर्त्तनं तस्य सारो यस्मिन्, परमदाक्षिण्ययुक्त:।

२। कामरूपी—कामेन इच्छानुसारेण नवनवरूपधारणे पटु:।

३। विद्याप्रभावत:—शास्त्रज्ञानबलेन पूजित: पुरस्कृत: समीहिता-नाम् अभीष्टानां सार्थ: समूहो येन, शास्त्रज्ञानानुसारेण सम्पाद्यमानं हि अभीष्टं शोभते।

४। नष्टचर्य्यायां—नष्टानां दुष्टानां चौरादीनां चर्य्या ढूंढ़न गूढ़दर्शनम्।

५। प्रेक्षणिका—सन्ध्याकालिकं प्रतिमाप्रदर्शनम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हंसा: सर्व्वत्र सिता: शिखण्डिन: सदा चित्रिताङ्गरुहा: ।
सर्व्वत्र जन्ममरणं सर्व्वत्र विभोगिनो भोगा: ॥

इमां गाथां श्रुत्वा विद्याधरो निजमनसि चिन्तयामास । त्रयाणां पदानां अर्थः प्रत्यक्षं दृश्यते। अस्मिन् जीवलोके हंसाः सर्वत्र श्वेताः, मयूराः चित्रितरोमराजयः; जन्ममृत्यू सर्वत्र परं एतत् वचनमात्रं न पुनः प्रत्यक्षं, यत् भोगिनां सर्वत्र भोगा भवन्ति। एतत् अलीकम्। अहं भोगवान् वर्त्ते, यदि एवंविधा भोगा मम विदेशेऽपि भवन्ति, तदा एतत् सत्यं वचः। इति चिन्तयित्वा निजमन्त्रिणम् आकार्य्य तेन सह मन्त्रयित्वा श्रीताम्रचूड़नगरे गतो योजनशतप्रान्ते । नगरगतेन राज्ञा चिन्तितं, मनोज्ञवेशधारी रूपवान् पुरुषः सर्वत्र गौरवं लभते। ततः कारणात् विनष्टदेहो बभूव। प्रस्रवन्नयनयुगलः विनष्टनासिकः प्रनष्टौष्ठपुटः, किं बहुना अतीव कुरूपः विलोकितुमशक्यो जातः ।

इतश्च ताम्रचूड़ो राजा सप्तभूमिकप्रासादे उपविष्टो नगररमणीयतां विलोकयति। तत्र निजसमीपे सेवाकरणार्थं सामन्तप्रमुखसभ्येषु उपविष्टेषु निजराज्यैश्वर्य्येण गर्व्वितो राजा एवं वदति, हे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सभ्याः! कस्य प्रसादेन यूयमीदृशीं सम्पदं विलसथ (१)। तैश्छन्दानुवृत्त्या राज्ञोऽग्रे उक्तं, राजन्! तव प्रसादात् सर्वमेतत् विजृम्भते। अथ राजपुत्री सत्यमञ्जरी सामन्तादीनां तेषाम् इति वचः श्रुत्वा ईषत् हसित्वा मौनेन स्थिता। राज्ञा हास्यकारणं पुत्री पृष्टा, वत्से! किमेतत्? सा प्राह, तात! अमीभिस्तव सेवकैः अलीकम् उक्तम्, अतो मया हसितम्। राजा प्राह, वत्से! किम् अलीकम्? तया उक्तम् अमी तव प्रसादात् इति कथयन्ति, तत् असत्यम्। राज्ञा पुत्री पृष्टा, वत्से! तर्हि किं सत्यम्? तया उक्तं, सर्वः स्वकर्म्मणा वर्त्तते जनः। राजा सभामध्ये पुत्र्या इति वचः श्रुत्वा चटितः। ततो मन्त्रिण आकार्य्य एवं वदति, रे रे कश्चित् दरिद्रं कुष्ठिनं व्याधिपीड़ितं महादीनं नरं पुत्रीयोग्यं वरम् आनयत, यथा इयं सत्यमञ्जरी तस्मै दीयते, तथा स्वकृतकर्म्मफलं प्राप्नोति। इति राज्ञो वचः श्रुत्वा सर्वेऽपि नगरमध्ये तादृशं नरं विलोकयन्ति। अत्रान्तरे तस्या माता लोकमुखात् इति श्रुत्वा

१। विलसथ—उपभुङ्‌ग्ध्वं ; enjoy.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सभामध्ये समागता। सत्यमञ्जरीं प्रति एवं वदति, वत्से! त्वया राज्ञोऽग्रे किम् उक्तम्? पुत्री प्राह, मया अलीकं न उक्तम्, यतः सर्वोऽपि निजंकर्म्म-फलं भुनक्ति। माता प्राह, वत्से! अद्यापि किञ्चि-दपि न विनष्टम् (१)। राज्ञो वचनं मानय। पुत्री प्राह, प्रलयेऽपि अलीकं न वच्मि।

अथ तैः राजसेवकैर्नगरमध्ये परिभ्रमद्भिश्चतुष्पथ-मध्ये स एव कुष्ठिरूपधारी पुमान् दृष्टः। तैः परस्परम् इत्युक्तम्। यादृशो दैवेन आदिष्टः अयन्तादृशएव। एतस्मात् अपरः कोऽपि दुःखी न जायते। तत एनं गृहीत्वा यास्यामो राजसमीपे। इति विचार्य्य उक्तं तैः, भो कुष्ठिन्! उत्तिष्ठ राजा त्वां निजकन्यापरि-ग्रहाय आकारयति। ततः तेन कुष्ठिना उक्तम् अहं अग्रेऽपि दैवेन हसितः, भवतां नहि युक्तं मया सह हास्यं कर्त्तुम्। किं राजपुत्रीयोग्योऽपरः कोऽपि वरो नास्ति? राजपुरुषैरुक्तं, भो! उत्तिष्ठ, वयं राजादेशकारिणः। परन्तु एनम् अर्थम् अस्माकं

१। राजकोपस्य फलं अद्यापि नानुभूतम्, अतः अद्यापि किञ्चिदपि ते सुखस्वाच्छन्द्यं न विनष्टं जातम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वामी वेत्ति, वयं न विद्मः। एवम् उक्त्वा तैः सर्व्वै-रुत्थाप्य नीतो राजसमीपे। ततो मन्त्रिभिः करान् संयोज्य (१) राजा विज्ञप्तः, स्वामिन्! भवताम् आदेशेन अयं नरः समानीतः। ततो राज्ञा निज-पुत्री तस्मै कुष्ठिने प्रदत्ता। ततः कुष्ठी राजानं प्रति प्राह, स्वामिन्! अज्ञातकुलस्य व्याधितस्य नरस्य पुत्रीं दातु' न युज्यते (२)। अन्यच्च ममापि एनां परिणेतु' न युज्यते (२)। किं राजहंस्या सह पाणि-ग्रहणं कर्त्तुं काकस्य युज्यते (२)? एवमनिच्छन्नपि कुष्ठी राज्ञा निजपुत्रीं परिणाय्य विसर्जितः। सत्य-मञ्जरी मातापित्रोश्चरणान् अभिवन्द्य हृष्टमुख-कमला राजभवनात् निःसृता। यावत् निजभर्त्रा सह याति सत्यमञ्जरी, तावत् कुष्ठी राजमार्गे पतित्वा स्थितः। निजप्रियां प्रति कुष्ठी प्राह, देवि! अस्मात् स्थानात् पदमपि चलितु' न शक्नोमि। ततः

१। करान् संयोज्य—अञ्जलिपुटं कृत्वा।

२। अत्र तव, मम, काकस्य च इत्यत्र सम्बन्धे षष्ठी, युज्यते इति कर्त्तरि लट्। दातु' परिणेतु' कर्त्तुमिति च युज्यते इत्यस्य कर्त्तृ पदमिति कथञ्चित् व्याख्येयम्। Properly speaking these are instances of Sanskrit impersonal verbs, not recognized in Sanskrit grammar.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सत्यमञ्जरी भणति, नाथ! कातरो मा भव, मम पृष्ठप्रदेशमारोह, यथा समीहितं स्थानं प्रापयामि। तस्याः निजाभिप्रायं ज्ञात्वा कुष्ठी प्राह, अद्य अत्रैव तिष्ठावः, कल्ये(१)यत् युक्तं तत् करिष्यावः। अस्मिन् प्रस्तावे महाजनवर्गो राजधवलगृहे (२) गत्वा राजानं विज्ञापयति। स्वामिन्! प्रसादं कुरु, यथा तव जामातुः एकं तृणकुटीरकं कृत्वा अर्पयामो वयम्। राज्ञा प्रसादः कृतः। ततो महाजनवर्गेण तयोः कुटीरकं कृत्वा अर्पितम्। तस्मिन् कुटीरके निजभार्य्यासहितः कुष्ठी स्थितः। अत्रान्तरे तेन कुष्ठिना निजहृदये चिन्तितम्, एषा मम भार्य्या मयि रक्ता, किंवा अरक्ता तत् अहम् अस्या राग-विरागौ विलोकयिष्यामि। ततो वक्तुम् आरभत, देवि! सावधानहृदया एकं मम वचनं शृणु। मम संसर्गात् स्तोककालेनैव त्वमपि कुष्ठिनी भविष्यसि, यतः एते रोगाः सञ्चारिणो भवन्ति। पामा (३) क्षयः कुष्ठं कामलः नेत्ररोगः, एते पञ्च रोगाः संस-

---

१। कल्ये—प्रत्यूषे।

२। राजधवलगृहे—राज्ञः सौधे, धवलनामके गृहविशेषे वा।

३। पामा—विचर्चिका खौस पाचड़ा इति भाषा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्गात् जायन्ते। कुष्ठप्रभावात् तव शरीरं विनाशं यास्यति, विरुद्धद्रव्ययोगात् यथा आम्रफलं विनाशं याति। यावत् निजजननीमातुलानां शरणं (२) व्रज। मम कृते किं मरिष्यसि? इत्युक्त्वा मौनमाधाय कुष्ठी स्थितः। ततः सत्यमञ्जरी भणति, नाथ! ईदृशम् असमञ्जसं किं प्रलपसि? सुकुलोत्पन्नाः प्रलयेऽपि ईदृक् कर्म्म न समाचरन्ति। आर्य्यपुत्र! एतत् किं न श्रुतं, उत्तमनारीणां भर्त्तार एव देवता भवन्ति? हे नाथ! तावत् मम अग्रे एवंविधं नीचजनसदृशं वाक्यं न भाषितव्यम्। तेन विद्याधरेण निजपत्न्या अनुरागं ज्ञात्वा बहुरूपकारिणी (३) देवता स्मृता। स्वामिनि बहुरूपकारिणि देवते! साम्प्रतं जात्यसुवर्णमयं(४)प्रासादं कुरु। ततो देवतया क्षणार्द्धेन प्रासादो निर्मितः। स कीदृशः? पञ्चवर्णरत्ननिर्मितं यस्य भूपीठं (१)

२। शरणं—गृहम्।

३। बहुरूपकारिणी—बहुविधं रूपं रूपयुक्तं वस्तु हर्म्यादिकं करोति तथोक्ता।

४। जात्यं—जातौ भवं कुलीनम्, श्रेष्ठं कान्तमिति यावत्।

१। भूपीठं—भूमेरधस्तात् कियद्दूरपर्य्यन्तं यत् मूलं स्थाप्यते, यस्योपरि गृहं निर्म्मीयते, तत् भूपीठम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शोभते, निर्मलस्फाटिकमणिरचिता यस्य भित्तयो राजन्ते, यस्मिन् च प्रासादे काञ्चनस्तम्भेषु रचिताः सहस्रसंख्या रत्नपुत्तलिका वर्त्तन्ते। तस्य मध्यगृहे सुवर्णसिंहासनम्। उपरि स्थितं देवकुमारसमान-रूपम् आत्मानं पश्यति कुष्ठी। तं प्रासादं दृष्ट्वा नगरलोको विस्मितः। किं स्वर्गादवतीर्णं देव-विमानम्? एष प्रासादः पूर्वं न दृष्टः, पुस्तकेषु न श्रुतः। सर्वथा महाश्चर्य्यकारी अयं प्रासादः।

इतश्च ताम्रचूडेन राज्ञा स वृत्तान्तः श्रुतः। श्रुत्वा महाकौतुकपूर्णहृदयः विलोकनार्थं चचाल राजा। यावत् निजपरिवारेण सहितो राजा तस्मिन् प्रासादे आरोहति, तावत् स्फाटिक-भित्तिरचनात् न लभते मार्गं, सर्व्वं तेजोमयमिव दृश्यते। ततो राज्ञा महता कष्टेन लब्धो मार्गः। राजा तस्य प्रासादस्य शिखरे सिंहासनोपविष्टं तं दिव्यरूपं दिव्याभरणधारिणं विद्याधरं ददर्श। तथाविधं दृष्ट्वा राज्ञो मनसि विस्मयो बभूव।

इतश्च तस्य विद्याधरस्य अमात्यो बुद्धिसागर-नामा विद्याधरसुभटसहितस्तत्र आगतः। बुद्धि-सागरो राजानं प्रणम्य उपविष्टः। सर्वे विद्याधर-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुभटा यथास्थानम् उपविष्टाः। अत्रान्तरे विद्याधरैर्नाटकं प्रारब्धं। तद्दृष्ट्वा सर्वोऽपि नगरनिवासी लोको विस्मितः, ताम्रचूड़ोऽपि विस्मयं गतः। सर्वे सकौतुकम् एवं कथयन्ति। पूर्वं कुष्ठी साम्प्रतम् एवंविधरूपधरः कोऽयम्? किम् इन्द्रः, किंवा कन्दर्पः, किंवा नारायणः, किंवा बलदेवः, किंवा धनदनामा यक्षः? यावत् ताम्रचूड़प्रमुखः सर्वोऽपि लोकः एवं वितर्कयति, तावत् एकेन विद्याधरसुभटेन एषा गाथा पठिता——

जय वैताढ्यनगाधिप! जय बहुविद्याविजितप्रतिपक्ष!
जय प्रणयिजनवत्सल! जय जय श्रीकनकरथभूप!

एतां गाथां श्रुत्वा लोकैरिति चिन्तितं, निश्चितमयं विद्याधरेन्द्रः, केनापि कारणेन स्वरूपं विहाय कुष्ठी इह आगतः। तावत् एषा सत्यमञ्जरी राजपुत्री धन्या कृतपुण्या, यया विद्याधरस्वामी अयं भर्त्ता प्राप्तः। अथ कनकरथेन राज्ञा स्वयम् उत्थाय ताम्रचूड़स्य राजासनं दापितम्। अत्रान्तरे राजपत्नी सत्यमञ्जरीमाता धारिणीनाम्नी सा तत्र आगता। सत्यमञ्जरी ताम्रचूड़ं स्वपितरं प्रणम्य ऊचे, तात! त्वया कुत्सितशरीराय कुष्ठिने अहं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दृत्ता, मम भाग्यप्रभावात् सोऽपि अमरकुमारोपमो जातः। तत् तात! तव वचनं सत्यं, किंवा मम वचः सत्यम्? राज्ञा भणितं, पुत्रि! तव कथितं सत्यं, नास्ति सन्देहः। इयन्तं कालं यावत् अहम् आत्मकुग्रहेण (१) विड़म्बितः। अद्य मे ज्ञातं सर्वस्य स्वकर्म्म प्रमाणम्। ततश्च ताम्रचूड़ेन राज्ञा विद्याधरः प्रत्युक्तः, स्वामिन्! यूयं केन कौतुकेन एवंविधं रूपं विधाय अत्रागताः। ततो विद्याधरेण आमूलचूलं (२) निजवृत्तं राज्ञोऽग्रे कथितम्। राजा तत् श्रुत्वा हृष्टो बभूव। ततो विद्याधरो राजानं प्रति प्राह, राजन्! अनुजानीत (३) मां, यथा निजपुरं गच्छामि। ततो यौतुकदानैस्तं विद्याधरेन्द्रं सन्तोष्य राज्ञा स्वपुत्री उक्ता, वत्से! समयान्तरे पुनर्दर्शनं दद्याः। इत्युक्त्वा तौ विसर्ज्जितौ स्वनगरम्प्रति।

१। आत्मकुग्रहेण—आत्मनः कुग्रहः अशुभग्रहः मङ्गलादिकः तेन। यद्वा स्वस्य कुग्रहेण दुष्टेन ग्रहेण आग्रहेण।

२। आमूलचूलं—मूलञ्च चूला च मूलचूले तत्पर्यन्तं आमूलचूलम्। चूला—चूड़ा, डलयोर्नास्ति भेदः।

३। अनुजानीत—गौरवात् बहुत्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेतालपञ्चविंशतिः ।

उपक्रमणिका ।

इह हि महीमण्डले नरपतितिलकः पुरन्दर इव सर्व्वाङ्गसुन्दरो (१) राजचक्रवर्त्ती (२) श्रीमान् विक्रमकेशरी बभूव । स खलु नरपतिरनेकसामन्तामात्य (३) परिवृतोऽनिर्व्वचनीयं राज्यसुखमनुभवन् कालं नयति । तस्याऽधिकारे अष्टसिद्धिकामः (४) चान्तिशीलो निवसति ।

---

१ । सर्व्वाङ्गसुन्दरः—सर्व्वेषु अङ्गेषु स्वाम्यमात्यादिषु सुन्दरः समीचीनः । अङ्गानि यथा—स्वामी—the sovereign ; अमात्याः—the ministry ; सुहृदः— the allies ; कोषं—the exchequer ; राष्ट्रं—the territory ; दुर्गाणि—the fortresses ; बलानि—the army. यद्वा सर्व्वाङ्गसुन्दरः सर्व्वावयवानवद्यः चारुदर्शनः । शरीरसौन्दर्य्ये वासवो न उपमानत्वेन प्रसिद्धः इति चिन्तनीयम् ।

२ । राजचक्रवर्त्ती—राज्ञां चक्रं द्वादशराजमण्डलं तस्मिन् वर्त्तते नायकतया विद्यते इति ।

३ । सामन्ताः—समन्तात् भवाः करदा राजानः chiefs who owe allegiance and military service to the lord paramount.

४ । अष्टसिद्धिकामः—अष्टौ सिद्धीः कामयते यः स । ताः खलु,—

अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पं० प्रेम दत्त शास्त्री
(मुहल्ला) राजाद २०२३३४
बुलन्दशहर (उ० प्र०)

अथैकदा अभ्युदिते भगवति मरीचिमालिनि तस्य नरपतेर्मुखप्रक्षालनसमये पानीयोपढौकयितृ(१) पुरुषेण विचित्रं विल्वफलमेकं क्षान्तिशीलो नाम कापालिकः(२) राज्ञे प्रदापयतिस्म। ततो नरपतिस्तदादाय सुप्रशस्तं प्रत्यूषकाललब्धं फलमिदमभिनन्द्य तस्मिन्नेव राजपुरुषे अवस्थापयति स्म।

एवं पूर्णेषु द्वादशसु वर्षेषु एकदा तद्दीयमानं विल्वफलं राज्ञः करकमलान्निपत्य प्राङ्गणे भग्नं खण्डखण्डं बभूव। ततो नरपतिरपि तन्मध्यात् अमूल्यानि इतस्ततो गलितानि पञ्चरत्नान्यवलोक्य परां प्रीतिमवाप व्याजहार च, अये किमेतदाश्चर्य्यम्! मदीयरत्नभाण्डारभवने प्रयत्नेनान्विष्यमाणान्येतादृशानि रत्नानि न दृश्यन्ते! इत्यालोच्य विस्मितस्तं पानीयोपनायकं पप्रच्छ, अरे पानीयोपनायक! यत् त्वं श्रीफलं नित्यमेव ददासि, तत् कुतः

१। पानीयोपढौकयितृपुरुषेण—पानीयस्य जलस्य उपढौकयिता उपनेता यः पुरुषस्तेन।

२। कापालिकः—a worshiper of Siva of the left-hand order (वामाचारी), characterized by carrying skulls of men as ornaments and by eating and drinking from them. कपालं = a Skull.

पं० प्रेम दत्त शास्त्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राप्नोषि ? इति पृष्टः स कथयति, देव ! क्षान्तिशीलः कापालिको भवत्प्रीतये प्रत्यहं मम हस्ते श्रीफलं ददाति । ततो राज्ञा भणितं, पुरान्यस्तविल्वफलानि सर्वाणि तान्यानीयन्ताम् । ततो राजादेशं शिरसि निधाय राजपुरुषोऽसौ भाण्डारगृहात् तान्येव फलान्यानीय राज्ञे प्रायच्छत् । राजा च सकलफलानि भङ्क्त्वा अनेकरत्नानि ददर्श, जगाद च, अये ! मदीयभाण्डारे बहुमूल्यानि नह्येतादृशानि रत्नानि विद्यन्ते । अरे ! विल्वफलदातारं पुरुषं सम्प्रति ज्ञातुमिच्छामि । पुरुषो यदादिशति देव इति निगद्य वहिर्द्वारमुपेत्य तं कापालिकमादाय आगत्य राजानं व्यजिज्ञपत्, देव ! विल्वफलदातासौ कापालिकः समानीतो द्वारि विद्यते । राजा आह, प्रवेशय तम् ।

ततस्तेनानीतः कापालिको राजदर्शनात् प्रमोदरभसं (१) सम्प्राप्य दक्षिणपाणिमुत्तोल्य राजानमाशीर्वचनशतैः प्रीणयाञ्चकार । ततो राज्ञा कापालिकोऽभिहितः, भोः कापालिक ! किमर्थ-

---

१ । प्रमोदरभसं – हर्षावेगं, transports of joy.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्माकं चिरकालं विल्वफलव्याजेनामूल्यानि रत्नान्येतानि प्रदत्तानि? महासत्त्व! भवतः किमभीप्सितमस्ति तद्वद। ततः कापालिकेनोक्तं, महाराज! यदि मयि देशान्तरिणि(१)अनुग्रहोऽस्ति तदा निभृतं यत्किञ्चित् निगदामि तत् शृणोतु। ततो राज्ञा समालोकितः परिजनो दूरमपससार।

ततोऽसौ कापालिको वदति, राजन्! क्षान्तिशीलनामाहं महायोगी, इमां पृथ्वीं समस्तां प्रदक्षिणीकुर्वाणो मृतकसिद्धेः (२) उत्तरसाधकं (३) महासात्त्विकं (४) प्रवीणं पुरुषविशेषमन्विष्यन् कुत्रापि न लेभे। तदत्रैवागत्य सकलगुणसम्पन्नो महासत्त्वो महाप्रवीणो भवान् दृष्टः। तत् यदि

१। देशान्तरिणि—अन्योदेशः देशान्तरं तदस्य अस्तीति देशान्तरी तस्मिन्, विदेशिनि।

२। मृतकसिद्धेः—मृतकेन शवेन या सिद्धिस्तस्याः। शवमारुह्य जपादिकं कृत्वा भूतादिविभीषिकामवगणय्य साधकः मन्त्रसाधनं करोति नायिकादिसिद्धिं तालवेतालादिसिद्धिं अणिमाद्यष्टसिद्धीर्वा लभते इति तान्त्रिकाणामागमः।

३। उत्तरसाधकं—स्वयमारब्धस्य कार्य्यस्य उत्तरं परवर्त्ति तदनुकूलं किञ्चित् कर्म्म यः साधयति स उत्तरसाधकः कार्य्यसहायः।

४। महासात्त्विकं—महासाहससम्पन्नं; निःस्वार्थधर्म्मनिष्ठानां प्रधानं वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मदीये वचसि अवधानं करोति भवान्, तदा स्वकीयाभिलषितं निवेदयामि। राज्ञोक्तं, समभिधेहि, यत्ते अभिमतं तत् सम्पादयिष्यामि। श्रुत्वा कापालिको जगाद, देव! मृतकवेतालसिद्धिसाधनाय भवन्तमनुवर्त्तयामि। तद्यदि मया समुदीर्य्यमाणवचनं भवानङ्गीकरोति, तदा मदीया सिद्धिर्महती भवति नान्यथा। इति श्रुत्वा महापुरुषेण नृपतिनाङ्गीकारपरायणेनाभूयत। ततः स राजानमब्रवीत्, यदि भवान् ममोत्तरसाधको भवति तदाहं सिद्धिं साधयिष्ये। तदर्थं भाद्रकृष्णचतुर्दश्यां दक्षिणश्मशानायतने (१) मया स्थातव्यम्। तस्मिन् दिवसे प्रदोषसमये परेणानुपलक्षितशरीरेण भवता मत्समीपमागन्तव्यम्। तदा तस्मिन्नेव समये स्वाभिमतविशेषं भवते समभिधास्येऽहम्। श्रुत्वैतत् राज्ञोक्तं, भवतु, गच्छ स्वाभिमतं साधय। तत्रैवाहं गमिष्यामि, करिष्ये तवाभिमतसिद्धिम्। इत्युक्त्वा राज्ञा विसर्जितस्तदा कापालिकः स्वस्थानं चलितः।

ततः समायाते भाद्रे मासि कृष्णचतुर्दश्यां राज-

१। दक्षिणस्यां दिशि स्थिते श्मशाने यत् आयतनं देवमन्दिरं तस्मिन्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वारि समागत्य राजपुरुषमुखेन कापालिकेन विज्ञापितो राजा। ततः स देवान् पितॄनभ्यर्च्य दिनकृत्यं(१) समाप्य प्रदोषसमये परेषामनुपलक्षितो वहिर्निःससार, कृपाणपाणिरेकचरो (२) दक्षिणश्मशानं कापालिकसमीपमाजगाम च। राजा वदति, कापालिक ! अयमहमागतोऽस्मि त्वाभिमतं वद। ततः कापालिको राजानमालोक्य हर्षोत्फुल्लनयनः तं प्रशशंस। भो महाराज ! त्वमेव परमसात्त्विको महापुरुषः, यत् कृष्णचतुर्दश्यां भाद्रे मासि चक्रवर्त्ती भूत्वा कृपाणपाणिमात्र(३) द्वितीयो घोरान्धकारे रात्रौ मत्समीपं श्मशानायतनं समायातोऽसि। सफलं ते जन्म संसारेऽस्मिन्।

श्रुत्वा राजा सविनयमुवाच, भोः कापालिक ! ब्रूहि यदभिमतं भवतः, मया श्रवणकुतूहलेन समायातं, का मे भीतिः। तदा क्षान्तिशीलेनोक्तं, भो महाराज ! मया मृतकसिद्धिः साधयितव्या।

१। दिनकृत्य—तस्मिन् दिने कर्त्तव्यं राजकार्य्यजातम्।

२। एकचरः—एकेन केवलेन आत्मना चरतीति एकचरः; द्वितीयेन अननुगम्यमानः।

३। कृपाणयुक्तः पाणिः कृपाणपाणिः स एव द्वितीयो यस्य।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्र भवता ममोत्तरसाधकेन भवितव्यम् । एतेन मम सिद्धिर्भविष्यति । साधितायान्तु सिद्धौ भवतामपि (१) सिद्धिर्भविष्यति । तत् श्रुत्वा राज्ञा भणितं, कापालिक! मम सिद्धिर्भवतु न वा त्वमात्मनः कार्य्यं साधय, मया किन्ते कर्त्तव्यं तद्वद । कापालिकेनोक्तं, भो महाराज ! घर्घरा(२)तरङ्गिणीतीरे उत्तरस्यां दिशि शिंशपातरोरुत्तरशाखायां लम्बमानोऽस्ति मृतः पुरुषो योऽवतिष्ठते, तं बहुमायाभाषिणं (३) पातयित्वा स्कन्धे कृत्वा सत्वरं समादाय मौनेन गच्छतु भवान् । समायाते भवति अत्र नानाविध-पूजोपकरणरचितमण्डले (४) तं शवं स्थापयित्वा देवार्च्चनं विधाय महामन्त्रं संजप्य सिद्धिर्मया साधयितव्या । भवतामभिमतञ्च भविष्यति ।

श्रुत्वैतत् राजा तेनैव प्रकारेण तत्र नदीतीरे गत्वा तादृशं शवं ददर्श । स च राजानमवलोक्य

१। गौरवात् बहुत्वम् ।

२। घर्घरा—Identical with the far-famed Sarayú.

३। बह्वी माया तया भाषते यः सः बहुमायाभाषी अलीकभाषी वचनाततपर इत्यर्थः ।

४। नानाविधैः पूजोपकरणैः नैवेद्यादिभिः रचिते सज्जिते मण्डले मण्डलाकारस्थाने ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महाभीतिं प्राप्तवान्। ततो राजा तत्समीपमुपगम्य आकर्षणाय यावत् करं प्रसारयति तावद्वेतालाधिष्ठितः(१)शवस्तद्‌वृक्षशाखायां गत्वा ललाग। ततो राजा विहस्य मृतकमब्रवीत्, अरे मृतक! किमर्थं दूरं पलायसे? पश्य तरुवरमिममारुह्य त्वामहमवतारयिष्यामि। ततोऽपि स मृतकस्तद्भीत्या शाखायाः शाखान्तरं पलायते, विक्रमादित्योऽपि भ्रमति, एकशाखायां (२) धृतवान्। ततो राजा स्वैरं स्वैरं तरुवरमारुह्य कृपाणेन द्विरटिकां (३) कर्त्तयित्वा तरोरधस्तात् मृतकमपातयत्।

ततो मृतकः पतनपीड़ाव्याजेन (४) अत्युच्चैश्चक्रन्द, सविनय (५) काकुवादं राजानमवादीत् च, भो राजन्! किं मया तव वैरमाचरितम्, यतो

१। वेतालेन भूतयोनिविशेषेण अधिष्ठितः आक्रान्तः अधिकृत इति यावत्।

२। एकस्यां कस्याञ्चित् शाखायां, एकशाखायाम्।

३। द्विरटिका दड़ा इति भाषा। a rope.

४। पतनपीड़ाव्याजेन—शवस्य शवाधिष्ठितस्य वेतालस्य वा पतनेन काचिदपि वेदना न जायते, अतः पतनपीड़ाच्छलेन।

५। विनयेन युक्तः काकुवादः कातरोक्तिः विनयकाकुवादः, तेन सह सविनयकाकुवादम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जीवलोकवहिर्भूतं (१) कृपणं कृपापात्रं विजनवन-तरुशाखामात्रावलम्बिनं निरपराधं मां एवं कदर्थ-यसि (२)? पतनपीड़या मेऽस्थीनि जर्ज्जरितानि। श्रुत्वा राजोवाच, भो मृतक! नास्त्यत्र मम दूषणं(३), तवैषा भवितव्यता, मा कातरो भव, त्वामहमवश्यं नेष्यामि। इत्युक्त्वा यावत् राजा तरोः सकाशात् पुनरपि शवं ग्रहीतुं करं प्रसारयति तावत् मृतकः पलाय्य तरोरग्रशाखायां(४) गत्वा लगति।

मृतकोऽयं अनेन प्रकारेण वारपञ्चकं तं कदर्थ-यति। राजा विमृष्य तरुमारुह्य तदग्रशाखायां छिर-टिकां कर्त्तयित्वा मृतकं पातयित्वा तदुपरि झम्पं दत्त्वा पतति। उच्चैः क्रन्दन्तं मृतकमपि स्कन्धे समा-रोप्य सत्वरं कापालिकसमीपं गन्तुमारभते। तदा मृतकदेहवर्त्ती वेतालस्तन्मौनभङ्गं चिकीर्षुः राजान-

---

१। जीवलोकात् प्राणिसमूहात् वहिर्भूतं पृथग्भूतं। यस्य प्राणिनां मध्ये गणना न जायते।

२। कुत्सितः अर्थो यस्य स कदर्थः, तं करोषीति कदर्थयसि, पीड़यसि। कु+अर्थ+णिच्।   ३। दूषणं—दोषः।

४। शाखायाः अग्रं अग्रशाखा। अग्रकेशादिवत् एकदेशिसमासः। शाखायाः अग्रं शाखाग्रमपि भवितुमर्हति। तथाहि वर्त्तमाने एकदेशि-समासस्थले पूर्व्वनिपातस्य कापि नियमना न दृश्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मब्रवीत्, भो राजन् ! यदि त्वयाहं निश्चितं नेतव्य-स्तदा द्वाभ्यां कथाप्रहेलिकया (१) पथि गम्यतां, गमनपरिश्रमो न बाधिष्यते। देव ! कथामहं कथ-यामि तत्र मतिं देहि, किन्तु कथायां प्रश्नोऽस्ति, तस्योत्तरं विज्ञाय न भणसि चेत्, तदा महापातकी भवसि, अविज्ञाते तु पातकं नास्ति।

वेतालपञ्चविंशतिः।

उपसंहारः।

वेतालो वदति, भो राजन् ! अनेन सत्त्वेन (२) प्रज्ञाबलेन च त्वयि प्रीतोऽस्मि। त्वं विजयी भव। किन्तु तव हितं यद्वदामि तत् शृणु। राजोवाच, को भवान् मृतकाधिष्ठितः, केन वा सर्वज्ञता तवाधिष्ठात्री ? तदहं श्रोतुमिच्छामि। श्रुत्वा विहस्य वेतालोऽब्रवीत्, शृणु राजन् ! मम वृत्ता-न्तम्। अहमिह राजधान्यां जात्या तैली गृहस्थः

१। कथायां या प्रहेलिका गूढ़ार्थकः प्रश्नः तया, आख्यायिकान्तः-पातिना गूढ़प्रश्नेन इत्यर्थः।

२। सत्त्वेन—साहसेन, निःस्वार्थधर्म्मानुष्ठानेन वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थितोऽस्मि। एकदा दैवयोगेन मम गृहे ज्ञानी पुरुष एकः समागत्य मिलितः। कतिपयमासान् मदीयायतने मठं कृत्वा मया स्थापितः प्रतिदिनं तस्मै भिक्षा दीयते।

अनन्तरं वर्षाप्रभाते (१) तेन ज्ञानिना देशान्तरं गन्तव्यमिति कृत्वा निभृतमहमेवमुक्तः, भो गृहस्थ! त्वमस्माकमनेकसेवां कृतवान्, तेन त्वयि परितुष्टोऽस्मि। आगच्छ, ते ज्ञानसिद्धिं(२)कथयामि। इति कथयित्वा कृपया मह्यं सिद्धिज्ञानं कथयामास। पुनः सत्यमिदं कारयाञ्चक्रे। मम पूर्व्वसेवकः पुत्रप्रतिमो वर्षाभ्यन्तरे ममान्वेषणे समागमिष्यति। तस्मै ज्ञानं कथयिष्यामीति स्वीकृत्य तिष्ठामि। स तु मम गमनसमये समागत्य न मिलितः समीक्ष्यते। त्वमस्माकं सत्यमनुपालयन् भ्रमणोद्देशेनागताय समायाताय तस्मै ज्ञानमिदं विज्ञापयिष्यसि। स च तव भ्राता, तस्मै

१। वर्षाणां प्रभातं अवसानं तस्मिन्। प्रभातपदं दिनमुखे रूढं, तथापि रात्रिप्रभातवदत्र अवसानं बोधयति।

२। ज्ञानसिद्धिं—ज्ञानेन मन्त्रज्ञानेन सिद्धिः साधनप्रकारः ताम्। सिद्धिज्ञानं—सिद्धीनां वेतालादिसिद्धीनां अष्टसिद्धीनां वा ज्ञानं तदनुकूलं मन्त्ररहस्यज्ञानं इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कपटं न करिष्यसि। यद्येवं न करिष्यसि तदा तव विपरीतमरणं भविष्यति। सुदृढ़मिति (१) सत्यं कारयित्वा गुरुर्मामुपदिश्य देशान्तरं चचाल।

अतएव निगद्यते त्वं मदीयोपदेशेऽवहेलां न करिष्यसि। इति प्रतिपाद्य (२)वेतालो दृष्टिं चकार। ततो राजा विहस्य वेतालं पुनराह, भो वेताल! निगद्यतां तत् वृत्तम्। ततो वेतालो हसित्वा पुनराह, शृणु राजन्! ज्ञानिनि मम गुरौ गते देशान्तरं तच्छिष्यः समागत्य मम गृहे मिलितः मामुवाचः। योऽसौ ज्ञानी अत्र स्थितः स तु क्व? तदा मयोक्तं स तु देशान्तरं गतः। मां प्रति किं विधानं कृत्वा गतः? तदा मयोक्तं न किञ्चित्। श्रुत्वा स तु हा हा हतोऽस्मीति कृत्वा, बहु विलप्य निराशो भूत्वा जगाम। गते तस्मिन् ततः प्रभृति मया गुरूपदेशं ध्यायता सुखेन गृहवासः क्रियते। गुरुवचनमन्यथा कुर्वाणे सापराधे मयि महती शङ्का

१। सुदृढ़मिति—सुदृढ़ं सनिर्बन्धं इति इत्थं सत्यं शपथं कारयित्वा मां इति शेषः।

२। प्रतिपाद्य—प्रस्तुत्य, पृष्ट्वा इत्यर्थः। दृष्टिं चकार] राजानं प्रति दृष्टिं ससर्ज।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बाधते। ततो दैवयोगेन राजभवने चौराः सन्धिं कृत्वा अनेकसामग्रीः अपहरन्ति स्म, अश्वशाला-याश्च घोटकमेकं गृहीत्वा मम द्वारि बद्धा विहाय पलायिताः। प्रभाते राजा चौर्य्यं दृष्ट्वा दुःसाधु-मानीय (१) समादिदेश, अरे दुःसाधो! मदीय-भाण्डागारे अपहृतिर्भूता, घोटकोऽश्वशालाया नीतोऽस्ति। ज्ञायतामस्य निर्णयः। सुदृढ़मपि ज्ञात्वा यदि चौरं समानीय न ददासि, तदा त्वामेव सपरिवारमेकत्र कर्त्तित्वा प्रोथयिष्यामि। इति श्रुत्वा दुःसाधुना गृहे गृहे चौरान्वेषणं कुर्व्वता मम द्वारि घोटकं प्राप्य मामपि धृत्वा राजनि विज्ञापितम्। श्रुत्वा राजा सकोपः समादिदेश, एनं शूले निधेहि। अथ तेनैव राजादेशं शिरसि निधाय ग्रामोपान्ते समानीयाहं तैरेव दण्डपाशिकैः (२) शूले समा-रोपितः। शूले स्थित्वा योगबलेन प्राणान् वाहयित्वा सम्मुखस्थितघर्घरातीरवर्त्तिनि वृक्षे वेतालाधिष्ठितो भूत्वा तिष्ठामि। ज्ञानबलेन सर्वज्ञता मयि समुत्पन्ना।

१। दुःसाधुं – तन्नामकं दण्डनायकम्।

२। दण्डपाशिकैः—दण्डपाशान्वितैः पुरुषैः। ये हि राजपुरुषाः शान्तिरक्षाधिकृताः अपराधिनः पाशैः बद्धा दण्डैस्ताड़यन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स तु मम गुरुशिष्यो देशे देशे परिभ्रम्य हिङ्गुला-देवीसमीपवर्त्तिनि देशान्तरिणां विश्राममण्डपे(१) गुरुं ददर्श। दृष्ट्वा सर्वं वृत्तान्तं गुरवे निवेदितवान्। श्रुत्वा व्यथितेन गुरुणा प्रोक्तम्; सतु गृहाश्रमी तैलिको मदीयज्ञानम् अपहरन् चौरः संवृत्तः। तेन तस्य यथोचितफलं भूतम्। स तु ज्ञानबलेन वेताला-धिष्ठितो भूत्वा शिंशपातरोः शाखायां मङ्गलकोटि-राजधान्यां घर्घरातीरे लम्बमानोऽवतिष्ठते। त्वयि परितुष्टोऽस्मि, त्वमस्मदीयः पुत्रः, मम प्रसादेन त्वयि ऋद्धि(२)र्भविष्यति। ममोपदेशेन वरेण च सिद्धिस्ते भविता। ऋद्धिसिद्धिभ्यां त्वमेव खेचरो भूत्वा सुखेन परिभ्रम। इत्युक्त्वा कुणपो(३)विरराम। श्रुत्वा राजा हर्षगद्गदवचाः पुनरिदमाह, अरे कुणप! यदि प्रसन्नोऽसि तदा विशेषेण कथां सकलां मे कथय, समुपदिश किमहं करिष्यामि। ततो वेतालः पुनरुवाच।

शृणु रे महाराज! त्वं देवरूपो(४)मानुषविग्रहः।

१। देशान्तरिणां—विदेशिनां पान्थानां, विश्राममण्डपे पथश्रान्त्यप-नयनार्थम् आश्रितशालायां "सराइ" इति भाषा।

२। ऋद्धिः ऐश्वर्य्यं, पार्थिवसम्पत्तिः। ३। कुणपः—शवः।

४। देवरूपो—देवस्वरूपः, केवलं वाह्याकारेणैव मानुषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूर्वसञ्चितानि महान्ति तपांसि ते सन्ति। तेन भाग्योदयेन त्वमत्रानीतोऽसि। शृणु कथयामि। ततः प्रसन्नेन गुरुणायं पुनरुपदिष्टः। "त्वमितो महासत्वस्य महाराजस्य श्रीविक्रमादित्यस्य राजधानीं गच्छ। तस्य राज्ञ उपढौकनाय बिल्वफलाभ्यन्तरे रत्नानि विनिवेश्य दिनकतिपयं योजयित्वा राजानं वशीकुरु। तं महासत्वं सहायं कृत्वा प्रेताधिष्ठितं ज्ञानिनं दक्षिणश्मशाने नय। ततः मण्डलं रचयित्वा मण्डलपूजां विधाय राजानं देव्यै बलिं देहि। भवद्वयस्य मस्तके पादद्वयं दत्वा निगदिष्यसि, देवि! गृहाण मम बलिं, ऋद्धिसिद्धी मे भवताम्। इति निगदितवति त्वयि देव्याः प्रसादो भविष्यति।" इति गुरूपदेशं प्राप्य स तु क्षान्तिशीलः समागत्य कपटभावेन भवन्तं वशीकृत्य भवद्दशेन मामेवं गृहीत्वा त्वामपि कर्त्तित्वा सिद्धिं साधयिष्यति। सर्वमिदम् रहस्यं ते ज्ञापितं। अधुना यदुचितं तद्विधीयतामित्युक्त्वा स विरराम।

ततो राजा समुत्फुल्लनयनो हर्षाश्रुणा पूर्णलोचनः पुनर्व्वेतालमाह, भोः सर्व्वज्ञ! महामते! ब्रूहि, किमिदानीं करिष्ये। नृपवचनं श्रुत्वा वेतालः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुनराह। तव महासत्वतयाहं प्रीतोऽस्मि। तेन त्वयि रहस्यं ज्ञापयामि, त्वमिदानीं मामेव नीत्वा तत्सकाशं गच्छ। गते त्वयि स कापालिकः त्वां सहर्षं निगदिष्यति, "भो महाराज! समायतोऽसि? द्रुतं स्नानं कुरु। देवताराधनं समाचर। त्वया सह देवतापूजां विधाय यथोभयोरेव सिद्धिर्भवति तथा कर्त्तव्यम्।" ततस्तद्वचनेन देव्याः कुण्डे स्नात्वा तत्-समीपमुपगतं त्वां वदिष्यति, "देवतां पूजयाग्रे त्वं, पश्चादहं पूजयिष्यामि।" कृते देवताराधने तदा स वदिष्यति, "देवतां प्रदक्षिणीकृत्य दण्डप्रणामं (१) कुरु।" तदा त्वं वदिष्यसि, "नरपतिरहं दण्डधारी सिंहासनस्थितः। मम पादपद्मं मण्डलिका (२) राजानः प्रणमन्ति। स्नातकब्राह्मणो (३) मन्निमित्तं देवताराधनं पितृक्रियां दिनकृत्यञ्च(४) कुरुते। तेन

१। दण्डप्रणामं—भूमौ दण्डवत् पतित्वा साष्टाङ्गप्रणामम्।

२। मण्डलिका राजानः—द्वादशराजमण्डलान्तःपातिनः समग्राः नरपतयः।

३। स्नातकब्राह्मणः—यो हि गुरुगृहात् वेदमधीत्य, ब्रह्मचर्य्यव्रतं समाप्य, गार्हस्थ्याश्रममवलम्बितुमनुमतः स स्नातकः।

४। दिनकृत्यं—दिवसोचितं सन्ध्यावन्दनेष्टदेवतापूजादि नित्यकर्म्म।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मम नित्यक्रियाकरणं सुसिद्धं भवति। मम हस्ते राजदण्डो विद्यते। तेन देवताराधनदण्डप्रणामादिषु ममाधिकारो नास्ति। यदीदानीं भवती विधानेन(१)दण्डप्रणामः कर्त्तव्यः, तदा शिक्षय केन प्रकारेण दण्डप्रणामः कर्त्तव्यः। दृष्ट्वा तेनैव प्रकारेण करिष्यामि।" तव वचनमिदमवगम्य, यदा स तु क्षान्तिशीलो देवताया दण्डप्रणामं कुर्व्वन् कायप्रपातं (२) कुरुते ततक्षणात् त्वमपि खड्गेन शिरश्छित्त्वा तन्मस्तके मृतकस्य मस्तके च पादद्वयं दत्त्वा मुकुलाकारं शिरस्यञ्जलिं निवेश्य वदिष्यसि ; देवि ! परितुष्टा भव। गृहाण बलिमिमम्। तव प्रसादेन तालवेतालसिद्धिर्मे सुनिश्चला भवतु। वरमिमं प्रार्थयिष्यसीति निगद्य वेतालो विरराम।

श्रुत्वैतद्राजा महोत्साहेन आह्लादोत्फुल्लहृदयो मृतकं स्कन्धे निधाय क्षान्तिशीलसमीपमाजगाम। समागतं राजानं दृष्ट्वा योगी हर्षनिर्भरमना (३)

१। भवती विधानेन—भवदुक्तया रीत्या।

२। कायप्रपातं—भूमौ शरीरपातनम्।

३। हर्षनिर्भरमनाः—हर्षेण निर्भरं पूर्णं मनो यस्य तथोक्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

राजानमाह, महाराज ! समायातोऽसि ? रात्रिप्रहरत्रय(१)मिदानीम् । वेगेन देव्याः कुण्डे स्नात्वा समागत्य मया सह एकत्र कृतमण्डलमध्ये षोड़शोपचारै(२)र्देवताराधनं कुरु । तव समीहितं भविता, ममापि प्रयोजनं सुसिद्धं भविष्यत्येव । श्रुत्वा राजा तद्वचनेन सरोवरे स्नात्वा समागत्य मिलितः । कृतपूजामण्डले योगिसमाहृतषोड़शोपचारैः योगिना समं देवीं समाराधयामास । पूजावसाने योगी प्रोवाच, राजन् ! देव्यै दण्डप्रणामेन प्रणम । राजोवाच, चक्रवर्त्ती नृपतिरहं, सकलभूपाला मम पादपीठं प्रणमन्ति । विशेषतोऽहं दण्डधारी, शास्त्रतो देवपित्राराधनं स्वयं न करोमि, स्नातकब्राह्मणेन सर्व्वमिदमनुष्ठीयते । तत् केन प्रकारेण दण्डप्रणामः कर्त्तव्यस्तन्मां शिक्षय । राजवचनं श्रुत्वा दैवप्रेरितो(३)योगी स्वयं दण्डप्रणामं चकार । इत्यव-

---

१। रात्र्याः प्रहराणां त्रयम् अतीतमिति शेषः ।

२। षोड़शोपचाराः यथा "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् । मधुपर्काचमस्नानं वसनाभरणानि च । गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा ।"

३। दैवप्रेरितः—दैवेन नियत्या प्रेरितः प्रवर्त्तितः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सरे राजा पार्श्वस्थितः खड्गं हस्ते गृहीत्वा योगिनं चकर्त्त। तन्मस्तके कुणपमस्तके च पादद्वयं निधाय पुष्पाञ्जलित्रयं देव्यै प्रदाय उच्चैर्जगाद, जय जय देवि जगन्मातः! प्रलयोत्पत्तिस्थितिकारिणि! वरदे! बलिमिमं गृहाण, परितुष्टा भव। ऋद्धिसिद्धी मे प्रयच्छ। नृपताविति निगदितवति देव्या आयतने गम्भीरोऽट्टाट्टहासो भूतः. प्रत्यादेशश्चाभूत्, राजन्! महासात्त्विक! जीव वत्सरशतम् अखण्डितप्रतापः सन्, चक्रवर्त्तित्वेन राज्यसुखं भुङ्क्ष्व। ऋद्धिसिद्धी तव सुसिद्धे भवतामित्युक्त्वान्तर्दधे देवी। प्रभात-समयो भूतः। प्रसन्नशरीरः (१) परैरलक्षितो राजा राजधानीं समागत्य मिलितः। सुखेन महता राज्यं चकार।

१। प्रसन्नं प्रसादयुक्तं शरीरं यस्य तथोक्तः। वाह्याकारेण तस्य तदानीन्तनः चित्तप्रसादः सुखेन उन्नीयते स्म।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुरुषपरीक्षा ।

लोकविद्यकथा ।

लोककर्म्मणि यो दक्षो विद्ययापि विना भवेत् ।
फले (१) सविद्यसादृश्याल्लोकविद्यः स उच्यते ॥

आसीत् कुसुमपुरे(२)नन्दो नाम राजा । तस्य कायस्थः शकटारो नाम मन्त्री बभूव । स च केनचिदपराधेन सर्व्वस्वं गृहीत्वा सपुत्रकलत्रो राज्ञा कारागृहे निक्षिप्तः । तत्रापि तस्मै सपरिवारायैकशरावपरिमिता एव निस्वशक्तवः प्रतिदिनं भक्ष्यत्वेन दीयन्ते । तत् दृष्ट्वा तेन शकटारेण परिवारेष्वभिहितं, यदयं राजा चण्डालहृदयो विनापराधेनास्मान् दुःखं दत्त्वा घातयति, शरावमात्रैः शक्तुभिः

१। फले—कार्य्याकार्य्यनिर्णयरूपे। सविद्यसादृश्यात् विदुषां तुल्यत्वात्।

लोकविद्यः—having the knowledge of the world, contradistinguished form one who is versed in literature.

2. Kusumapura—"The city of flowers"—It is another name for Pátaliputra, the mordern Patna. In the drama of Mudrárákshasa, this name is always used, while Pátaliputra or Palibothra is the appellation mentioned by Megasthenes, the ambassador of Seleucus in the court of Chandragupta. Hence it follows that the latter was the ancient, and the former the medieval name of the modern city of Patna.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्व्वेषामस्माकमाहारसिद्धिर्न सम्भवत्येव। ततः स खादतु शक्तुशरावं, योऽस्य वैरस्य प्रत्युद्धारे समर्थो भवति। परिवारैरुक्तं. आर्य्य! यदि भवान् जीवति तदा चरमे तस्य वैरस्य परिवारसंहारसम्भवस्य प्रत्युद्धारः सम्भवति। ततः सकलपरिवाराणां परामर्शेण शकटार एव तदन्नं खादित्वा स्वकीयं जीवनं रक्षितवान्। परिवारास्तस्य मृता एव।

एकदा स राजा नन्दः गृहान्मन्दस्मितं कुर्व्वन् वहिर्बभूव। तं हसन्तं दृष्ट्वा पानीयपरिचारिका तदानीं तत्रावस्थिता विचक्षणानाम्नी चेड़ी जहास। ताम् हसन्तीमवलोक्य राजोवाच, रे विचक्षणे! कुतो हससि? विचक्षणोवाच, यतो देवो हसति। राजोवाच, मया कुतो हस्यते? विचक्षणोवाच, देव! तदहं न जानामि। राजोवाच, आः कपटिनि पापे! त्वयैवोक्तं, यतो देवो हसति ततोऽहमपि हसामि। त्वमेवाभिदधासि, यत्तदहं देवस्य हासकारणं न जानामि। किमेतन्ममापि पुरतः परस्परविरोधिनी वचने कथयसि? यदि स्वहितमिच्छसि, तदा कथय सत्वरं मम हासवीजं, नोचेत्तव शास्तिं करिष्यामि। ततो राजकोपभीतया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भणितं, देव ! सद्यः कथयितुं न शक्नोमि, एकमासाभ्यन्तरे कथयिष्यामीति ।

ततो लब्धावसरा सा दासी चिन्तयामास, यत् सुबुद्धि (१) परामर्शपरिच्छेद्यमेतत् । ततः सुबुद्धिं कमपि पृच्छामि ? सुबुद्धिषु प्रथमगणनीयः शकटारः, स चेदानीं भागधेयदोषतः कारागृहे विद्यते । ततस्तमेव गत्वा पृच्छामि । इति परामृश्य तत्र गतवती । तत्र च कारागृहदुःखदुर्ब्बलं शकटारं मिष्टान्नपानैः परितोष्य तावद्वृत्तान्तमपृच्छत् । शकटार उवाच, विचक्षणे विना देशकालानुसारिणा (२) प्रकरणज्ञानेन (३) परिच्छेत्तुं न शक्यते राज्ञः स्मितकारणं, तदवसरं (४) कथय । विचक्षणावसरं कथितवती । शकटार उवाच, त्वं कथयसि, यदश्वत्थ-

---

१ । सुबुद्धीनां यः परामर्शः उपदेशः तेन परिच्छेद्यं निर्णेतव्यम् ।

२ । विना देशकालानुसारिणा—यस्मिन् स्थाने यस्मिन् काले च काचित् घटना सम्भवति, तस्य स्थानस्य तस्य कालस्य च अनुसारिणा अनुयायिना ।

३ । प्रकरणज्ञानेन—प्रसङ्गज्ञानं विना ; तत्तद्व्यापाराणां मध्ये पौर्व्वापर्य्यसङ्गतिज्ञानं विनेत्यर्थः ।

४ । तदवसरं—तस्य स्मितस्य अवसरं समयविशेषम् । यस्मिन् समये स्मितं चकार तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वीजं दृष्ट्वा अश्वत्थवृक्षं पश्यन् राजा जहास। तर्हि पूर्व्वदृष्टस्य कस्यापि वस्तुनः स्मरणं न हासनिमित्तम्। तदिदानीं वृक्षं दृष्ट्वा मनसस्तदासक्तत्वेऽपि(१)प्रकृत एव वृक्षधर्म्मो न हासनिमित्तं हासस्य वस्तुविकृति(२) दर्शनजन्यत्वात्। किन्तत् विकृतं दृष्टं राज्ञा अश्वत्थवृक्षे? आं ज्ञातम्। अश्वत्थवीजं क्षुद्रतरं दृष्ट्वा तदुद्भूतं महापरिमाणं वृक्षं पश्यन् परामृष्टवान् राजा, यदहो वैकृत्यं(३)विधातुः प्रपञ्चस्य (४)। क्वेदं वीजं, क्वायन्तरुः तदुद्भवः (५)। एवं परामृश्य हसितं भूपालेन पुनः पुनः। शकटारस्तदेव निर्द्धार्य्य अब्रवीत्। विचक्षणया च तदेव वचनं गत्वा राज्ञः पुरस्तादुक्तम्। राजोवाच, विचक्षणे! सत्यं कथय

१। तदासक्तत्वेऽपि—दर्शनात् परं राज्ञश्चित्तं वृक्षविषयिण्या चिन्तया युक्तम्। तथापि प्रकृतः स्वाभाविकः वृक्षधर्म्मः अश्वत्थवृक्षस्य गुणः उच्चत्वचञ्चलदलत्वादिरूपः।

२। वस्तुविकृतिदर्शनजन्यत्वात्—हासः वस्तूनां स्वाभाविकैः गुणैः नोत्पद्यते; किन्तु स्वभावस्य अन्यथाभावदर्शनेन जायते एव।

३। वैकृत्यं—विकृतिरेव वैकृत्यं स्वार्थे ष्यञः।

४। प्रपञ्चस्य—प्रपञ्चरूपस्य सृष्टिकार्य्यस्य। प्रपञ्चः विस्तारः क्षित्यप्तेजोमरुदाकाशानां पञ्चीकरणं वा।

५। तदुद्भवः—तस्मात् वीजात् उद्भवति यः सः तथोक्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शकटारो जीवन्नपि वर्त्तते ? विचक्षणोवाच, अथ-किम् ? राजोवाच, कोऽन्यः शकटारादिदं निर्द्धारयितुमलम्भवति ? अहो तर्कः (१) शकटारस्य ! ततस्तर्कपरितुष्टेन राज्ञा शकटारः पुनरानीय सम्मानपात्रं कृत्वा राज्यचर्य्यायां मन्त्रिराक्षसस्य द्वितीयः कृतः। शकटारस्तु तां पदवीमासाद्य चिन्तयामास, अहो दुर्नीतिरस्य राज्ञः। सकलपरिवारं मम हत्वा मामेव मन्त्रिपदव्यां स्थापयति, मूलमुत्सृज्य दले जलं ददाति। तथाहि——

उत्कटं वैरमुत्पाद्य पुनर्यो मैत्रमिच्छति।
यमपत्तनयात्रायाः स पन्थानमवेक्षते॥

कथं वा मम पापि मनः प्रत्येति दुष्टाशयेऽस्मिन्।

यतः——

दृष्टा वैरक्रिया यस्य पुरा पर्य्यन्त(२)गामिनी।
तस्मिन् विश्वासमायान्तं मृत्युर्जिघ्रति मस्तके॥

तदिदानीं किमुचितम् ? पुरातनमस्य वैरमिदानीन्तनञ्च सौहृद्यं चिन्तयन् सन्दिग्धचित्तोऽस्मि। किं करवाणि ? अथ वैरोद्धारार्थमेव तदापि जीवनं

१। तर्कः अनुमानम्। Reasoning.

२। पर्य्यन्तगामिनी—पर्य्यन्तं चरमसीमानं परां काष्ठां गच्छति या सा। विश्वासमायान्तं विश्वसन्तं जनम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वीकृतं यदानेन दुरात्मना भूस्वामिना पश्यतो (१) मम पुत्रादयो हृताः । तद्यथा——

सर्व्वस्वं गतमेव गच्छतु नृपं (२) ग्लानिश्च सा मामकी
लक्ष्मीः प्रच्युतिनिश्चयैव सुधियः शोचन्ति के तां गताम् ।
ते पुत्राः सदसि प्रगल्भ(३)वचसस्ताः सानुरागाः स्त्रियो
नप्तारः किल ते च चारुचटुलास्तेतो न मुञ्चन्ति मे ॥

तद्वैरम् अवश्यमुद्धरणीयम् । तथाप्यपयशो विनिवार्य्य येन वैरमप्युद्ध्रियते, तेनाधमपुरुषपदवी न प्राप्यते । तथाहि—

पापात्त्रस्यति यः स एव पुरुषः स्यादुत्तमो भूतले,
पापात्मापि बिभेति योऽपयशसः स ज्ञायते मध्यमः ।
त्रासो यस्य न पातकादपि न वा लज्जापराधादपि,
प्रज्ञावद्भिरुदाहृतोऽयमधमः सर्व्वत्र निन्दास्पदम् ॥

---

१ । पश्यतो मम पश्यन्तं माम् अनादृत्य । अनादरे षष्ठी । Before my eyes, under my very nose.

२ । गच्छतु नृपं—तत्सर्व्वस्वं नृपं गच्छतु, नृपो मम सर्व्वस्वं गृह्णातु । किञ्च तेन सर्व्वस्वेन सह ग्लानिः धनजनितं मे मनोमालिन्यमपि नृपं गच्छतु ।

३ । प्रगल्भवचसः—वाग्मिनः । चारुचटुलाः—चारवः सुन्दराः, चटुलाः चञ्चलाः क्रीड़ाचपलाः, प्रियभाषिणो वा । चटु (प्रियवाक्य) +ल (प्रत्यये) ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति चिन्तयन्नेव स मन्त्री कदाचिदारामदर्शन-कौतुकेन तुरगारूढ़ो भ्रमन् पुराद्वहिः कियत्यपि दूरे कुशानुत्खाय तन्मूले तक्रं ददानमेकं ब्राह्मणं ददर्श। तं दृष्ट्वा शकटार उवाच, बटो कस्त्वं, किमत्र कुरुषे? बटुरुवाच, चाणक्यशर्म्मा ब्राह्मणोऽहम्। साङ्गं (१) वेदमधीत्यानेन पथा विवाहार्थितया गच्छतो मम कुशाङ्कुरेण पदे क्षतं कृतं, तेन क्षतेन विवाहभङ्गः संवृत्तः। अमर्षितस्तदा प्रतिज्ञां कृतवानस्मि, यदस्याः स्थल्याः कुशं निर्मूलं करिष्ये। ततो वृक्षायुर्व्वेदाधिगमः(२) कृतः। नोचेत् प्रतिज्ञा-पूरणं कथं स्यात्? तदयमभ्युपायः सुकरो निर्द्धारितः, यत्तक्रेण कुशा विनश्यन्तीति। तथा समाचरन् पूर्ण-प्रतिज्ञो भवामि। शकटार उवाच, दिष्ट्या(३) भवता वृक्षायुर्व्वेदाधिगमः कृतः। नोचेत् प्रतिज्ञा-

---

१। साङ्गं—अङ्गैः सह। अङ्गानि खलु—शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः। छन्दसां निचितिश्चैव षड़ङ्गो वेद उच्यते। शिक्षा—orthoepy; कल्पः—ritual; व्याकरणं—grammar; निरुक्तं—derivation; ज्योतिष्—astronomy; छन्दः—versification.

२। वृक्षायुर्वेदाधिगमः—वृक्षाणाम् आयुर्वेदः जीवनविषयकं शास्त्रं तस्य अधिगमः अध्ययनम्। Study of botany.

३। दिष्ट्या—भाग्येनेत्यव्ययम्। fortunately.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूरणं कथं स्यात् ? चाणक्य उवाच, यद्ययमुपायो न स्यात् तदाभिचारिक (१) कर्म्मणि मम प्रवीणतास्त्येव। ततः कुशविनाशकामनया होममेव करिष्ये। तदाकर्ण्य शकटारश्चिन्तयामास अहोऽस्य ब्राह्मणस्यामर्षः ! अहो उपायप्रवीणता ! यद्ययं मम वैरिणो वैरी भवति तदाहं वैरोद्धारकर्म्मणि विनायासेनैव कृतार्थो भवामि। ततः शकटारस्तत्सहितः कुशोन्मूलनं कृत्वा तं ब्राह्मणं स्वकीयागारमानीतवान्। पश्चात् पुरोधसा समं सम्प्रधारणां (२) विधाय राज्ञः पितृक्षयाहश्राद्धे (३) तं पात्रत्वेनोपनीतवान्, परामृष्टवांश्च, यदयं ब्राह्मणोऽकृतविवाहः कपिलः (४) श्यावनखदन्तः पात्रानर्ह एव। विशेषतो मम विरोधिना मन्त्रिराक्षसेन

१। आभिचारिककर्म्मणि—अभिचारः मारणवशीकरणोच्चाटनादिरूपः स प्रयोजनमस्य आभिचारिकं तादृशं कर्म्म तस्मिन्।

२। सम्प्रधारणां सम्यगवधारणं बन्दीवस्त इति भाषा।

३। पितुर्मृत्युदिनकर्त्तव्ये श्राद्धे, एकोद्दिष्टश्राद्धे।

४। कपिलः—पिङ्गलः। श्यावनखदन्तः—श्वेतनखदन्तः। एतद्द्वयमपलक्षणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथोपन्यस्तोऽयमिति(१) निश्चितमपमानयितव्यः। अथ राज्ञि श्राद्धं कर्त्तुमुद्यते ब्राह्मणे च पात्रासननिषस्त्रे (२), मन्त्रिराक्षसः "देव! नायं ब्राह्मणः पात्रयोग्य" इत्यभिधाय, तत्साधकानि(३) पठितवान्, उवाच च, शकटारः शूद्रः कथमिदमपि कार्य्यमनुसन्धाय राज्ञो धर्म्माधर्म्मं कुरुते? तच्च मन्त्रिराक्षसस्य वचनं श्रुत्वा जातामर्षेण नन्देन राज्ञा

१। उपन्यस्तः—स्थापितः, आहूतः।

२। पात्रं भाजनविशेषः—श्राद्धकाले यस्मिन् भाजने विविधानि खाद्यानि सज्जीकृतानि पितरमुद्दिश्य निवेदितानि भवन्ति, तत् पात्रम्। एकोद्दिष्टश्राद्धे तादृशमेकं पात्रं दीयते; पार्व्वणे तु पञ्च त्रीणि वा पात्राणि कल्प्यन्ते। यः कश्चित् ब्राह्मणः आहूतः श्राद्धविधेः साचित्वेन सदस्यत्वेन च स्थापितो भूत्वा पितुरुद्देशे दीयमानं द्रव्यादिकं गृह्णाति, सोऽपि यथोचितगुणयोगात् पात्रमित्यभिधीयते। नन्दराजसमये एषा प्राचीनरीतिरनुसृता आसीत्। आधुनिकैस्तु दर्भमयं ब्राह्मणं स्थापयित्वा श्राद्धकर्म्म क्रियते।

३। तद्यथा | श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः। अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्। प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः। प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषस्तथे"त्यादीनि वचनानि। see Manu, chapter 3, slokas, 128—153.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुर्दैवदेश्यितेन पात्रासनादवताय्र्य साधिचेपं (१) ब्राह्मणश्चाणक्यो वहिर्निःसारितः। ततश्च तं चाणक्यं तथाविधापमानक्रुद्धं नन्दवधे क्रतप्रतिज्ञं विज्ञाय शकटारो मन्त्री क्रतक्रत्यो देहत्यागाय वाराणसीं जगाम। तथाहि—

विचक्षणा परिज्ञाता चाणक्यश्च परीक्षितः।
युद्धैव शकटारेण वैरमुद्धृतमघ्नता (२)॥

१। साधिचेपं—सनिकारं सतिरस्कारम्।

२। वैरमुद्धृतमघ्नता—अघ्नता प्राणिवधं अकुर्व्वता वैरं उद्धृतं वैरनिर्य्यातनं क्रतम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथोभयविद्यकथा ।

वेदमभ्यसतो यस्य मतिर्लोके न हीयते ।
वेदे लोके च यो दक्षः स स्यादुभयपण्डितः ॥

आसीत् कुसुमपुरे नन्दो नाम राजा । तेन पितृक्षयवासरे श्राद्धं करिष्यमाणेन सचिवदोषाच्चाणक्यशर्म्मा ब्राह्मणः पात्रत्वेनाहूय प्रकोपितः । क्रुद्धस्तु चाणक्यः प्रतिज्ञां कृतवान् । यद्यथा—

यावन्न प्रहिणोमि नन्दमवनीनाथं यमस्यालयं
यावन्नात्र नृपं करोमि वृषलं तस्यैव सिंहासने ।
यावच्चास्य तु मन्त्रिराक्षसमहं नामात्यतामानये (१)
मुक्तां मूर्द्धि शिखां न तावदशमो(२) बध्नामि चैनां पुनः ॥

एवं कृतप्रतिज्ञः स चाणक्यश्चन्द्रगुप्तनामानं वृषलं द्वारि दृष्ट्वा अवोचत्, रे वृषल ! यद्यस्मिन् राज्ये राजा भवितुमिच्छसि तदा मामनुगच्छ ।

---

१ । आनये—आ+नी+(लट्) ए । यावच्छब्दयोगात् सर्व्वत्र भविष्यत्काले लट् ।

२ । अशमः—शान्तिरहितः, अनन्यकर्म्मा इत्यर्थः । बध्नामि—भविष्यत्सामीप्ये लट् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृषलस्तथाविधगुरुप्रेरितस्तमनुजगाम। चाण-क्यस्तु तेन वृषलेनानुगम्यमानस्तपोवनं गत्वाभि-चारिकेण होमेन नवापि नन्दान् यमनिकेतनं नीतवान्। ततोऽसौ चिन्तयामास, यदेका तावत् प्रतिज्ञा पूर्णा। इदानीं तावत् चन्द्रगुप्तवृषलं नन्द-सिंहासने राजानं कृत्वा द्वितीयां पूरयामि। राजा च विना सेनया कुतः सम्भवति? सेना च धनाधीना, धनञ्च संप्रति मम हस्ते नास्ति। किं करवाणि?

ततः परामृष्य पर्व्वतकेश्वरं राजानमुपसृत्यो-वाच, राजन्! पर्व्वतकेश्वर! कुमारोऽयं चन्द्रगुप्तो मया कुसुमपुरे राजा कर्त्तव्यस्ततो भवानिमं स्वबलै-रुपकृत्यार्द्धं राज्यं गृह्णातु। पर्व्वतकेश्वरस्तु नन्दवधे दृष्टानुभावस्य चाणक्यस्य वचसि फलसिद्धौ जात-प्रत्ययः, सकलबलसहितः नन्दप्रदेशं कुसुमपुरं गत्वा चन्द्रवृषलं राजानञ्चकार। लब्धराज्ये तु चन्द्रगुप्ते तपस्विनि (१) पर्व्वतकेश्वरे च अर्द्धराज्यहरे केनचित्

* * * *

* * * *

१। तपस्विनि—निरपराधे—poor.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*   *   *   *

*   *   *   *

*   *   *   *

छद्मना मारिते चन्द्रगुप्तस्य निष्कण्टकं (१) राज्यं जातम्।

चाणक्यः पुनश्चिन्तयामास, यदियं द्वितीया मम प्रतिज्ञा पूर्णा, तदिदानीं मलयकेतोः (२) भूपालस्य राज्याद्राक्षसं समानीय चन्द्रगुप्तस्य मन्त्रितां ग्राहयित्वा पूर्णप्रतिज्ञो भवामि। तदर्थमपि कृत एवाभ्युपायः। यद्राक्षसस्य प्रियमित्रं चन्दनदासो वसत्यत्रैव, तस्य स्थाने राक्षसस्य गृहजनाः सन्त्येव। अन्यच्च धर्म्मपटधारिणा (३) पुरुषेण राक्षसनामा-

---

१। निष्कण्टकं—न सन्ति कण्टकानि क्षुद्रशत्रवो यस्मिन् तथोक्तम्।

२। मलयकेतुः—पर्व्वतकराजस्य पुत्रः। चन्दनदासः—मणिकारश्रेष्ठी राक्षसस्य परमसुहृत्।

३। धर्म्मपटं—यमपटम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ङ्किता मुद्रा समानीय दत्ता। सा राक्षसहस्ताङ्गुल्यालिङ्गितेति (१) तया मुद्रयाङ्कितं शकटदासलिपि (२) भूषितं पत्रं मलयकेतुं सेवमानस्य मम सहाध्यायिमित्रस्य भागुरायणस्य (३) हस्ते प्रविष्टमेव। शकटदासोऽपि मया निःसारितो राक्षसमनुवर्त्तत एव। भद्रभटप्रभृतयः शूराः परमाप्ताः समयकृत्य(४)कुशला मया धनपरितोषिताः कृत्रिमविरोधं कृत्वेतः पलायिताः। संप्रति मलयकेतोर्विश्वासपात्राण्येव विद्यन्ते। अवश्यं तेन लेखनेन (५) तैः पुरुषैरस्मिन्नवसरे राक्षसमलयकेत्वोः सौहृदभङ्गकारिणा भवितव्यम्। तदेवं सम्पन्ने

१। राक्षसहस्ताङ्गुल्यालिङ्गिता—सा मुद्रा अङ्गुरीयरूपा राक्षसहस्ताङ्गुल्या आलिङ्गिता धृता। इति अस्मात् हेतोः तदङ्गुरीयकस्थितमुद्रया अङ्कितं पत्रं राक्षसेनैव लिखितमिति मलयकेतुना निर्णीयते स्म।

२। शकटदासः—अमात्यराक्षसपक्षपाती कायस्थः चन्द्रगुप्तप्रकृतिषु भेदप्रयोगकार्य्ये नियुक्तः।

३। भागुरायणः—सिंहबलदत्तनाम्नो नन्दराजसेनापतेः कनिष्टभ्राता चाणक्यपक्षपाती गूढ़चरः।

४। समयकृत्यकुशलाः—यस्मिन् समये यत् कृत्यं करणीयं तत् जानन्तः।

५। तेन लेखनेन—जालपत्रेण राक्षसमुद्राङ्काङ्कितेन।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कारणकलापे(१)कार्य्यसिद्धिरपि नः सम्यक्प्राया(२)। यतः—

सम्पन्ने कारणव्राते (३) कार्य्यं सम्पद्यते परम्।
प्रतिबन्धा यदा धाता न स्याद्विरुद्धचेष्टितः॥

धातापि संप्रत्यनुकूल एव लक्ष्यते। यतः—

नन्दा हता राज्यमिदं गृहीतं नष्टोऽरिराज्यार्द्धहरो विपक्षः।
शेषावशेषां किल मे प्रतिज्ञां मन्ये क्रमात् पूरयितेव (४) धाता॥

अथवा धातुश्चरिते कानुगतिः (५)? कस्यचिन्निस्तीर्णपारावारस्य तटान्तमागत्य नौर्निमज्जति। किन्तु यदायत्तं (६) ततो न प्रमाद्यामीति परामृष्य शार्ङ्गरवनामानं शिष्यमाहूयापृच्छत्, वत्स! चन्द्रगुप्तमभियोक्तुं कृतप्रयाणस्य मलयकेतोः किं वृत्तम्?

१। कारणकलापे—कारणपरम्परायां, Chain of causes.

२। सम्यक्प्राया—प्रायेण सम्यक् सम्पन्ना, almost accomplished.

३। कारणव्राते—कारणकलापे। प्रतिबन्धा—प्रति+बन्ध+तृन्। विघ्नकर्त्ता।

४। पूरयिता—पूर+णिच्+(लुट्) ता, पूरयिष्यति।

५। अनुगतिः—अनुगमः निश्चय इत्यर्थः।

६। यदायत्तं—यत् आयत्तं स्वस्य अधीनं निजोद्योगेन साध्यं, ततः तस्मात् न प्रमाद्यामि प्रमत्तो भवामि। कार्य्यसिद्धिर्दैवाधीना; उपाययोजनन्तु पुरुषायत्तं, अतः तस्मिन् अवहितो भवामि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शार्ङ्गरव उवाच, आर्य्य ! मलयकेतुरन्तिकमेवागतः। किन्तु मन्त्रिराक्षसस्य सनिकारं (१) निःसारण-व्यावृत्त्या द्वित्राणि(२)दिनानि पथि विलम्बितोऽस्ति स राजा। चाणक्य उवाच, आः कथं राक्षसस्यापि निकारः ! किन्तत्र निमित्तम् ? शिष्य उवाच, गहनं खलु राजचरितं, क्वचिन्निमित्तनिरपेक्षापि(३)क्रिया सम्भाव्यते। राक्षसनिकारे त्विदं निमित्तं, यत् शकटदासलिपिविभूषितं पत्रं राक्षसमुद्राङ्कितं राक्षसानुजीविना(४)विपक्षस्थानं नीयमानं वर्त्मनि प्राप्तम्। चाणक्य उवाच, तदिदं स्थानमेव (५) निकारस्य। राजापथ्यकारिणो ध्रुवमेव निकारमनु-भवन्ति। सनिकारं निःसारितो राक्षसः कुत्रेदानीं श्रूयते ? शिष्य उवाच, मानभङ्गदुःखितः क्वाप्यरण्ये भविष्यति। चाणक्य उवाच, वत्स ! घातकपुरुषे-

---

१। सनिकारं—सतिरस्कारम्। निःसारणव्यावृत्त्या—निष्काशनरूपया बाधया।

२। द्वित्राणि—द्वे वा त्रीणि वा (बहुव्रीहिः)।

३। निमित्तनिरपेक्षा—निमित्तं निरपेक्षते न अनुवर्त्तते या सा। कर्त्तरि अच्। न कारणानुसारिणी।

४। इदं स्थानमेव—इदं षड्यन्त्ररूपं निकारस्य स्थानम् अनुरूप-कारणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभिधेहि, यच्चन्दनदासमानीय शूलमारोपयत। चन्दनदासं ब्रूहि यद्राक्षसः स्वकीयगृहजनांस्तव मन्दिरे न्यासीकृत्य (१) कुसुमपुरग्रहणसमये पलायितस्तानानीय देहीति।

शिष्यस्तथा कृत्वा पुनरागत्य प्रणम्योवाच, आर्य! चन्दनदासो मित्रवत्सलो मरणमप्यङ्गीकुरुते, न राक्षसस्य गृहजनान् ददाति। राक्षसोऽपि तां वार्त्तामाकर्ण्य चन्दनदासवणिजः प्राणरक्षानुरोधेन वधस्थानमागत्य वदन्नस्ति (२), यदाचार्यः चाणक्यो मां यत् कुरुते तत् कुरुताम्। चन्दनदासवणिजं निरपराधं मदर्थं प्राणानुपेक्षितुम् उद्यतं परित्यजतु। चाणक्य उवाच, पूर्णा तर्हि मम प्रतिज्ञा। मन्त्रिराक्षसं ब्रूहि, यदि चन्दनदासस्य सुहृदः प्राणान् रक्षितुमिच्छति भवान्, तदा चन्द्रगुप्तस्य राज्ञो मन्त्रितामङ्गीकृत्य खड्गं गृह्णातु। शिष्य उवाच, किं

१। न्यासीकृत्य—न्यासत्वेन स्थापयित्वा। न्यासः निक्षेपः गच्छितं इति भाषा।

२। वदन्नस्ति—कथयन् विद्यते। This is progressive form in Sanskrit.

पं० ... शास्त्री
८ जहांगीराबाद २-२३६४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

करोतु राक्षसो वराकः। संप्रति चन्दनदासरक्षानुरोधपराधीन(१)एवाङ्गीकरिष्यति। दुरतिक्रमणीयो हि कर्म्मधारापाशबन्धः(२)।

तथाहि—

अङ्गीचकार किल वामनतां मुरारीरामोऽप्युवास वनमभिरवाह वल्गम्।
दन्तावला(३.इवदृढव्यवसायरुद्धाः किन्नाचरन्त्यहह कार्य्यवशात् पुमांसः॥

ततो मन्त्रिराक्षसश्चन्द्रगुप्तस्य साचिव्यमनभिमतमप्यङ्गीकृत्य खड्गं जग्राह। चाणक्यस्तु चन्द्रगुप्तं राजानं प्रति निश्चिन्तो बभूव। तावदेवं वेदाध्ययनसामर्थ्यानन्दं हत्वा लौकिककार्य्यदक्षतया चन्द्रगुप्तं नृपं राक्षसञ्च तन्मन्त्रिणं कृत्वा पूर्णप्रतिज्ञः शिखां बद्ध्वा सोल्लासः स्वाभिमतस्थानं जगाम।

१। रक्षानुरोधपराधीनः—रक्षा एव अनुरोधः अपरिहार्य्यं कर्म्म तस्य पराधीनः परतन्त्रः।

२। कर्म्मधारापाशबन्धः—कर्म्मणां सुकृतदुष्कृतकर्म्मणां धाराः परम्पराः ता एव पाशाः रज्जवः तैः बन्धः बन्धनम्। लोकैर्हि निजकृतस्य पापस्य पुण्यस्य च फलमवश्यमेव भोक्तव्यम्। तथाहि "मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम्॥"

३। दन्ती एषां सन्तः दन्तावलाः। दन्त+वलच्। दृढाः अक्षुण्णाः व्यवसायः क्रिया प्रहार इत्यर्थः, तेन रुद्धाः नियन्त्रिताः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रोषो यस्य कृतान्तपत्तनमितो(१) नन्दान्नव प्राहिणोत्।
निर्वीजो(२) वृषलाय नूनमभवत्तोषस्तु राज्यप्रदः।
स ख्यातः किल विद्यया च सकले बुद्ध्या च भूमण्डले
चाणक्यश्चतुरानन (३) प्रतिनिधिः केषां न वा गोचरः (४)॥

१। कृतान्तपत्तनमितः—कृतं शुभाशुभकार्य्यं अन्तयति सुखदुःख-भोगविधानेन नाशयति इति कृतान्तः। यद्वा कृतं सृष्टं वस्तुजातम् अन्तयतीति कृतान्तः। अन्तात् तत्करोत्यर्थे णिच् (णिङ्) ततः कर्त्तरि अच्। तस्य पत्तनं नगरम् इतः मूलोकात्।

२। निर्वीजः—नास्ति वीजं यस्य, अकारणः, स्वतःसम्भूतः। spontaneous.

३। चतुराननप्रतिनिधिः—चतुराननस्य ब्रह्मणः प्रतिनिधिः प्रतिरूपः, दुर्घटघटने पटुरित्यर्थः।

४। केषां न गोचरः—सर्वेषामपि लोकानां प्राचीनानाम् इदानीन्तनानामपि गोचरः श्रुतिगोचरः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महाभारतम् ।

बकऋषिधर्म्मोपाख्यानम् ।

ततोयुधिष्ठिरो राजा नकुलं वाक्यमब्रवीत् ।
आरुह्य वृक्षं माद्रेय ! निरीक्षस्व दिशो दश ॥
पानीयमन्तिके पश्य वृक्षांश्चाप्युदकाश्रितान् । (१)
एते हि भ्रातरः श्रान्तास्तव तात !(२)पिपासिताः ॥
नकुलस्तु तथेत्युक्त्वा शीघ्रमारुह्य पादपम् ।
अब्रवीद्भ्रातरं ज्येष्ठमभिवीक्ष्य समन्ततः ॥
पश्यामि बहुलान्राजन् ! वृक्षानुदकसंश्रयान् ।
सारसानाञ्च निर्ह्रादमत्रोदकमसंशयम् ॥
ततोऽब्रवीत् सत्यधृतिः (३) कुन्तीपुत्रो युधिष्ठिरः ।
गच्छ सौम्य ! ततः शीघ्रं तूर्णैः पानीयमानय ॥
नकुलस्तु तथेत्युक्त्वा भ्रातुर्ज्येष्ठस्य शासनात् ।
प्राद्रवद्यत्र पानीयं शीघ्रञ्चैवान्वपद्यत (४) ॥

१। उदकाश्रितान्—उदकम् आश्रितान् । Aquatic plants.

२। "ज्येष्ठोभ्राता समः पितुः" इति स्मरणात् "तात" इति सम्बोधनं युज्यते । तथाहि "पुत्रे पितरि पूज्ये च तातशब्दं प्रचक्षते ।"

३। सत्ये धृतिः निश्चयो यस्य तथोक्तः सत्यनिष्ठ इत्यर्थः ।

४। अन्वपद्यत—प्राप्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स दृष्ट्वा विमलं तोयं सारसैः परिवारितम् ।
पातुकामस्ततो वाचमन्तरीक्षात् प्रशुश्रुवे (१) ॥
मा तात ! साहसं कार्षीर्मम पूर्वपरिग्रहः (२) ।
प्रश्नानुक्त्वा तु माद्रेय ! ततः पिव हरस्व च ॥
अनादृत्य तु तद्वाक्यं नकुलः सुपिपासितः ।
अपिवच्छीतलं तोयं पीत्वा च निपपात ह ॥
सहदेवस्ततो जिष्णुः भीमसेनः क्रमेण च ।
सरसीमेत्य वाचं तां हित्वा पीत्वा पपात ह ॥
चिरायमाणाननुजान् दृष्ट्वा राजा समाकुलः ।
समुत्थाय महाबाहुर्दह्यमानेन चेतसा ।
व्यपेतजननिर्घोषं प्रविवेश महावनम् ॥
स गच्छन् कानने तस्मिन् हिमजालपरिष्कृतम्(३) ।
ददर्श तत्सरः श्रीमान् विश्वकर्मकृतं यथा ॥
स ददर्श हतान् भ्रातॄन् लोकपालानिव च्युतान् ।
युगान्ते समनुप्राप्ते शक्रप्रतिमगौरवान् ॥
विनिकीर्णधनुर्व्बाणं दृष्ट्वा निहतमर्ज्जुनम् ।

१। आत्मनेपदमार्षम् ।

२। परिगृह्यते—असौ इति कर्मणि अल् । मया पूर्व्वाधिकृतत्वात् मम स्वत्वास्पदीभूतमिदं सरः ।

३। हिमजालपरिष्कृतं—तुषारनिकर इव विशदम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भीमसेनं यमौ चैव निर्व्विचेष्टान् गतायुषः ।
दीर्घमुष्णं विनिश्वस्य शोकवाष्पपरिप्लुतः ॥
तान् दृष्ट्वा पतितान् भ्रातॄन् सर्व्वांश्चिन्तासमन्वितः ।
धर्म्मपुत्रो महाबाहुर्व्विललाप सुविस्तरम् ॥
ननु त्वया महाबाहो प्रतिज्ञातं वृकोदर !
दुर्य्योधनस्य भेत्स्यामि गदया सक्थिनी रणे ॥
व्यर्थं तदद्य मे सर्व्वं त्वयि भीम ! निपातिते ।
महात्मनि महाबाहो कुरूणां कीर्त्तिवर्द्धने ॥
मनुष्यसम्भवा वाचो विधर्म्मिण्यः (१) प्रतिश्रुताः ।
भवतां दिव्यवाचस्तु ता (२) भवन्ति कथं मृषा ॥
देवाश्चापि यदाऽवोचन् सूतके त्वां धनञ्जय ।
सहस्राक्षादनवरः कुन्ति ! पुत्त्रस्तवेति वै ॥
उत्तरे पारिपात्रे च (३) जगुर्भूतानि सर्व्वशः ।

१। विधर्म्मिण्यः—विरुद्धधर्म्मवत्यः विपरीता अलीका इत्यर्थः।

२। ताः—पूर्व्वानुभूताः दुर्य्योधनसभायां द्रौपदीपरिभवकाले उक्ता इत्यर्थः। प्रक्रान्तप्रसिद्धपूर्व्वानुभूतार्थकं तत्पदं यत्पदमनपेक्षते इति आलङ्कारिकाः।

३। उत्तरे—उत्तरकुरुवर्षमर्ज्जुनो जितवान्। तच्च जम्बुद्वीपात् सप्तमं वर्षं पृथिव्याश्च चरमोत्तरसीमास्वरूपम्। पारिपात्रस्तु विन्ध्यस्य उत्तरो भागः तस्मिन् पर्व्वते वासुदेवो वासवेन सह अयुध्यत; तत्पदभरेण च तस्य शृङ्गं न्यूब्जीबभूव।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विप्रनष्टां श्रियञ्चैषामाहर्त्तां पुनरञ्जसा (१) ॥
नास्य जेता रणे कश्चिदजेता नैष कस्यचित् ।
सोऽयं मृत्युवशं यातः कथं जिष्णुर्महाबलः ॥
अयं ममाशां संहृत्य शेते भूमौ धनञ्जयः ।
आश्रित्य यं वयं नाथं दुःखान्येतानि सेहिम ॥
रणे प्रमत्तौ वीरौ च सदा शत्रुनिबर्हणौ ।
कथं रिपुवशं यातौ कुन्तीपुत्रौ महाबलौ ॥
अश्मसारमयं नूनं हृदयं मम दुर्हृदः ।
यमौ यदेतौ दृष्ट्वाऽद्य पतितौ नावदीर्य्यते ॥
शास्त्रज्ञा देशकालज्ञास्तपोयुक्ताः क्रियान्विताः ।
अकृत्वा सदृशं कर्म्म किं शेध्वं पुरुषर्षभाः ॥
अविक्षतशरीराश्चाप्यप्रमृष्टशरासनाः (२) ।
असंज्ञा भुवि सङ्गम्य (३) किं शेध्वमपराजिताः ॥
इत्थं शोशुच्यमानस्तु धर्म्मात्मा स नरेश्वरः ।
शोकसागरमध्यस्थो दध्यौ कारणमाकुलः ॥

१। एषां पाण्डवानां विप्रनष्टां श्रियं राजलक्ष्मीं पुनः आहर्त्तां आहरिष्यति इति जगुः ऊचुः । आहर्त्ता—आ-हृ-ता (लुट्)।

२। अप्रमृष्टशरासनाः—वाणत्यागात् पूर्व्वं मौर्व्वीमार्ज्जनं क्रियते, अत्र च युद्धाभावात् तदपि नासीत् ।

३। सङ्गम्य—मिलित्वा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इतिकर्त्तव्यताश्चेति देशकालविभागवित् ।
नाभिपेदे महाबाहुश्चिन्तमानो महामतिः ॥
बुद्ध्या विचिन्तयामास वीराः केन निपातिताः ।
नैषां शस्त्रप्रहारोऽस्ति पदं (१) नेहास्ति कस्यचित्
भूतं महदिदं मन्ये भ्रातरो येन मे हताः ॥
एकाग्रं चिन्तयिष्यामि पीत्वा वेत्स्यामि वा जलम् ।
स्यात्तु (२) दुर्य्योधनेनेदमुपांशु विहितं कृतम् ॥
गान्धारराजचरितं (३) सततं जिह्मबुद्धिना ।
यस्य कार्य्यमकार्य्यं वा सममेव भवत्युत ।
कस्तस्य विश्वसेद्वीरो दुष्कृतेरकृतात्मनः ॥
अथवा पुरुषैर्गूढ़ैः प्रयोगोऽयं (४) दुरात्मनः ।
भवेदिति महाबुद्धिर्बहुधा तदचिन्तयत् ॥
तस्यासीन्न विषेणेदमुदकं दूषितं यतः ।
मृतानामपि चैतेषां विकृतं नैव जायते (५) ।

१। पदं नेहास्ति कस्यचित्, इह एषु कस्यचित् अन्यस्य पदं प्रहार-चिह्नं नास्तीत्यर्थः ।

२। अत्र सम्भावनायां विधिलिङ् ।

३। गान्धारराजचरितं—शकुनिकल्पितम् इदं महामारणरूपम् ।

४। प्रयोगः—अनिष्टसंयोजनम् ।

५। उदके विषदूषिते तु ममानुजानां शरीरविकृतिरभविष्यत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुखवर्णाः प्रसन्ना मे भ्रातॄणामित्यचिन्तयत् ॥
एकैकशश्चौघबलानिमान् (१) पुरुषसत्तमान् ।
कोऽन्यः प्रतिसमाक्रामेत् कालान्तकयमादृते ॥
एतेन व्यवसायेन तत्तोयं व्यवगाढ़वान् ।
गाहमानश्च तत्तोयमन्तरीक्षात् स शुश्रुवे ॥

अहं वकः शैवलमत्स्यभक्षो
नीता मया प्रेतवशं तवानुजाः ।
त्वं पञ्चमो भविता राजपुत्र !
नचेत् प्रश्नान् पृच्छतो व्याकरोषि ॥

युधिष्ठिर उवाच ।

रुद्राणां वा वसूनां वा मरुतां वा प्रधानभाक् (२) ।
पृच्छामि को भवान् देवो नैतच्छकुनिना कृतम् ॥
हिमवान् पारिपात्रश्च विन्ध्यो मलय एव च ।
चत्वारः पर्व्वताः केन पातिता भूरितेजसः ॥
यान्न देवा न गन्धर्व्वा नासुराश्च न राक्षसाः ।
विषहेरन् महायुद्धे व्यवधीत् तान् कथं भवान् ॥
न ते जानामि यत्कार्य्यं नाभिजानामि काङ्क्षितम् ।
कौतूहलं महज्जातं साध्वसञ्चागतं मम ॥

---

१ । औघबलान्—औघसमूहतुल्यबलान् । "Himself a legion."

२ । प्रधानभाक्—प्रधानपदाभिषिक्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

येनास्म्युद्विग्नहृदयः समुत्पन्नशिरोज्वरः ।
पृच्छामि भगवंस्तस्मात् को भवानिह तिष्ठति ॥

यक्ष उवाच ।

यक्षोऽहमस्मि भद्रं ते नास्मि पक्षी जलेचरः ।
मयैते निहताः सर्वे भ्रातरस्ते महौजसः ॥
ततस्तामशिवां श्रुत्वा वाचं स परुषाक्षराम् ।
यक्षस्य ब्रुवतो राजन्नुपक्रम्य (१) तदा स्थितः ॥
विरूपाक्षं महाकायं यक्षं तालसमुच्छ्रयम् (२) ।
ज्वलनार्कप्रतीकाशमधृष्यं पर्व्वतोपमम् ॥
वृक्षमाश्रित्य तिष्ठन्तं ददर्श भरतर्षभः ।
मेघगम्भीरनादेन तर्ज्जयन्तं महास्वनम् ॥
इमे ते भ्रातरो राजन् वार्य्यमाणा मयासकृत् ।
बलात्तोयं जिहीर्षन्तस्ततो वै सूदिता मया ॥
न पेयमुदकं राजन् ! प्राणानिह परीप्सता ।
पार्थ ! मा साहसं कार्षीर्म्मया पूर्व्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ! ततः पिव हरस्व च ॥

युधिष्ठिर उवाच ।

न चाहं कामये यक्ष ! तव पूर्व्वपरिग्रहम् ।

१। उपक्रम्य—समीपं गत्वा।

२। तालसमुच्छ्रयं—तालप्रांशुम्। समुच्छ्रयः—पौनत्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कामं नैतत् (१) प्रशंसन्ति सन्तो हि पुरुषाः सदा ॥

यक्ष उवाच ।

का च वार्त्ता किमाश्चर्यं कः पन्थाः कश्च मोदते ।
इति मे चतुरः प्रश्नान् कथयित्वा जलं पिब ॥

युधिष्ठिर उवाच ।

मासर्त्तुदर्व्वीपरिवर्त्तनेन (२)
सूर्य्याग्निना रात्रिदिवेन्धनेन ।
अस्मिन्महामोहमये कटाहे
भूतानि कालः पचतीति वार्त्ता ॥

अहन्यहनि भूतानि गच्छन्ति यममन्दिरम् ।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतःपरम् ॥

वेदा विभिन्नाः स्मृतयो विभिन्ना
नासौ मुनिर्यस्य मतं न भिन्नम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां (३)
महाजनो येन गतः स पन्थाः ॥

१। एतत्—परपूर्व्वपरिग्रहस्य प्रार्थनम् ।

२। मासर्त्तुदर्वीपरिवर्त्तनं—मासाश्च ऋतवश्च दर्वीरूपाः। मासानाम् ऋतूनाञ्च यत् परिवर्त्तनं वसन्तनिदाघादिक्रमेण यत् संक्रमणं तदेव दर्वीणां परिवर्त्तनं घट्टनं तेन। अस्मिन्—ब्रह्माण्डरूपे कटाहे। पचति—सुखदुःखभोगाय प्रवणयति प्रवर्त्तयतीत्यर्थः ।

३। गुहायां—मनीषायां, कृतधियां अन्तरात्मनि। गुहाशब्दस्य मनीषार्थकत्वं भगवता शङ्कराचार्य्येण कठोपनिषद्भाष्ये प्रतिपादितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिवसस्याष्टमे भागे शाकं पचति यो नरः ।
अनृणी (१) चाप्रवासी च स वारिचर ! मोदते ॥

यक्ष उवाच ।

प्रीतोऽस्मि त्वयि राजेन्द्र! प्रश्नानां पूरणेन वै ।
तस्मात्त्वमेकं भ्रातॄणां यमिच्छसि स जीवतु ॥

युधिष्ठिर उवाच ।

श्यामो य एष रक्ताक्षो बृहत्साल इवोत्थितः ।
व्यूढोरस्को महाबाहुर्नकुलो यक्ष ! जीवतु ॥

यक्ष उवाच ।

प्रियस्ते भीमसेनोऽयमर्ज्जुनो वः परायणम् (२) ।
स त्वस्मान्नकुलं राजन् ! सापत्नं जीवमिच्छसि ॥
यस्य नागसहस्रेण दशसंख्येन वै बलम् ।
तुल्यं तं भीममुत्सृज्य नकुलं जीवमिच्छसि ॥
तथैनं मनुजाः प्राहुर्भीमसेनं प्रियं तव ।

१। अनृणी—न सन्ति ऋणानि ऋषिदेवपितॄणाम् ऋणानि यस्य तथोक्तः। स्वाध्याययागपुत्रोत्पादनैः तेषु यथाक्रममनृणः यः पुमान् स इत्यर्थः ।

२। परायणं—परं अयनं स्थानं आश्रय इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ केनानुभावेन(१)सापत्नं (२) जीवमिच्छसि ॥
यस्य बाहुबलं सर्व्वें पाण्डवाः समुपासते ।
अर्ज्जुनं तमपाहाय नकुलं जीवमिच्छसि ॥

युधिष्ठिर उवाच ।

धर्म्म एव हतो हन्ति धर्म्मोरक्षति रक्षितः ।
तस्माद्धर्म्मं न त्यजामि मा नो(३)धर्म्मो हतोवधीत् ॥
धर्म्मशीलः सदा राजा इति मां मानवा विदुः ।
स (४) धर्म्मान्न चलिष्यामि नकुलो यक्ष ! जीवतु ॥
कुन्ती चैव तु माद्री च द्वे भार्य्ये तु पितुर्मम ।
उभे सपुत्रे स्यातां वै इति मे ध्रियते (५) मतिः ॥
यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः ।
मातृभ्यां (६) सममिच्छामि नकुलो यक्ष ! जीवतु ॥

१। अनुभावेन—मतिनिश्चयेन अभिप्रायेणेत्यर्थः। "अनुभावः प्रभावे च सताञ्च मतिनिश्चये।"

२। सापत्नं—अनु विमातृपुत्त्रत्वात्। जीवं—जीवन्तं, जीवति इति जीवः पचाद्यच्।

३। धर्म्मोहतः सन् नोऽस्मान् मा वधीत् मायोगात् अमागमनिषेधः।

४। सः—सोऽहम्।

५। ध्रियते—अस्ति, अवतिष्ठते। ध्टधातुस्तौदादिकः।

६। मातृभ्यां समं—मात्रोः समं तुल्यं सुखदुःखादिकम् इच्छामि। अत्र सप्तमीस्थाने तृतीयाकरणमार्षम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यक्ष उवाच ।

यस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम् ।
तस्मात्ते भ्रातरः सर्व्वे जीवन्तु भरतर्षभ ॥
ततस्ते यक्षवचनादुदतिष्ठन्त पाण्डवाः ।
क्षुत्पिपासे च सर्व्वेषां क्षणेन व्यपगच्छताम् ॥

युधिष्ठिर उवाच ।

सरस्येकेन पादेन तिष्ठन्तमपराजितम् ।
पृच्छामि को भवान् देवो न मे यक्षोमतो भवान् ॥
वसूनां वा भवानेको रुद्राणामथवा भवान् ।
अथवा मरुतां श्रेष्ठो वज्री वा त्रिदिवेश्वरः ॥

यक्ष उवाच ।

अहन्ते जनकस्तात ! धर्म्मोऽमृदुपराक्रमः ।
त्वां दिदृक्षुरनुप्राप्तो विद्धि मां भरतर्षभ ॥
यशः सत्यं दमः शौचमार्ज्जवं ह्रीरचापलम् ।
दानं तपो ब्रह्मचर्य्यमित्येतास्तनवो मम ॥
अहिंसा समता शान्तिस्तपः शौचममत्सरः ।
द्वाराण्येतानि मे विद्धि प्रियोह्यसि सदा मम ॥
धर्म्मोऽहमस्मि भद्रन्ते जिज्ञासुस्त्वामिहागतः ।
आनृशंस्येन तुष्टोऽस्मि वरं दास्यामि तेऽनघ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

युधिष्ठिर उवाच ।

देवदेवो मया दृष्टो भवान् साक्षात्सनातनः !
यं ददासि वरं तुष्टस्तं ग्रहीष्याम्यहं पितः ॥
जयेयं लोभमोहौ च क्रोधञ्चाहं सदा विभो !
दाने तपसि सत्ये च मनो मे सततं भवेत् ॥

धर्म्म उवाच ।

उपपन्नो गुणैरेतैः स्वभावेनाऽसि पाण्डव ।
भवान् धर्म्मः पुनश्चैव (१) यथोक्तं ते भविष्यति ।
इत्युक्त्वाऽन्तर्दधे धर्म्मो भगवाल्लोँकभावनः (२) ॥

१। यद्यपि त्वयि धर्म्मः स्वभावतो वर्त्तते, तथापि मद्वरदानात् स पुनरपि तव प्रार्थनानुरूपो नितरां भवतु ।

२। भूतभावनः—भूतानि भावयति जनयति यः सः। कर्त्तरि यनः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रामायणम् ।

एतत्तु वचनं श्रुत्वा सीता रामस्य दुःखिता ।
गलदश्रुमुखी मन्दमिदं वचनमब्रवीत् ॥
ये त्वया कीर्त्तिता दोषा वने वास्तव्यतां प्रति ।
गुणानित्येव तान् विद्धि तव स्नेहपुरस्कृतान् ॥
त्वया सह च गन्तव्यं मया गुरुजनाज्ञया ।
त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम् ॥
न हि मां त्वत्समीपस्थामपि शक्रोऽपि राघव !
सुराणामीश्वरः शक्तः प्रधर्षयितुमोजसा ॥
शुद्धात्मन् प्रेमभावाद्धि भविष्यामि विकल्मषा ।
भर्त्तारमनुगच्छन्ती भर्त्ता हि परदैवतम् ॥
प्रेत्यभावे हि कल्याणः (१) सङ्गमो मे सह त्वया ।
इत्यतोऽनुगमिष्यामि त्वाहं कृतविनिश्चया ॥
श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनाम् ।
भर्त्तारं किल या नारी छायेवानुगता सदा ॥

१। प्रेत्यभावे—परलोके । प्र+इण+यप्+भू+घञ् । कल्याणमस्मिन् अस्तीति कल्याणः अर्श आदित्वात् अः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुगच्छति गच्छन्तं तिष्ठन्तं यानुतिष्ठति ।
तद्भावभावनिरता(१) तत्संयोगपरायणा ।
तमेव भूयो भर्त्तारं सा प्रेत्याप्यनुगच्छति ॥
अनुरक्तां प्रियां भार्य्यां सुव्रतां पतिदेवताम् ।
न त्वं रोचयसे नेतुं मामितः केन हेतुना ॥
भक्तां पतिव्रतां दीनां मां समां सुखदुःखयोः (२) ।
नेतुमर्हसि काकुत्स्थ समानसुखदुःखिनीम् ॥
यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि ।
विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् ॥
एवं बहुविधं तं सा याचते गमनं प्रति ।
नानुमेने महाबाहुस्तां नेतुं विजनं वनम् ।
सा तमुत्तमसंविग्ना सीता विपुलवक्षसम् ।
प्रणयाच्चाभिमानाच्च परिचिक्षेप (३) राघवम् ॥
किं हि कृत्वा विषण्णस्त्वं कुतो वा भयमस्ति ते ।
यत्परित्यक्तुकामस्त्वं मामनन्यपरायणाम् ॥

१। तद्भावभावनिरता—तस्य भर्त्तुः भावः अभिप्रायः तस्य भावः साधनं तस्मिन् निरता। भाव—भू-णिच्-घञ्।

२। समां सुखदुःखयोः—अभ्युदये व्यसने च समां तुल्यां विकाररहिताम्, समानसुखदुःखिनीं, तव सुखे सुखिनीं तव दुःखे च दुःखिनीम्।

३। परिचिक्षेप—भृशं भर्त्संयमास।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्युमत्सेनसुतं वीरं सत्यवन्तमनुव्रताम् (१) ।
सावित्रीमिव मां विद्धि त्वमात्मवशवर्त्तिनीम् ॥
न मातुर्न पितुस्तत्र (२) स्मरिष्यामि न वेश्मनः ।
आर्त्तवान्युपभुञ्जाना (३) पुष्पाणि च फलानि च ॥
न च तत्र ततः (४) किञ्चिद्द्रष्टुमर्हसि विप्रियम् ।
मत्कृते न च ते शोका न भविष्यामि दुर्भरा ॥
यस्त्वया सह स्वर्गो मे निरयो यस्त्वया विना ।
इति जानन् परां प्रीतिं गच्छ राम मया सह ॥
इति सा शोकसन्तप्ता विलप्य करुणं बहु ।
चुक्रोश पतिमायस्ता भृशमालिङ्ग्य सस्वरम् ॥
तां परिपूज्य(५)बाहुभ्यां विसंज्ञामिव दुःखिताम् ।
उवाच वचनं रामः परिविश्वासयं (६) स्तदा ॥

---

१ । अनुव्रतां—अनु सह व्रतं यस्या स्तयोक्ताम् । सत्यवता सह गृहीतवनवासव्रतामित्यर्थः । समासान्तर्गतस्यापि अनुपदस्य योगात् द्वितीया । "अनुस्तेषु सहार्थे च" इति वोपदेवः ।

२ । कर्म्मणि—षष्ठी ।

३ । आर्त्तवानि—ऋतुविशेषजातानि ।

४ । ततः—तस्मात् ।

५ । बाहुभ्यां परिपूज्य—प्रत्यालिङ्ग्य ।

६ । प्रबोधयन् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न देवि तव दुःखेन स्वर्गमप्यभिरोचये ।
न हि मेऽस्ति भयं किञ्चित् स्वयम्भोरिव सर्व्वतः ॥
मम सन्ना मतिः सीते नेतुं त्वां दण्डकावनम् ।
तथाप्यद्य नयामि त्वामनुयातुं सुनिश्चिताम् ॥
आरभस्व चारुश्रोणि वनवासक्षमाः क्रियाः ।
नेदानीं त्वदृते सीते स्वर्गोऽपि मम रोचते ॥

ततः प्रहृष्टा प्रतिपूर्णमानसा
यशस्विनी भर्त्तुरवेक्ष्य भाषितम् ।
धनानि रत्नानि च दातुमङ्गना
प्रचक्रमे धर्म्मभृतां (१) मनस्विनी ॥

ततोऽब्रवीन्महातेजा रामो लक्ष्मणमग्रतः ।
स्थितं प्राग्गामिनं धीरं याचमानं कृताञ्जलिम् ।
मयाद्य सह सौमित्रे त्वयि गच्छति तद्वनम् ।
को भजिष्यति कौशल्यां सुमित्रां वा यशस्विनीम् ॥
अभिवर्षति कामैर्यः पर्ज्जन्यः पृथिवीमिव ।
स विमातृवशं यातो महातेजा महीपतिः ॥
सा हि राज्यमिदं प्राप्य नृपस्याश्वपतेः (२) सुता ।
दुःखितानां सपत्नीनां न करिष्यति शोभनम् ॥

१। धर्म्मभृतां—धार्म्मिकेभ्यः। सम्बन्धविवक्षया षष्ठी।

२। अश्वपतेः—केकयराजस्य।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न स्मरिष्यति कौशल्यां सुमित्राञ्च सुदुःखिताम् ।
भरतो राज्यमासाद्य कैकेय्यां पर्य्यवस्थितः (१) ॥
एवमुक्तस्तु रामेण लक्ष्मणः श्लक्ष्णया गिरा ।
प्रत्युवाच तदा रामं वाक्यज्ञो वाक्यकोविदम् ॥
तवैव तेजसा वीर भरतः पूजयिष्यति ।
कौशल्याञ्च सुमित्राञ्च प्रयतो नास्ति संशयः ॥
कुरुष्व मामनुचरं वैधर्म्म्यं नेह विद्यते ।
कृतार्थोऽहं भविष्यामि तव चार्थः प्रकल्पते ॥
धनुरादाय सगुणं तूणयुग्मं ससायकम् ।
पुरतस्ते गमिष्यामि पन्थानमनुदर्शयन् ॥
आहरिष्यामि ते नित्यं मूलानि च फलानि च ।
वन्यानि च तथान्यानि स्वाहार्य्याणि तपस्विनाम् ॥
भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं सर्व्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥
रामस्त्वनेन वाक्येन सम्प्रीतः प्रत्युवाच तम् ।
व्रजापृच्छस्व सौमित्रे सर्व्वमेव सुहृज्जनम् ॥
ततः सीतां समालिङ्ग्य श्वश्रूर्व्वचनमब्रवीत् ।
परिदेवमानां कृपणां मूर्द्ध्न्युपाघ्राय मैथिलीम् ॥

१। पर्य्यवस्थितः—अनुरक्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

असत्य: सर्व्वलोकेऽस्मिन् सततं सत्कृताः प्रियैः (१)।
भर्त्तारं नानुमन्यन्ते विनिपातगतं (२) स्त्रियः॥
एष स्वभावो नारीणामनुभूय पुरा सुखम्।
अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि॥
साध्वीनान्तु स्थितानान्तु शीले सत्ये श्रुते स्थितौ(३)।
दैवतं परमं स्त्रीणां पतिरेको विशिष्यते॥
स त्वया नावमन्तव्यः पतिः प्रव्राजितो वनम्।
तव देवसमस्त्वेषु निर्धनः सधनोऽपि वा॥
विज्ञाय वचनं सीता तस्या धर्मार्थसंहितम् (४)।
कृताञ्जलिरुवाचेदं श्वश्रूमभिमुखे स्थिताम्॥
करिष्ये सर्व्वमेवाहमार्य्या यदनुशास्ति माम्।
अभिज्ञास्मि यथा भर्त्तुर्वर्त्तितव्यं श्रुतञ्च मे (५)॥
न मामसज्जनेनार्य्या समानयितुमर्हति (६)।
धर्माद्विचलितुं नाहमलं चन्द्रादिव प्रभा॥

१। प्रियैः—इष्टवस्तुभिः, पतिभिर्वा।

२। विनिपातगतं—व्यसनमापन्नम्।

३। स्थितौ—लोकमर्य्यादायाम्।

४। संहितं—सङ्गतं, युक्तम्। सम्—धा—क्त।

५। 'मे इति कर्त्तरि षष्ठी।

६। समानयितुं समानां कर्त्तुं, उपमातुम्। Compare.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नातन्त्री वाद्यते वीणा नाचक्री वर्त्तते (१) रथः ।
नापतिः सुखमेधेत या स्यादपि शतात्मजा (२) ॥
मितं ददाति हि पिता मितं भ्राता मितं सुतः ।
अमितस्य तु दातारं भर्त्तारं का न पूजयेत् ॥
सीताया वचनं श्रुत्वा कौशल्या हृदयङ्गमम् ।
शुद्धसत्वा मुमोचाश्रु सहसा दुःखहर्षजम् ॥
तां प्राञ्जलिरभिप्रेक्ष्य मातृमध्येऽतिसत्कृताम् ।
रामः परमधर्म्मात्मा मातरं वाक्यमब्रवीत् ॥
अम्ब मा दुःखिता भूत्वा पश्येस्त्वं पितरं मम ।
क्षिप्रमेवागमिष्यन्ति नववर्षाणि पञ्च च ।
समग्रमिह (३) सम्प्राप्तं मां द्रक्ष्यसि सुहृद्वृतम् ॥
अथ रामश्च सीता च लक्ष्मणश्च कृताञ्जलिः ।
उपसंगृह्य राजानं चक्रुर्दीनाः प्रदक्षिणम् ॥
तेनापि समनुज्ञातो धर्म्मज्ञः सह सीतया ।
राघवः शोकसंमूढ़ो जननीमभ्यवादयत् ॥
अन्वक्षं (४) लक्ष्मणो भ्रातुः कौशल्यामभ्यवादयत् ।

---

१ । वर्त्तते—आवर्त्तते, चलति । moves.

२ । शतं आत्मजाः पुत्रा यस्याः सा ।

३ । समग्रं सम्पूर्णं, सर्वथा अपायविहीनम् ।

४ । अन्वक्षं—अनुपदम् । अनु—अक्ष—पक्ष ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अपि मातुः सुमित्राया जग्राह चरणं पुनः ॥
तं वन्दमानं रुदती माता सौमित्रिमब्रवीत् ।
हितकामा महाबाहुं मूर्ध्न्युपघ्राय लक्ष्मणम् ॥
सृष्टस्त्वं वनवासाय स्वनुरक्तः सुहृज्जने ।
रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति ॥
व्यसनी वा समृद्धो वा गतिरेष तवानघ ।
एष लोके सतां धर्म्मो यज्ज्येष्ठवशगो भवेत् ॥
इदं हि वृत्तमुचितं कुलस्यास्य सनातनम् ।
दानं दीक्षा च यज्ञेषु तनुत्यागो मृधेषु हि ।
ज्येष्ठस्याप्यनुवृत्तिश्च राजवंशस्य लक्षण ॥
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥
लक्ष्मणन्त्वेवमुक्त्वा सा तत्परं प्रियराघवम् ।
सुमित्रा गच्छ गच्छेति पुनः पुनरुवाच तम् ॥
गम्यतामर्थलाभाय क्षेमाय विजयाय च ।
शत्रुपक्षविनाशाय पुनः सन्दर्शनाय च ॥
निर्गच्छति महाबाहौ रामे पौरजनाश्रुभिः ।
पतितैरभितः सिक्तं प्रशनाश महीरजः ॥
दृष्ट्वा तु नृपतिः श्रीमानेकचित्तगतं पुरम् ।
निपपातैव दुःखेन कृत्तमूल इव द्रुमः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ततस्तु तमसातीरं रम्यमाश्रित्य राघवः।
सीतामुद्वीक्ष्य सौमित्रिमिदं वचनमब्रवीत्॥
इयमद्य निशा पूर्वा सौमित्रे नो वनेषिणाम्।
गृहवासस्य सौख्यानां नचोत्कण्ठितुमर्हसि॥

ततः समास्थाय रथं महारथः
ससारथिर्दाशरथिर्वनं ययौ।
उदङ्मुखं (१) तन्तु रथञ्चकार स
च्छलेन पौरानपहातुमुत्सुकः॥

प्रभातायान्तु शर्वर्य्यां पौरास्ते राघवं विना।
अगत्या शोकसन्तप्ता अयोध्यां प्रतिचक्रमुः॥
विशालान् कोशलान् रम्यान् प्राप्य लक्ष्मणपूर्व्वजः।
अयोध्याभिमुखो धीमान् प्राञ्जलिर्व्वाक्यमब्रवीत्॥
आपृच्छे त्वां पुरीश्रेष्ठे काकुत्स्थपरिपालिते।
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च (२)॥
निवृत्तवनवासस्त्वामनृणो जगतीपतेः।
पुनर्द्रक्ष्यामि मात्रा च पित्रा च सह सङ्गतः॥

१। उदङ्मुखं—उत्तरदिगभिमुखं अयोध्याभिमुखमित्यर्थः। अयोध्या हि तमसाया उत्तरा।

२। यानि दैवतानि अपि आपृच्छे इति शेषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

राजतरङ्गिणी ।

मातृगुप्तोपाख्यानम् ।

तत्रानेहस्युज्जयिन्यां (१) श्रीमान् हर्षापराभिधः ।
एकच्छत्रश्चक्रवर्त्ती (२) विक्रमादित्य इत्यभूत् ॥
म्लेच्छोच्छेदाय वसुधां हरेरवतरिष्यतः ।
शकान् विनाश्य येनादौ कार्य्यभारो(३) लघुः कृतः ॥
नानादिगन्तराख्यातं गुणवत्सुलभं नृपम् ।
तं कविर्मातृगुप्ताख्यः सभाख्यानसमासदत् ॥
नृपं स सेवमानस्तं उद्योगेन बलीयसा ।
अनिर्विण्णो (४) मातृगुप्तो षड्ऋतूनत्यवाहयत् ॥

१। तत्र अनेहसि, तस्मिन् अवसरे, तदानीमित्यर्थः।

२। एकछत्रः—एकं छत्रं यस्य। यस्मिन् राजनि अन्यनरपतीनां शिरश्छत्रशून्यं बभूव, तस्य सार्व्वभौमत्वात्। चक्रवर्त्ती चक्रे द्वादश-राजमण्डले वर्त्तते नायकरूपेण अधितिष्ठति । मण्डलाधिप इत्यर्थः। The arbiter of a system of independent kingdoms; one who holds the balance of power in his hands.

३। कार्य्यस्य म्लेच्छोच्छेदरूपस्य भारः लघुः कृतः, म्लेच्छानामन्यतमानां शकानां निधनादिति भावः।

४। अनिर्व्विणः निर्वेदरहितः, सत्यपि निर्वेदकारणे अक्षुब्धचित्तः इव इत्यर्थः। पुरस्क्रियां विना सुचिरं राजशुश्रूषणमत्र निर्वेदकारणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रावर्त्तत ततो घोरनीहारलववार्षिभिः ।
दहन्निवाङ्गं प्रालेयपवमानैर्हिमागमः ॥
चिरं चिन्तयता राज्ञा सदृशी तस्य सत्क्रिया ।
शुश्रूषायां गुणानाञ्च न काचित् समदृश्यत ॥
अत्रान्तरे स्मारितोऽभूत् नृपो दूतेन केनचित् ।
काश्मीरमण्डलं राजरहितं वर्त्तते इति ॥
पात्रायास्मै मही काम्या सा मया प्रतिपाद्यते ।
अवधीर्य्य महीपालान् महतोऽप्यर्थनापरान् ॥
इति निश्चित्य निभृतं क्षपायामेव पार्थिवः ।
गूढं व्यसर्जयद्दूतान् काश्मीरीः प्रकृतीःप्रति ॥
आदिदेश च तान् यो वा दर्शयेच्छासनं मम ।
मातृगुप्ताभिधो राज्ये निःशङ्कं सोऽभिषिच्यताम् ॥*
प्रभातायां विभावर्य्यामथास्थानस्थितो नृपः ।

---

* Màtrigupta ascended the throne of Kasmir in A. D. 120 and reigned 5 years. Dr. Bhowdaji identified him with the great poet Kálidàsa. But the description of Màtrigupta given in the Rájatarangani does not tally with the traditional accounts of Kálidása's life. Moreover it is a labour lost to endeavour to prove that the above names are identical, Màtri being equivalent to Káli, and Gupta to Dása; and that both the names mean a protege of the goddess Káli.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आकार्य्यतां (१) मातृगुप्त इति चत्तारमादिशत्(२)॥
ततः प्रधावितानेकप्रतीहारिप्रणोदितः ।
प्रविवेश सहीभर्त्तुस्त्यक्ताश (३) इव सोऽन्तिकम् ॥
तस्मै कृतप्रणामाय मुहूर्त्तादेव पार्थिवः ।
भ्रूसंज्ञितेन व्यतरत् लेखं लेखाधिकारिणा (४) ॥
स्वयञ्च तमुवाचाङ्ग(५)कश्मीरान् वेत्ति किं भवान् ।
गत्वा तन्नाधिकारिभ्य एतच्छासनमर्प्यताम् ॥
स ज्ञापितोऽस्मद्देहेन यो लेखं वाचयेत् पथि ।
सन्दिदेश प्रयत्नेन विस्रष्टव्या न कर्हिचित् ॥
अविज्ञाताशयो राज्ञस्तामाज्ञां भ्रमशङ्कितः ।
सोऽग्रह दहनज्वालां ननु रत्नाङ्कुरद्युतिम् ॥
गच्छतो मातृगुप्तस्य निःसहायस्य वर्त्मनु ।
नाभूत् विघ्नभयोद्भूतः विकल्पः कोऽपि चेतसि ॥
अहं पूर्व्विकयोद्यद्भिर्निमित्तैः शुभशंसिभिः ।

१। आकार्य्यतां—आ+कृ+णिच्+तां (लोट्) आहूयताम् ।

२। चत्तारं—सूतम् ।

३। त्यक्ताश इव—त्यक्ता आशा येन सः सुखाशाशून्यः जीविताशाहीनो वा। like one in despair.

४। लेखाधिकारिणा—लेखे अधिकारी, लिपिलेखनकार्य्ये नियुक्तः राजपुरुषविशेषः। A secretary.

५। अङ्ग—आमन्त्रणे अव्ययमेतत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स वितीर्णंकरालम्ब इव न श्रममाददे ॥
अचिन्तयच्च शास्त्रज्ञो निमित्तैः शुभशंसिभिः ।
एतैर्भूभर्तृराद्देशो ध्रुवं मे स्यात् शुभावहः ॥
अक्लक्लकलङ्काः पन्थानः वल्लभातिथयो रहाः ।
उपानमन् गच्छतोऽस्य सत्क्रियाश्च पदे पदे ॥
श्रुत्वाथ विक्रमादित्यदूतः प्राप्त इति द्रुतम् ।
पुरस्कृतो मन्त्रिमुख्यैः स सभागृहमाविशत् ॥
अथ प्राङ्मुखसौवर्णभद्रपीठप्रतिष्ठितः ।
सन्निपत्य प्रकृतिभिः मातृगुप्तोऽभ्यषिच्यत ॥
अभिषेकोत्सवेऽतीते विक्रमस्य गुणान् स्मरन् ।
लेखं सोपायनं शीघ्रं दूतेनैष व्यसर्ज्जयत् ॥

नाकारमुद्वहसि नैव विकत्थसे त्वं
दित्सां न सूचयसि मुञ्चसि सत्फलानि ।
निःशब्दवर्षणमिवाम्बुधरस्य राजन्
संलक्ष्यते फलत एव तव प्रसादः ॥

इत्यासादितराज्यस्य शासतः क्ष्मां क्षमापतेः ।
त्रिमासोना (१) ययुस्तस्य सैकाहाः पञ्चवत्सराः ॥

१। त्रिमासोनाः—त्रिभिः मासैः ऊनाः हीनाः । सैकाहाः एकं अहः एकाहः तेन सह सैकाहाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रवरसेनोऽसौ वरं लब्ध्वा महेश्वरात् ।
आजगाम समुद्धर्त्तुं राज्यं पितृमरातितः ॥
ततो विदितवृत्तान्तो मातृगुप्ताभिषेचनात् (१) ।
निषिध्य सविधायातान् (२) अमात्यानब्रवीद्वचः ॥
विक्रमादित्यमुत्सिक्तमुच्छेत्तुं (३) यतते मनः ।
मातृगुप्तं प्रति न नो रोषलेशोऽपि विद्यते ॥
ततोऽसौ योधसहितः प्रययौ दक्षिणामुखः ।
त्रिगर्त्तानां (४) भुवं जित्वा स व्रजन् पथि भूपतिः ॥
शुश्राव विक्रमादित्यं कालधर्म्ममुपागतम् । (५)
राजा प्रवरसेनोऽथ निवृत्तः कश्मीरान् प्रति ॥
मातृगुप्तेन तच्छ्रुत्वा शोकान्निःश्वसता मुहुः ।
नास्नायि नाशि नास्वापि नाकारि कर्म्म किञ्चन ॥
वैराग्यात् भुवमुत्सृज्य कश्मीरेभ्यो विनिर्गतः ।
आहूय प्रकृतीः सर्व्वाः मातृगुप्त उवाच ह ॥
पुण्यां वाराणसीं गत्वा शममार्गसमुत्सुकः ।

१। मातृगुप्ताभिषेचनात्—अत्र आरम्भार्थकस्य पदस्य अप्रयोगेऽपि तदर्थप्रतीतौ पञ्चमी।

२। सविधायातान्—सविधे निकटे आयातान् आगतान्।

३। उत्सिक्तं गर्व्वितं—उत्+सिच+क्त (कर्त्तरि)।

४. Trigartas—were a people inhabiting the modern Lahore.

५। कालधर्म्ममुपागतः—कालधर्म्मं नाशम् उपागतः प्राप्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इच्छामि सर्व्वसंन्यासं (१) कर्त्तुं द्विजजनोचितम् ॥
अथ वाराणसीं गत्वा कृतकाषाय(३) संग्रहः ।
सर्व्वं संन्यस्य सुकृती मातृगुप्तोऽभवद्यतिः ॥

ललितादित्योपाख्यानम् ।

राजा श्रीललितादित्यः (२) सार्व्वभौमस्ततोऽभवत् ।
जम्बुद्वीपद्विजेन्द्रस्य येनातन्यत मण्डनम् ॥
नयाञ्जलिषु (४) बद्धेषु राजभिर्विजयोद्यमे ।
पार्थिवः पृथुविक्रान्तिर्युधि क्रोधं मुमोच यः ॥
विनिःसरत् (५)पौरतया भयाद्गर्भानिवामुचन् ।
द्विषां वसतयो यस्य निशम्याक्रन्ददुन्दुभिम् ॥
क्षितिं प्रदक्षिणयतोरवैरिव महीपतेः ।
जिगीषोः प्रायशस्तस्य यात्रास्वेव वयो ययौ ॥

---

१ । सर्वेषां विषयाणां संन्यासः सम्यक् न्यासः यतिव्रतावलम्बनम् ।

२ । यथा आदित्यः चन्द्रस्य स्वकिरणसम्पर्कात् मण्डनं करोति तथा आदित्यतुल्यो ललितादित्यो निजयशोभिः जम्बुद्वीपस्य शोभामकरोत् । द्विजेन्द्रः चन्द्रः ।

३ । कषायेण रक्तं काषायं वस्त्रम् ।

४ । नयाञ्जलिषु—नयेन नीत्या विनयेन वा कृतेषु अञ्जलिषु ।

५ । विनिःसरत्पौरतया—विनिःसरन्तः पौरा यास्थः ताः विनिःसरत्पौराः तासां भावः तया । आक्रन्ददुन्दुभिः आक्रन्दनस्य आक्रमणस्य दुन्दुभिः आक्रमणकाले प्रध्मातः दुन्दुभिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कन्यानां यत्र कुब्जत्वं व्यधाद्गाधिपुरे (१) मरुत् ।
तत्रैव शंसनीयः स पुंसांश्चक्रे (२)भयस्पृशाम् ॥
यशोवर्म्माद्रिवाहिन्याः(३)क्षणात् कुर्व्वन् विशोषणम् ।
नृपतिर्ललितादित्यः प्रतापादित्यतां ययौ ॥
मतिमान् कान्यकुब्जेन्द्रः मित्रशर्म्माणमादिशत् ।
सान्धिविग्रहिकं सन्धिं कर्त्तुं लिपिविलेखनैः ॥
कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः* ।

---

1 Gádhipura—Gadhi was father of Visvámitra and king of Kányakubja; hence Gádhipura is another name of Kànyakubja.

२। यत्र—दैवः समीरणः कन्यानां अवलानामेव कुब्जत्वं चकार, तत्र स पुरुषाणामपि भयजननेन कुब्जत्वं चकार इति तस्य वायोरुत्कर्षः सूचितः।

३। यशोवर्म्मा—कान्यकुब्जाधिपः स एव अद्रिः पर्व्वतः वाहिनी चमूः सा एव वाहिनी नदी। तस्यां शोषण' नाशन' जलाकर्षणञ्च। आदित्योहि शैलवाहिन्या नद्याः जलशोषण' करोति। स ललितादित्योऽपि यशोवर्म्मणः सैन्यस्य नाश' चकार। आदित्यस्तु बहुभिः दिवसैः शोषण' करोति। स क्षणात् चकार। इति तस्य आधिक्य' व्यज्यते।

* Lalitaditya reigned from A. D. 697 to 733, and was a contemporary of the great poet Bhavabhuti who graced the court of his enemy Yasovarmá of Konuoj.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

7 जितो ययौ यशोवर्म्मा तद्गुणस्तुतिवन्दिताम् (१) ॥
यशोवर्म्माणमुल्लङ्घ्य हिमाद्रिमिव जाह्नवी ।
सुखेन प्राविशत्तस्य वाहिनी पूर्व्वसागरम् ॥

१। तद्गुणस्तुतिवन्दितां—तस्य ललितादित्यस्य गुणाः शौर्य्यादयः तेषां स्तुतिः तया वन्दितां स्तुतिपाठकत्वम्।

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २।२।६४
बुलन्दशहर (उ० प्र०)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri